(च०) संख्यावाचका शब्दाः पञ्चन्प्रभृतयो बहुवचनान्ताः त्रिषु लिङ्गेषु सदृशाः । जसि शसि च सूत्रम्—'जश्शसोर्लुक्' ॥ जस च श च जश्शसौ तयोर्जश्शसो षष्ठीद्विवचनान्तम् । 'स्वादौ०' 'पत्रि०' । लुक् प्रथमैकवचनान्तम् इतेर० 'नामि नोरः' ॥ वृत्तिः सुगमा । अनेन जस् शस इत्येतयोर्लुक् ॥ २२ ॥

(प्र०) जश्शसोरिति । ष्न इत्यनुवर्तते । तत्र च षपरनान्ता एव ष्णान्तास्य विश्वपजादयस्तासास्त्यादौ कायापसङ्गः ॥ २२ ॥

लुकि न तन्निमित्तम् ॥ लुकि सति तन्निमित्तं कार्यं न स्यात् ॥२३॥

(च०)'प्रत्ययलोपे प्रत्ययलक्षणं न याति' इति न्यायान् नोपधाया इति दीर्घत्वप्राप्तौ निषेधद्धुमाह— लुकि न तन्निमित्तम् इति । लुकि कृते सति तन्निमित्तं कार्यं न भवति स एव निमित्तं कारणं यस्य तत्तन्निमित्तं, यथा जसि नोपधायाः इति सूत्रेण दीर्घत्वप्राप्तावपि न दीर्घता । नहि दीर्घं विनाश लुक कार्यः । इत्यत्रोच्यते—कृताकृतप्रसङ्गी यो विधिः स नित्यः इति भावकर्म कार्य न भवति अभावकर्म तु भवत्येव ॥ २३ ॥

(प्र०) प्रत्ययलोपे प्रत्ययलक्षणमिति अप्रधानोक्तेऽपि तन्निमित्तोपधाया दीर्घो का रत्नोपादिप्रासङ्गाह । लुकीति । लुक्शब्देन जशसोर्लोपे सति तन्निमित्तमङ्गकार्यं न भवतीत्यर्थः ॥ २३ ॥

तेन 'नोपधायाः' इति दीर्घत्वं न । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः । पञ्चभ्यः ॥ ष्णः ॥ षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति ॥ नोपधायाः । नान्तो नो लोपश्चधौ । पञ्चानाम् , पञ्चसु ॥ एवं सप्तन्नवन्दशन्प्रभृतयः ॥ २४ ॥

(च०) तेन 'नाम्नो नो लोपशधौ' इति भवत्येव । तृतीयादयुर्वीरस्वास्वनुवृत्त 'नाम्नो नो लो०' । आमि सूत्रम्—'षट्' । ष च न् च्ण तस्मात् ण्ण पञ्चम्येकवचना न्तम् । 'स्वरहीन०' । षकारान्तनकारान्तसङ्ख्यायाः परो य आम् तस्य नुडागमो भव ति । अनेन न् । 'नामयायाः' इति दीर्घः । 'नाम्नो नो०' ॥ इति—'नाम्नो नो०' एवं सप्तन् नवन् दशन् एकादशन् प्रभृतयोऽपि साध्याः ॥ २४ ॥

(प्र०) ष्ण । ष् न् च ष्ण तस्मात् । अत्रापि सङ्ख्यायाः प्राधान्ये परमषण्णा मित्यादौ भवत्येव । गौणत्वे तु प्रियषष्णामित्यादौ न ॥ २३ ॥

अष्टन्शब्दस्य भेदः ॥ अष्टनो डौ वा ॥ अष्टनशब्दात्परयोर्जस् शसोर्वा डौ भवति । डित्त्वाट्टिलोपः । अष्टौ अष्टौ अष्ट अष्ट ॥ २५ ॥

(च०) अष्टन्शब्दस्य भेदः । सूत्रम्—'अष्टनो डौ वा' ॥ अष्टन् इति अष्टन्शब्दस्य षष्ठ्येकवचनान्तम् । 'स्वरहीन०' 'चार्वि०' । डौ प्रथमैकवचनान्तम् । सांकेतिकम् । 'इत्' 'इ का' ॥ वा प्रथमैकवचनान्तम् । अव्ययम् । सिद्धमिदं सूत्रम् । अष्टनशब्दात्परयो र्जस्शसोर्वा विकल्पेन डौ भवति । गुरुत्वादन्यत्र यथा डौ । जसि शसि च रूपद्वयम् । अनेन एकत्र डौ । औ । डित्त्वाट्टिलोपः । 'स्वरहीनं०' अन्यत्र 'जश्शसोर्लुक्' 'नाम्नो नो०' ॥ तृतीयादिबहुत्वेऽपि रूपद्वयम् ॥ २५ ॥

(प्र०) अष्टन इति । अत्र आकारप्रश्लेषात् वाऽऽ इत्यनेन आत्वपक्षे एव डौविधिः । अत्रापि सङ्ख्याया इत्यनुवृत्तेर्गौणत्वनात्वम् । न वा डौ । वन्नुना वाऽऽ इत्यत्र आ इति सुतादेकवचनेन सु इति सप्तमीबहुवचनेन च प्रत्याहारग्रहणादनात्वाभाव एव । यद्यप्यत्राष्ट स्याद्डाविति डित्करणं व्यर्थं स्यात् गौणत्वेऽप्यात्वं जश्शसोरौः इत्यत्र इत्यस्य वाचा दर एव । अष्टानामित्यत्र नुडि स्यात्वम् । आत्वे वा रूपद्वयकाले नकारान्तत्वान्नुट् । आत्वाभावेऽपि नुटि सर्वादीर्घ च सादित्वेन नलोप इति समानरूपत्वादेकमेव रूपम् ॥२५॥

वाऽऽसु ॥ वा आ आसु । अष्टन्शब्दस्य आसु विभक्तिषु परासु वा टेरात्वं भवति । अष्टभि –अष्टाभि । अष्टभ्य अष्टाभ्य । अष्टभ्य अष्टा- भ्य । अष्टानाम् । अष्टसु अष्टासु(क) ॥ २६ ॥

(च०) सूत्रम्—'वाऽऽसु' ॥ वा प्रथमैकवचनान्तम् । 'अव्यया०' । आ प्रथमैकव चनम् । सांकेतिकम् । आसु इति इदंशब्दस्य सप्तमीबहुवचनान्तम् । 'स्वरादेः स्वादौ' 'स्म्यः' 'आपतः स्त्रियाम्' 'सवर्णे दीर्घ०' । अष्टन इति अष्टन्शब्दस्य आसु तृतीयादि तु

(क) गौणत्वेऽपि आत्व जायतइति वेयम् । [illegible] ... [illegible]

पराद सतोपु वा आस्वमाकारो भवति । अनेन तृतीयाचतुर्थीपञ्चमीबहुवचने वा आ काराः। अन्यत्रापि 'नाम्नो नो॰' । आमि । एकत्र आकारः । अन्यत्रापि 'ध्न' इति पु१। द्वितीयके। 'ओपधाया इति दीर्घः। नाम्नो नो॰' पश्चद्वये सदृश रूपम् ॥ सुपि—एकत्र आकारे कृते अन्यत्रापि नाम्नो नो॰ ॥ २६ ॥

मकारान्त इदमशब्दः ॥ इदमोऽय पुंसि ॥ इदम अयम् पुंसि । इदमशब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य(क) ॥ अयम् ॥२७॥

(च॰) मकारान्तानाह-मकारान्त इदमशब्दः । सौ सूत्रम्—'इदमोऽयं पुंसि' ॥ इदमः षष्ठ्येकवचनम् । 'स्वरहीनं॰' । अयं प्रथमैकवचनान्तम् । इसेपः ' मोऽनुस्वार' 'मतोऽस्युः' 'क्सो 'रनोलोप' । पुंसि इति पुंसशब्दस्य सप्तम्येकवचनान्तम् ।' स्वरहीनं॰' सिद्धम् । इदमशब्दस्य पुंसि पुल्लिङ्गे एव सौ प्रथमैकवचने परे, अयमित्यादेशो भवति । अनेन सौ परे अयम् । मान्तत्वाभावादेव 'त्यदाद्येरः त्यादौ इति न भवति । अ न्यथा अयमित्येवावश्यक । इसे च से॰' 'मोऽनुस्वार ॥ केचित्तु सिसहितस्यैव अयम् इत्यादेशमिच्छन्ति ॥ २७ ॥

द्विवचनादौ'त्यदाद्येः' इति सर्वत्राकार । इद औ इति स्थिते ॥ दस्य म ॥ त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे ॥ 'ओ औ औ' इमौ । सर्वादित्वात् 'असी' इमे। त्यदादीनां घेरभाव ॥ इमम् इमौ इमान् ॥२८॥

(च॰) द्विवचनादौ तु त्यदाद्येः त्यादौ इत्यकारे कृते सूत्रम्-'दस्य म' षष्ठ्येकव चनान्तम् । दस्य । म प्रथमैकवचनान्तम् । आर्षि ॥ त्यदादीनां दकारस्य अयुक्तस्य स्यादौ सदविभक्तौ परे मत्वं भवति । अनेन सदविभक्तिषु मकारः । प्रथमाद्विवचने ओ औ औ' ॥ प्रथमाबहुवचने—'असी' 'अइए' ॥ द्वितीयैकवचने—'अमुशसोरस्य' मोऽनु स्वार ॥ द्वितीयाद्विवचने— ओ औ औ ॥ द्वितीयाबहुवचने— अमुशसोरस्य' सो न पुंस॰ 'इति ॥ २८ ॥

अन टौसोः ॥ इदमोऽनादेशो भवति टौसो परयो कस्वस्य ॥ 'टेन'अनेन ॥ २९ ॥

(च॰) तृतीयैकवचने सूत्रम्—'अन टौसो' अन प्रथमैकवचनान्त सांकेतिकम् । टा च ओ च टौसौ तयो सप्तमीद्विवचनान्तम् । 'स्वरहीन ' 'आर्षि॰' ॥ इदमशब्दस्य टा तृतीयैकवचने ओसि षष्ठीसप्तमीद्विवचने परे अन इत्यादेशो भवति । अनेन टावचने अन आदेश । 'टेन 'अ इ ए' अनेन ॥ २९ ॥

भ्यः ॥ भि अ । इदम सकारे मकारे च परे अकारादेशो भवति कस्वस्य ॥ 'अद्भि' इत्यादिकम् आभ्याम् ॥ ३० ॥

(क) इदम इति। इदम किम्। अ। पुंसि ते किम्। इदम्। न च पुंस्त्वे इ त्विनिबन्धके अभिव्यक्तीति चेद अयम् तस्य अनित्यत्वज्ञापनार्थम्। तेन हेतेतु इत्य दे सिद्धम्।

(च०) द्वित्वे । सूत्रम्—'स्म्य' स् च म च स्म् तस्मिन् स्मि सप्तम्येकवचनान्तम् । 'स्वरहीन०' ॥ अः प्रथमैकवचनान्तम्। 'घोषि०' पश्चात् 'इ यं स्वरे' 'स्वरहीनं०' ॥ इदम् शब्दस्य सकारे मकारे च परे अकारो भवति इत्यन्य समप्रस्येत्यर्थः ॥ अनेन तृतीया चतुर्थीपञ्चमीद्वित्वे इदमोऽकारः । 'अद्भि इत्यात्वम् ॥ तृतीयाचतुर्थीपञ्चमीबहुवचने— 'स्म्यः' इत्यकारः ॥ ३० ॥

(प्र०) इदम इति । अनेकव० स्त्रात्सर्वस्य मकारान्तस्यादसेपः सेळोपः । हे अस कौ माहाणीत्यादौ सम्बोधनसम्भवेऽपि प्रचुरप्रयोगाभावाद्भावोक्तिः । स्म्य । स्मि अ त्यदाद्येटेः स्यात्यविषयकारे सिद्धेऽपि पुनर्विधानसामर्थ्यात्सर्वस्येत्येके । तदसत् । त्यदादेष्टेरिति टेरकारविधानात् । अनेन चेदम षष्ठीनिर्दिष्टत्वेनान्त्यस्येति वैयर्थ्याभावात् । अन्ये तु अ इत्यस्य विसर्गपरत्वेन गुरुत्वात् स्येत्याहुः । तदपि मन्दम् । गुरुशब्दस्यानेकार्थ रारत्वप्रतिपादनात् । छन्दश्शास्त्रादेः च इत्यादौ च इत्यस्यापि विसर्गपरत्वेन गुरुत्वापत्त्या सत्वं नापसङ्गात् । प्रयोगे विसर्गाश्रवणात् । वस्तुतस्तु इदमोऽय पुंसीत्यत इदम् इति विभक्तिविपरिणामेन प्रथमान्तमनुवर्तनीयम् । तत्र निर्दिश्यमानस्यादेशा भवन्तीति स वस्यैव स्यात् । षष्ठीनिर्दिष्टस्येत्यस्य वक्तव्यत्वेन प्रयोगानुसारित्वाद्भाष्यवृत्तिर्वा ॥ ३० ॥

भिस्साभिस् ॥ इदमदसोर्भिस् भिसेव भवति ॥ तेन न भकारस्या कारः । 'ए स्मि बहुत्वे' एभि । इदम् ङ इति स्थिते 'त्यदाद्येटेर स्यादौ' 'सर्वादे स्मट्' 'स्म्यः' अस्मै । एभ्य । आभ्याम् । 'ङसिरत्' 'अत ' अ स्मात् । आभ्याम् । एभ्य । 'ङस् स्य' अस्य । 'अन टौसो ' 'ओसि' 'ए अय्' अनयो । 'सुडाम ' 'स्म्य ' 'एस्मि बहुत्वे' 'किलात्' एषाम् । 'ङि स्मिन्' अस्मिन् अनयो एषु ॥ त्यदादीनां सम्बोधनाभाव ॥ इदमोऽन्वा देशे द्वितीयाटौस्स्वेनादेशो वक्तव्यः ॥ उक्तस्य पुनर्भाषणमन्वा देश (क) ॥ एन एनौ एनान् । एनेन एनयो ॥ प्रशाम्शब्दस्य भेद ॥ मो नो धातोः ॥ धातोर्मकारस्य नकारादेशो भवति स्से पदान्ते च । प्रशान् प्रशामौ प्रशामः । हेप्रशान् हेप्रशामौ हेप्रशामः । प्रशामम् प्रशामौ प्रशाम । प्रशामा प्रशान्भ्याम् प्रशान्भि ॥ ॥ ३१–३२ ॥

(क) [illegible] पुनः [illegible] । यथा—

"[illegible] ।
[illegible] ॥"

[illegible]

"[illegible]" ।

[illegible] । यथा—

[illegible]"

[illegible]

(च०) ततो भिसि सूत्रम्— भिस् भिस् । भिस प्रथमैकवचनान्तम् । इतेरा०' । भिस प्रथमैकवचनम् । 'इतेर ०' ॥ इदम् अदस्शब्दसम्बन्धी यो भिस् स भिस एव भवति । तत्र भिसो भिस्करणं 'एभ्यः' इति सूत्रेण ऐकारनिषेधार्थम् । तदेवाह—न मकारस्याकार इति ॥ 'इ हिम बहुत्वे ॥ एवं कत्वस्वत्वसहितयोर्न । तेन इमकैः अमुकैः । एव चतुर्थीपञ्चमीबहुत्वेऽपि । चतुर्थ्येकवचने 'सर्वादेः स्मट्' 'एभ्य' 'ए ऐ ऐ' । पञ्चम्येकवचने । 'ङसिरत्' 'अत एभ्य' 'सवर्णे दीर्घः०' ॥ षष्ठ्येकवचने— ङस्स्य 'एभ्य' । षष्ठीसप्तम्योर्द्विवचने । 'अम द्वौ भो' 'ओसि 'ए अय 'स्वरहीनं ॥ आमि 'सुनाम 'एभ्य' 'ए हिम बहुत्वे' किलात्वः स०' ॥ 'स्वरहीनं०' ॥ सप्तम्येकवचने । ङि स्मिन्' एभ्य' 'एहिम बहुत्वे' किलात्वः स०' । त्यदादित्वात्सम्बोधनाभावः ॥ 'इदम प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्' ११–१२

(प्र) भिस् भिसो भिस्भवनं कार्यान्तरार्थमुच्यते भिस्भिप्रेत्योक्त न मकारस्याकार इति । इदमदसोरककारयोरेव । अकचि तु इमकैः । अमुकैरित्यादि ॥ ११ ॥

किम् शब्दस्य भेदः । किंशब्दस्य 'त्यदादेष्टेः स्यादौ' इति सर्वत्राकारे कृते सर्वशब्दवद्रूपं ज्ञेयम् ॥ कः कौ के । कम् कौ कान् । केन काभ्याम् कैः । कस्मै काभ्याम् केभ्यः । कस्मात् काभ्याम् केभ्यः । कस्य कयोः केषाम् । कस्मिन् कयोः केषु ॥

(च) किम्शब्दस्य त्यदादेष्टेः स्यादौ इत्यादिना अकारे कृते सर्वशब्दवत् क्रिया ॥ त्यदादित्वात्सम्बोधनाभावः ॥ इत्यादयो मान्ताः शब्दा ज्ञेयाः ॥ ञ्ञान्ता अप्रसिद्धाः ॥

धकारान्तस्तत्त्वबुध् शब्दः । तस्य रसे पदान्ते च । 'आदिजबानां झभान्तस्य झभाः स्वौ' 'हसेपः सेर्लोपः' 'वाऽवसाने' तत्त्वभुत् तत्त्वभुद् तत्त्वबुधौ तत्त्वबुधः । हे तत्त्वभुत् हे तत्त्वभुद् हे तत्त्वबुधौ हे तत्त्वबुधः । तत्त्वबुधम् तत्त्वबुधौ तत्त्वबुधः । तत्त्वबुधा तत्त्वभुद्भ्याम् तत्त्वभुद्भिः । इत्यादि ॥

(च) धकारान्तस्तत्त्वबुध् शब्दः । तस्य रसे पदान्ते च 'आदिजबानां०' इत्यनेन बकारस्य भकारः । सौ धौ च लिङ्के कृते वाऽवसाने' इति धकारस्य दकारतकारौ । स्वरादौ । स्वरहीनं०' । भकारादौ 'हबे जबाः । 'स्वरहीनं०' । सुपि—'खसे चपा झसानाम् चस्य तः 'स्वरहीनं०' । एवं सर्वविधः ॥

शकारान्तः सम्राज्शब्दः ॥ छशषराजादेः षः ॥ छकारान्तस्य शकारान्तस्य षकारान्तस्य च राजयजसृजभ्रस्जभ्राजादेश्च षकारो भवति धातोर्झसे परे, नाम्नश्च रसे पदान्ते च ॥ षस्य षत्व डत्वनिषेधार्थम् । तेन आद्याद्यावौ तु डत्वं नास्ति–द्विष्यादौ ॥१३॥ षो डः ॥ ष ड । षकारस्य डत्व

भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च । वावसाने ॥३४॥ मो राजि समः क्वौ ॥ क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ॥ तेनानुस्वाराभाव । सम्राट्-सम्राड् । सम्राजौ । सम्राज । हेसम्राट्-हेसम्राड्-हेसम्राजौ हेसम्राज । सम्राजम् । सम्राजौ । सम्राज । सम्राजा । सम्राड्भ्याम् । सम्राड्भि एव विराजादय (क) ॥ ३५ ॥

(च०) अथ जान्ताः । तत्र जकारान्त सम्राजशब्दः । तस्य स्वरादौ 'स्वरहीनं०' रसे पदान्ते च विशेष । सूत्रम्—'छशषराजादे षः' ॥ छश्च शश्च षश्च राजाश्च छशषराजास्तस्य । षष्ठ्येकवचनान्तम् । 'ति' इत्यस्य 'स्रोर्वि०' । ष ॥ प्रथमैकवचनान्तम् । 'स्रोर्वि०' सिद्धम् । छकारान्तस्य तत्त्वप्राच्छादेः, शकारान्तस्य विशादेः, षकारान्तस्य द्विष् षष् इत्यादेः तथा राज्यन्तस्यसृज्भ्राजादेश्च षकारो भवति ॥ 'षष्ठीनिर्दिष्टस्य' इत्यन्त्यस्य । धातोर्झसे परे नाम्नश्च रसे पदान्ते च । उभयोरान्तिशब्दात् भ्रस्जसृजादीनां ग्रहणं षकारस्य षत्वकारण डत्वनिषेधार्थ तदपि द्वेष्टि इत्यादावेव, न तु सर्वत्र । यथा द्विषधातोस्त्यादौ द्वेष्टीत्यादिरूपम् ॥ षग्रहणं व्यर्थमिति केचित् । प्रयोगदर्शनाभावात् । षत्तु षस्य षत्व डत्वनिषेधार्थमिति तदपि व्यर्थम् । द्विट् द्विषौ द्विषः अद्वेट् इत्यादौ षस्य षत्वेऽपि डत्वस्य दर्शनात् । तथा द्वेष्टीत्यादावपि षस्य षत्व न, किं तु केवलं 'ष्टुभिः ष्टु' । अनेन रसे पदान्ते च जस्य षः । ततः सूत्रम्—'षो डः' ष षष्ठ्येकवचनान्तम् । 'स्वरहीनं०' 'स्रोर्वि०' । ड प्रथमैकवचनान्तम् । 'स्रोर्वि०' सिद्धम् । षकारस्य डकारो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ केचित्तु 'वावसाने' इत्यनेनैव षकारस्य 'ऋटुरषा मूर्धन्याः' इति स्थानसवर्णौ मूर्धन्यौ टकारडकारौ स्यातामिति । तथा भ्यां भिस इत्यादावपि 'झबे जबाः' अनेन डत्वं स्यात् । अतः 'षो डः' इति सूत्रं व्यर्थमिति वदन्ति । तच्चिन्त्यम् । अनेन सौ घौ च 'हसेपः से०' इति सिलोपे कृते षस्य ड । 'वावसाने' इति डस्य वा ट । समो मस्य राट्शब्दे परेऽनुस्वाराभावो वक्तव्य इति केचित् । सम्राट्-सम्राड् । मकारान्तौ षस्य डत्वे कृते 'स्वरहीनं०' ॥ सुपि—डत्वे कृते 'खसेपा झसानाम्' 'स्वरहीनं०' सम्राट्सु ॥ क्वचित् हसादौ विभक्तौ पदान्तत्वाभावयोः इति 'टोरन्त्यात्' इति ष्टुत्वाभाव । शेष कण्ठ्यम् । एव विराजादयः ॥ इति जान्ताः ।

(क) युजश्वमधे ॥ युजे युटि युम् स्यादसमासे । क्विन्नत्यस्य कु ॥ क्विन्नन्तस्य धातो कवर्गान्तादेशः स्यादसमासे झले पदान्ते च । धस्वशाब्दे मयधान्तस्य प्रहणम् । युङ् । अनुस्वारपरसवर्णौ । युञ्जौ युञ्ज । युञ्जम् युञ्जौ युज । युजा युग्भ्याम् युग्भि । युजे युग्भ्याम् युग्भ्य । 'चो कुः' 'पदे च' वा 'क्विन्' कवपरो च युक् । हेयुङ् हेयुञ्जौ हेयुञ्ज । इत्यादि ॥ असमासे किम् । अश्वयुक्-अश्वयुग अश्वयुजौ अश्वयुजः । अश्वयुजम् अश्वयुजौ अश्वयुजः । अश्वयुजा अश्वयुग्भ्याम् अश्वयुग्भिः इत्यादि ॥ न परस्मैपदस्य युजेर्नुम् । युङ् समाधिमानत्वात् ॥ रकारान्तो विराट्शब्द । विराट्-विराड् विराजौ विराज । विराजम् विराजौ ॥ षट् षड् ॥ षट्शब्दस्य षडादेश स्वराद्यादौ स्वरे परे न क्विते ईर्षि ईर्ष्य च ॥ विरट् । विराजा विराड्भ्याम् विराड्भि । विराजे विराड्भ्याम् विराड्भ्य । इत्यादि ॥ हेविराट्-हेविराड् हेविराजौ हेविराजः ॥ इत्यधिक पाठः ।

एवं परिव्राट् परिव्राजौ परिव्राजः । [तत्वट् तत्वक्षौ तत्वक्षः ।] पयोमुट् पयोमुचौ पयोमुचः । इत्यादि ॥ अन्येऽपि भूभृद्-बलिभुक्-हुतभुक्-वणिग्-भिषग्-मधुलिट् प्रभृतयो हान्ताः । तत्र 'चोः कुः' ॥ ऋत्विक् ऋत्विग् । [illegible] इति कत्वम् । ऋत्विग् ऋत्विक् वा ऋत्विजौ ऋत्विजः ॥ हान्ता अपसिद्धाः ॥ ११-१४-११ ॥

(प्र०) इत्यादेति । आदिशब्दात् [illegible] ग्रहणम् । अत्र केचित् । [illegible] । [illegible] हस्वनिषेधार्थमित्युक्तम् [illegible] इत्यादौ [illegible] । न च [illegible] इत्यादौ हस्वाभावार्थं हस्वविधायकस्य [illegible] इत्यस्यापि वैयर्थ्यात् । पर [illegible] इत्यादौ पावमाने [illegible] सने [illegible] नामित्यादिभि सिद्धेः । यद्यपि यथासङ्ख्यत्वं नास्ति तथापि [illegible] मूर्द्धन्यादिस्था नादिसाम्यात्स्थानेऽन्तरतम इति न्यायेन वस्थाने [illegible] । न च [illegible] चकारस्य [illegible] इत्यस्य निर्विषयत्वप्रसङ्गात् [illegible] इत्यस्य सार्थकत्वमिति वाच्यम् । [illegible] चकारस्यैव [illegible] इति [illegible] निर्देशात् । सङ्ख्यासमत्वेन चकार स्यैव [illegible] धातोरुसे इति [illegible] । [illegible] इत्यादौ [illegible] परेऽस्य नात् । अत एव पाणिनिनाऽपि [illegible] इत्याहुः तदन्य । [illegible] यथासङ्ख्य [illegible] । तत्र [illegible] । तत्र च [illegible] विकल्पेन यथासङ्ख्य [illegible] । [illegible] सवर्णे इति सवर्णत्वविधायकस्य [illegible] । प्रत्युत [illegible] सवर्णं इति [illegible] । स्थानेऽन्तरतम इत्याश्रयणे [illegible] इत्यादि [illegible] । [illegible] इत्यादौ [illegible] मिति च प्रसङ्गात् । [illegible] चकारस्य [illegible] प्रसङ्गात् । [illegible] नैमित्तिकस्य [illegible] निवृत्तत्वात् । [illegible] धातोरिति इति [illegible] हस्वनिषेधार्थमिति तु [illegible] दिक् । [illegible] इत्यादावपि न । [illegible] इत्यादिति हस्व निषेधः ॥ ११-१४-११ ॥

दकारान्तास्त्यद्तद्यद्एतद्शब्दाः ॥ एतेषां 'त्यदादेष्टे' इत्यकारे कृते सर्वशब्दवद्रूपनयः ॥ तः ॥ सू त । त्यदादेस्तकारस्य सत्वं भवति सौ परे(क) ॥ स्य त्यौ त्ये । त्यम् त्यौ त्यान् । त्येन त्याभ्याम् त्यैः । त्यस्मै त्याभ्याम् त्येभ्यः । त्यस्मात् त्याभ्याम् त्येभ्यः । त्यस्य त्ययोः त्येषाम् । त्य

(क) [illegible] इति । [illegible] इति एव [illegible] । [illegible] [illegible] तथा च "त्यदादेष्टेरिति [illegible]" इति [illegible] इति [illegible] इति च [illegible] [illegible] — [illegible] । [illegible] किम् । [illegible] इति किम् । [illegible] । [illegible] किम् । [illegible] । [illegible] । [illegible] । [illegible] अत एव । [illegible] च ।

स्मिन् त्ययोः त्येषु ॥ स तौ ते । तम् तौ तान् । तेन ताभ्याम् तैः । तस्मै इत्यादि ॥ य यौ ये । यम् यौ यान् । येन याभ्यां यैः । यस्मै । इत्यादि ॥ एषः एतौ एते ॥ ३६ ॥

(च०) [illegible] 'त्यदादीनां' [illegible] इत्यकारे कृते सर्वत्र [illegible] । सौ तु विशेषः । सूत्रम्—'तदः से' [illegible] । 'इतोऽत्' । [illegible] 'त्यदादीनां०' [illegible] त्यदादिष्वकारादि [illegible] । अनेन सौ [illegible] । स्य त्यौ त्ये । [illegible] ॥ [illegible] ॥ [illegible] 'विसर्गस्य [illegible]' 'छ' [illegible] । एषः एतौ एते ॥ ३६ ॥

(प्र०) एत इति । [illegible] पुनः [illegible] [illegible] ॥ ३६ ॥

एतदोऽन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः ॥ उक्तस्य पुनरुच्चारणमन्वादेशः । एतं एनम् एतौ-एनौ एतान्-एनान् । एतेन-एनेन एताभ्याम् एतैः । एतस्मै एताभ्याम् एतेभ्यः । एतस्मात् एताभ्याम् एतेभ्यः । एतस्य एतयोः-एनयोः एतेषाम् । एतस्मिन् एतयोः-एनयोः एतेषु ॥ एतेन व्याकरणमधीतमेनं छन्दोऽध्यापय ॥

(च०) द्वितीयायां टौसोश्च विषयः । एतद् इति । एतच्छब्दस्य [illegible] सति । उक्तस्य पुनः कथनमन्वादेश उच्यते । यथा एष राजा याति एनं पश्येत्यन्वादेशः । तस्मिंश्च वक्ष्यमाणे द्वितीयाटौस्सु द्वितीयायां वचनत्रये टा इति तृतीयैकवचने ओसि षष्ठीसप्तमीद्विवचने वा विकल्पेन एन आदेशः तकारस्य वा नकार इत्यर्थः । अनेनोक्तवचनेषु वा एनादेशः । एतम् । एनम् एतौ एनौ एतान् एनान् । एतेन एनेन एतयोः एनयोः ॥ शेषं पूर्ववत् ॥ इति दान्ताः ॥ अन्येऽपि [illegible] हलन्ता अप्रसिद्धाः ॥

(प्र०) एतद् इति । समनन्तरस्येदमोऽप्युपलक्षणात्तस्यापि किंचित्क्रियाविशिष्टत्वेनोक्तस्य पुनस्तेनान्येन वा क्रियान्तरविशिष्टत्वेनाभिधानमन्वादेश इत्यर्थः । अत एव "इदमर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्यात्" इत्यादौ स्वरूपमात्रनिर्देशे [illegible] इत्याप्यतः क्रियाविशिष्टत्वेनोक्तत्वाभावादन्वादेशत्वाभावः । न सके द्वितीयैकवचने [illegible] इति योगविभागान्म [illegible] पुनरित्यादि सिद्धिः । इमं छात्रं छन्दोऽध्यापय । अतो एनं व्याकरणमध्यापय । अनेन रात्रिरधीता । अत एनेनाहरप्यधीतम् । अनयोः शोभनं कुलमनयोः एनयोः प्रभूतं स्वमित्याद्युदाहरणम् । एवमेतेऽपि [illegible] इति मकारान्तत्वादिति सवर्णत्वादित्यर्थः । यथासङ्ख्येन तु मकारः प्राप्नुयात् ॥

छकारान्तस्तत्त्वप्राछ्शब्दः 'छशषराजादे ष' 'वावसाने' तत्त्वप्राट् तत्त्वप्राड् तत्त्वप्राछौ तत्त्वप्राछ । तत्त्वप्राछम् तत्त्वप्राछौ तत्त्वप्राछ । तत्त्वप्राछा । 'छशषराजादे ष' 'वे, ड' तत्त्वप्राड्भ्याम् । तत्त्वप्राड्भिः । तत्त्वप्राछे तत्त्वप्राड्भ्याम् । तत्त्वप्राड्भ्य । तत्त्वप्राछ तत्त्वप्राड्भ्याम् तत्त्वप्राड्भ्य । तत्त्वप्राछ तत्त्वप्राच्छो तत्त्वप्राछाम् । तत्त्वप्राछि तत्त्वप्राछो तत्त्वप्राट्सु ॥

(च०) छकारान्तस्तत्त्वप्राछ्शब्दः [illegible] 'च्छ्वोः शूडनुनासिके च' इति [illegible] विधाय छकारान्तस्तत्त्वप्राश् शब्द इत्युक्तमन्वि । तस्य रसे पदान्ते च संयोगान्तस्य लोपः इत्येकस्य छकारस्य लोपे विधाय तत्र 'छशषराजादेः षः' इति षत्वे कृते । [illegible] 'वावसाने' [illegible] । [illegible] ॥ [illegible] ॥

थकारान्तोऽभिमथ्शब्दः । 'वावसाने' अभिमत् अभिमद् अभिमथौ अभिमथ । हेअभिमत् हेअभिमद् हेअभिमथौ हेअभिमथ ॥ अभिमथम् अभिमथौ अभिमथ । अभिमथा अभिमद्भ्याम् अभिमद्भिः । इत्यादि ॥

(च०) थकारान्तोऽभिमथशब्दस्तस्य सौ औ च सिद्धेऽपि कृते 'वावसाने' इति [illegible] वर्णेन सवर्णः' इति वचनात् थकारस्य वा तकारदकारौ । थकारादौ 'स्वरे यथा [illegible]' । 'स्वरादौ०' इति—'स्वरे यथा हलसाधाद् [illegible] 'स्वरहीनं । स्वरादौ 'स्वरहीन०' ॥ एव [illegible] ॥

चकारान्तः प्रत्यच्शब्दः ॥ अञ्चेः पञ्चसु नुमागमो वक्तव्यः ॥ चोः कुः ॥ चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च यथासङ्ख्येन ॥ 'रसो हसुमि हसु' 'संयोगान्तस्य लोप' प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्च । हेप्रत्यङ् हेप्रत्यञ्चौ हेप्रत्यञ्च । प्रत्यञ्चम् प्रत्यञ्चौ ॥ १७[1]॥

(च०) चकारान्तः प्रत्यच्शब्दः । अञ्चु गतिपूजनयोः । अञ्च् प्रतिपूर्वं क्विप् प्रत्ययः ['प्रतिपूर्वस्यापूजार्थस्याञ्चनेर्क्विपा वक्तव्य (क) । यद्वा] 'वेर्लोप' । [illegible] क्विपः सर्वापहारी लोप । प्रत्यच् इति सिद्धम् । तस्य पञ्च विधाय । अञ्चेः पञ्चसु नुमागमो वक्तव्यः' । अञ्च् गतिपूजनयोरित्यस्य धातोः स्यादिषु पञ्चसु नुमागमो वक्तव्यः । 'मित्स्वरात्' [illegible] । [illegible] । पञ्चसु [illegible] स्, औ, च प्रत्यन्च इति स्थिते । 'रसो हसुमि हसु' इति [illegible] । [illegible] इति लोप । 'संयोगान्तस्य' इति लोप ॥ सूत्रम्—'चोः कुः' चादिति [illegible] । [illegible] इत्यलोप । [illegible] । कु [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ॥ [illegible] इति [illegible] । [illegible] 'संयोगान्तस्य' इति [illegible]

१ [illegible]

हसान्ते प्रायः प्राचा ॥ तिर्यञ् उदञ् शब्दयोः पञ्चमु प्रत्यञ्शब्दवत् ॥ ३८ ॥

(प्र०) प्रत्यञ्चेरिति । ईतीति सूत्रानुवृत्तेरीति ईकारे चेत्युक्तम् । चकाराद्यानुवृत्तमनु वर्त्यार्थतद्धिते इति । चेत्ययोरित्यतो वानुवृत्तेरस्तस्य च व्यवस्थया पूजार्थस्यासतेः अचे रिति लुप्तनकारनिर्देशे तु पूजार्थस्य नलोपाभावादेव न । अकारस्य लुप्तवाक्याकारस्य चाधत्वेति नियमादार्थोत्कमवाद्विधानसामर्थ्यात्पूर्वस्येति । स चान्यत्रहित एव ग्राह्यः । तत्र प्रतीच इत्यत्र च इत्यत्याकारस्याप्रसङ्गः । तद्धिते । प्रतीचीन प्रतीच्य । ईति । प्रतीची दिक् । ईकारे । ईकारे । प्रतीची दृष्टे । पञ्चस्विति निर्देशेन पञ्चस्वपि तस्यो तु सर्वे रेवेति भ्रतु सके तुसमाव "पूजार्थस्य" तु पञ्चत्वविशेष । समासे प्रत्यञ्च । प्रत्यञ्च स्यात् स्थिते अचोलोपादेशेऽपि बुत्व च प्रत्यञ्च्यामित्यादि । प्रति ङ्योः तुङ्ग गिति तुकि वाक्ये ज्ञात्वेध्ये च प्रत्यञ्च ॥ ३८ ॥

तिरश्चादयः ॥ तिरश्चादयः शब्दा निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ ३९ ॥ तिरश्च । तिरश्चा तिर्यग्भ्याम् तिर्यक्षु । तिर्यक्षु । हेतिर्यङ् हेतिर्यञ्चौ हेतिर्यञ्च (क) ॥ उदीच । उदीचा उदग्भ्याम् उदक्षु । उदक्षु । हेउदङ् हेउदञ्चौ हेउदञ्च ॥ एव सम्यच्शब्द । सम्यङ् सम्यञ्चौ सम्यञ्च । सम्यञ्चम् सम्यञ्चौ समीच । समीचा इत्यादि ॥ सध्र्यङ् सध्र्य ञ्चौ सध्र्यञ्चः । हेसध्र्यङ् हेसध्र्यञ्चौ हेसध्र्यञ्च ॥ सध्र्यञ्चम् सध्र्यञ्चौ सध्रीचः । सध्रीचा सध्र्यग्भ्यामित्यादि ॥

(च०) शसादौ तु विशेष । सूत्रम्—तिरश्चादयः' तिरश्च आदिर्येषां ते तिरश्चादयः प्रथमाबहुवचनान्तम् । प को अति' 'प अम्' 'स्वरहीर्न०' 'ङोर्ई०' ॥ तिरश्चादय इति । तिर्यञ्च उदञ्च सध्र्यञ्च सम्यञ्च शब्दानां यथाक्रमं तिरश्च् उदीच् सध्रीच् समीच् इत्यादेशा निपा त्यन्त शसादौ स्वरे परे तद्धित प्रत्यये ईपि ईकारे च । तद्धिते यथा तिरश्चीनः । ईपि तिरश्ची । ईकारे तिरश्ची तिर्यञ्चि । अत्र अनेन शसादौ स्वरे परे । तिर्यञ्च शब्दस्य तिरश्च् उदञ्च शब्दस्य उदीच् । 'स्वरहीन०' मकारा ते । 'चोः कु' 'झबे जबाः । इति च 'चः कु' । 'विरामेवा स' इति प्रत्ययव । इत्यादयः प्रान्ताः ॥ हसान्ता अपसिद्धा ॥३९॥

(प्र०) तिरश्चादय इति । आदिशब्दात् अदुम् अयङेति विशेष्यत्वतो परेऽदम देशादेशे अदद्र्यङ् । अदद्र्यञ्चौ । अदद्र्यञ्चः । अम्नुईच—अमुमुईच—अम्नीचः इत्या दयः प्रयोगानुसारतो ज्ञेयाः ॥ ३९ ॥

(क) [illegible] देत्युच्छौ [illegible] ॥ अथवा [illegible] इत्यादेशा [illegible] परे ॥ [illegible] अदसोऽद्यादेशः ॥ [illegible] ॥ [illegible] अदमुयङ् अमुयङ् अमुमुयङ् अदयङ् ॥ [illegible] पूर्वत । [illegible] ॥ [illegible] ॥ [illegible] ।

तिङस्यान्त्यस्यानाम" इति नुमर्थंकारस्य नकार एव। तत्र 'चोः कुः' इत्यपि न भवति किन्तु प्रत्यङ् इति सिद्ध्यति ॥ द्विवचनादौ तु नुमागमे कृते "स्यादावसंख्ये" "हसेहसे०" । प्रत्यञ्चौ प्रत्यञ्चः । यद्वा प्रत्यञ्चौ, प्रत्यञ्चः । प्रत्यञ्चम्, प्रत्यञ्चौ ॥ ३७ ॥

(प्र०) अञ्चेरिति । अञ्चुगतिपूजनयोरित्यस्य नो लोप इत्यनेनैव अन्त्यवर्णतायामत नकोर लोपः कुतिश्चीयते । यदपि तत्स्थानप्रत्यासत्त्या इत्यनुस्वारः प्राप्नोति तथापि पर त्वेऽकारविरहादुर्वतिरितेरन अनुस्वारो वा पारकस्य विशेषाभावाच्च नो अनुमिः अनुस्वारादिः । यत्तु कृताकृतप्रसङ्गित्वेन नित्यत्वात्पदान्तत्वेन कुत्वाभावाङ्कुरत्व सङ्गः । कृते वा नुम स्तोपाभ्यामेन निमित्ताभावत्वेन तदभावात्कुत्वमप्युभयत्र । त- स्मादिकारामिति बहुवचनेन बहूनामुगरानाम्प्यापि तत्रैव कुत्वमिति । तदन्तम् । प्रत्यां- विम्या नौ निमित्ताभावस्याप्यनिमित्तत्वविरहात् । सामिप्यादावपि न्यायामित्यनेनैव कुत्वमप्यत्र चोः कुरित्यस्यानर्थक्यतापात । अपिदं वहिरङ्गमन्तरङ्गे इति वहिरङ्गपरिभा स्वाश्रोपत्वोत्तरत्वात् कुत्व सिद्धत्वाच्च ॥ ३७ ॥

अञ्चेरलोपो दीर्घश्च ॥ अञ्चेरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धिते प्रत्यये ईपि ईकारे च ॥ प्रतीचः । निमित्ताभावे नैमित्तिकस्याप्यभावः । प्रतीचा । 'चो कुः' प्रत्यग्भ्याम् प्रत्यग्भिः । प्रतीचे प्रत्यग्भ्याम् प्रत्यग्भ्यः । प्रत्यक्षु(क) ॥ एवं तिर्यञ्च्शब्दः । तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । तिर्यञ्चम् तिर्यञ्चौ ॥ ३८ ॥

(च०) शसादौ स्वरादौ तु विशेष ॥ सूत्रम्— अञ्चेरलोपो दीर्घश्च अञ्चेरिति अ ञ्चिशब्दस्य षष्ठ्येकवचनान्तम् । इति 'हस्य' इत्यकारः । 'लोपि ०' । अस्य अकारस्य लुक्(ऽ)अलुक्(ऽ)प्रथमैकवचनान्तम् । इसरः सेकारेण 'नामिनो रः' । दीर्घः प्रथमैकवचनान्तम् । 'लोपि ०' । च प्रथमैकवचनान्तम् । विपर्ययात्० 'स्तोः श्चुभिः श्चुः' ॥ अञ्चेर्घातोः शसादौ स्वरे परे, तद्धितेष्वपि प्रत्यये, ईपि प्रत्यये च, 'ईपो इति सूत्रेण कृते ईकारे च परे अकारस्य लोपो भवति । तद्धिते प्रतीचीनः प्रतीच्य । ईपि प्रतीची । ईकारे प्रत्यये प्रतीचो प्रत्यञ्चि । अत्र तु शसादौ स्वरे । अनेन प्रति अच् इति विश्लेषे कृते अकारस्य लोपः । ति इत्यस्य दीर्घः । भकारादौ 'चोः कुः' इत्य कका कृते 'झरे जबाः' कस्य गः । 'हसाद्दीर्घे०' । सर्वे— चोः कुः 'क्विप्रत्ययः सः० 'कपर्सः- योगे सः । शेषं कल्पम् ॥ पूजार्थस्य तु अञ्चेर्नकारो न । तत्र प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चम् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चा प्रत्यङ्भ्याम् प्रत्यङ्भिः । प्रत्यञ्चे इत्यादि ॥ एवं प्राङ् प्राञ्चौ प्राञ्चः । प्राञ्चं प्राञ्चौ प्राचः । प्राचा प्राग्भ्याम् प्राग्भिः ॥ समर्थस्य तु

(क) नार्थे पूजायाम् ॥ पूजार्थस्याञ्चेरकारलोपस्य नस्य लोपो न स्यात् । अनुनासिकात्वेन कुत्वं 'क्विन्प्रत्ययस्य कुः' इत्येनात्मस्य लोपः । प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चम् प्रत्यञ्चौ । नकारस्य प्रत्यकार स्यलोपः । प्रत्यञ्चः । प्रत्यञ्चा प्रत्यङ्भ्याम् प्रत्यङ्भिः । इत्यादि ॥ ङ्णो कुक् टुक् वा शरि प्रत्यङ्क्षु प्रत्यङ्षु ॥ इत्यादिकास्त्रे कुत्वमुक्तम् ।

[illegible] प्राचः प्राचा ॥ तिर्यञ्च इत्यत्र [illegible] ॥ १८ ॥

(प्र०) [illegible] । ईपीति [illegible] ईकारे [illegible] । [illegible] तद्धिते इति । [illegible] पूजार्थस्याञ्चेः [illegible] पूजार्थस्य [illegible] । [illegible] [illegible] । स चात्र तद्धित एव ग्राह्यः । [illegible] । तद्धिते । प्रतीचीनः प्रतीच्यः । ईपि । प्रतीची दिक् । ईकारे । ईकारे । प्रतीचो [illegible] । [illegible] "पूजार्थस्य" तु [illegible] । [illegible] प्रत्यञ्च [illegible] प्रत्यङ्भ्यामित्यादि । [illegible] ॥ १८ ॥

तिरश्चादयः ॥ तिरश्चादय शब्दा निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ ३९ ॥ तिरश्च । तिरश्चा तिर्यग्भ्याम् तिर्यग्भि । तिर्यक्षु । हेतियङ् हेतिर्यञ्चौ हेतियञ्च (क) ॥ उदीच । उदीचा उदग्भ्याम् उदग्भि । उदक्षु । हेउदङ् हेउदञ्चौ हेउदञ्च ॥ एव सम्यच्शब्द । सम्यङ् सम्यञ्चौ सम्यञ्च । सम्यञ्चम् सम्यञ्चौ समीच । समीचा इत्यादि ॥ सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्चः । हेसध्र्यङ् हेसध्र्यञ्चौ हेसध्र्यञ्च ॥ सध्र्यञ्चम् सध्र्यञ्चौ सध्रीच । सध्रीचा सध्र्यग्भ्यामित्यादि ॥

(च) शसादौ तु विशेषः । सूत्रम्—तिरश्चादयः' तिरश्च आदिर्येषां ते तिरश्चादयः प्रथमाबहुवचनान्तम् । [illegible] 'स्वरादौ०' 'ईकारे०' ॥ तिरश्चादय इति । तिर्यञ्च्उदञ्च्सध्र्यञ्च्सम्यञ्च् शब्दानां यथाक्रमं तिरश्च् उदीच् सध्रीच् समीच् इत्यादेशा निपात्यन्त शसादौ स्वरे परे तद्धित प्रत्यये ईपि ईकारे च । तद्धिते यथा तिरश्चीनः । ईपि तिरश्ची । ईकारे तिरश्चो तिर्यक्षि । [illegible] शसादौ स्वरे परे तिर्यञ्च शब्दस्य तिरश्च्, उदञ्च शब्दस्य उदीच । 'स्वरादौ०' [illegible] । 'चो: कु' इति [illegible] । [illegible] । 'क्विन्नन्तः स' इति [illegible] । [illegible] ॥ १९ ॥

(प्र०) तिरश्चादय इति । [illegible] ॥ अदमुयङ् । अदमुयञ्चौ । अदमुयञ्च । अम्मुईच—अमुमुईच—अदद्रीच इत्यादयः प्रयोगानुसारतो ज्ञेयाः ॥ १९ ॥

(क) [illegible] ॥ [illegible] ॥ [illegible] । अदमुयङ् अमुयङ् अमुमुयङ् अदद्र्यङ् ॥ [illegible] ॥ [illegible] ॥ [illegible] ईकारे च [illegible] ।

तकारान्तो मरुच्छब्दः । 'हसे पः सेर्लोपः' 'वावसाने', मरुत् मरुद् मरुतौ मरुतः । हेमरुत्-हेमरुद् हेमरुतौ हेमरुतः ॥ मरुतम् मरुतौ मरुतः । मरुता मरुद्भ्याम् मरुद्भिः । इत्यादि । एवं अग्निचित्प्रभृतयः । अग्निचित् अग्निचिद् अग्निचितौ अग्निचितः । हेअग्निचित् हेअग्निचिद् हेअग्निचितौ हेअग्निचितः ॥

(च०) तकारान्तो मरुत् शब्दस्तस्य सौ धौ च सिलोपे कृते 'वावसाने' तकारस्य वा दकारः । भकारादौ 'झबे जबाः' तस्य दः 'स्वरहीन०' । स्वरान्ते धवि च 'स्वरहीनं०' ॥ एवमग्निचित्प्रभृतयोऽपि साध्याः । अग्निं चिनोति इन्धनैर्वर्धयतीति अग्निचित् ॥

तकारान्त उ (ऋ)कारानुबन्धो महच्छब्दः ॥ ञितो नुम् ॥ उश्च ऋश्च ञ् । ञ् इत् यस्य सः ञित् तस्य ञितः नुम् । उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति धुसि पञ्चसु परेषु [शौ च] ॥ ४० ॥

(च०) तकारान्त उ (ऋ)कारानुबन्धो महच्छब्दस्तस्य पञ्चसु विशेषः । मह पूजायाम्' । 'द्युहिमहिवृषिभ्यः कत्' । धुस्य किन् अनुप्रत्ययो भवति । ऋकार इत् । उकारानुबन्धित्वं तु चिन्त्यम् । महत इति महत् । कार्यार्थमुच्चरितस्य वर्णस्यानुबन्ध इति संज्ञा । यद्वा वचनविशिष्टत्वसिद्धा अनुबन्धाः । सूत्रम्— ञितो नुम्' ॥ उश्च ऋश्च ञ् ञ् इत् यस्य स ञित् तस्य ञितः षष्ठ्येकवचनान्तम् । 'स्वरहीन०' 'धोर्वि०' । नुम् प्रथमैकवचनान्तम् । 'हसेप०' 'इये' 'इ आ' सिद्धम् । उकारानुबन्धस्य धनुःप्रत्ययादेः, ऋकारानुबन्धस्य च अतृप्रत्ययादेः नुमागमो भवति धुसि धुडिति पञ्चसु वचनेषु परेषु । शौ चेति नपुंसक जस्शसोः स्थाने जात शौ च परे । अनेन पञ्चसु स्यादिषु तकारात्पूर्वं न् ॥ ४० ॥

(प्र०) ञित इति । उश्च ऋश्च ञ् ञ् इत् यस्य स ञित् तस्येत्यभिप्रेत्याह—उकारानुबन्धस्येत्यादि । नन्वस्य नाप्युकारानुबन्धित्वादनेनैव नुम्सिद्धौ वक्तव्यं न च वक्तव्यमिति वाच्यम् । सिद्धे सत्यारम्भो नियमायेति । धातूकारानुबन्धस्यैवाग्रे स्तेति । अत एव तनोतेर्न कर्मणि इत्यादौ नुमभावः । नुमयम इत्यत्र नुमिति योगविभागाद्वेति इत्यत्र युजेरसमासे वाद्या । युजेरसमासे युङ् । युङ् । युञ्जौ इत्यादि । समासे तु अश्व युक् । अश्वयुजावित्यादि । पञ्चस्विति विषयादेशः [illegible] [illegible] नुमस्त्वनुम् । [illegible] विभक्तिविधिरिति [illegible] [illegible] [illegible] । [illegible] ॥ ४० ॥

न्सम्महतोऽधौ दीर्घः धौ च ॥ न्सन्तस्याप्युकारस्य महच्छब्दस्य च दीर्घो भवति पञ्चसु परेषु विसर्जितेषु धौ च परे(क) ॥ 'संयोगा

(क) [illegible]

न्तस्य लोप.' महान् । 'नश्चापदान्ते झसे' महान्तौ महान्तः । हेमहन् हेम हान्तौ हेमहान्त । महान्तम् महान्तौ महत । महता महद्भ्याम् महद्भिः । महते महद्भ्याम् महद्भ्य । इत्यादि ॥ ४१ ॥

(च०) सूत्रम्—'स्सम्महतोऽपो दीर्घः सौ च' । स्स च अप् च महच्च स्सम्महत् तस्य षष्ठ्येकवचनान्तम् । 'स्वरादीर्घ०' 'घोषि ०' स्सम् अप महत् । 'समे ममा वा' पस्य मः । 'स्वरादीर्घ०' । न धिः अधिस्तस्मिन् अधौ सप्तम्येकवचनान्तम् । 'हेरो हिन् टिलोपः । स्वरादीर्घ०' 'अतोऽप्सु' 'अ ओ' परोऽस्तोऽतः' । दीर्घः प्रथमैकवचनान्तम् । 'घोषि ०' । 'सौ' इति सिशब्दस्य सप्तम्येकवचनान्तम् । 'हेरो हिन्' टिलोपः । च प्रथमैकवचनान्तम् । 'अम्यया० ॥ स्सेतस्येति । उदिन्महच्छब्दं विहाय नुमागमसहित सकारान्तस्य तथा अप्शब्दस्य अकरान्तिनो नित्यं बहुवचनान्तस्य तथा महच्छब्दस्य ऋकारानुबन्धस्य पुंसि पञ्चसु वचनेषु धिवर्जितेषु नपुंसके धौ च दीर्घो भवति ह्रस्वदीर्घ प्लुत विधायमानाः स्वरस्थान भवन्तीति स्सादीनां व्यञ्जनसंनिहितस्य स्वरस्य दीर्घो भ वतीत्यर्थः ॥ अप्शब्दः बहुत्व एव । तत्र असमासान्तस्य असि दीर्घो नान्यत्र । समासान्तस्य पञ्चस्वेव इयं विवक्षा । यथा शोभना आपो यत्र स स्वाप देशः स्वाप स्वापौ स्वापः । स्वापं स्वापौ इति । नपुंसके तौ स्वापि स्वांसि इति ॥ अनेन धिव र्जितेषु पञ्चसु दीर्घः । धौ तु नुमागम एव न दीर्घः । 'हसेपः०' 'संयोगान्तस्य०' इति सौ धौ च तकारस्य लोपः । शेषेषु—'नश्चापदान्ते झसे' 'स्वरादीर्घ०' । मकारादौ—हसे जबाः 'स्वरहीनं ॥ शेषं सुगमम् ॥ ४१ ॥

(प्र) स्सम्महत इति । स्स् च अप् च महत् च तेषां समाहारः स्सम्महत् तस्य अत्र कारोपाः शानुरित्वना धानुरूपेः महच्छब्दस्माहवर्णश्च 'अस विभाजने' इत्यस्य क्विपि अन् न सावित्यतो । स्सन्तस्येऽपि न ॥ ४१ ॥

तकारान्त उकारानुबन्धो भवच्छब्द ॥ अत्वसो सौ ॥ अत्वसो सौ इति धातोर्नेष्यते । अत्वन्तस्यासन्तस्य(क) च दीर्घो भवति धिवर्जिते सौ परे । 'संयोगान्तस्य' 'हसेप' । भवान् भवन्तौ भवन्त । हेमवन् हेम वन्तौ हेमवन्त । भवन्तम् भवन्तौ भवत । भवता भवद्भ्याम् भवद्भिः । भवते भवद्भ्याम् भवद्भ्य । भवत भवद्भ्याम् भवद्भ्यः । भवत भवतोः भवताम् । भवति भवतो भवत्सु ॥ आकारानुबन्धस्य भवतुशब्दस्य नुमागम एव । अत्वन्तत्वाभावात्र दीर्घ । भवन् भवन्तौ भवन्त । हेमवन् हेमवन्तौ हेमवन्त । भवन्तम् भवन्तौ भवत । भवता भवद्भ्याम् भवद्भिः ।

(क) अत्वन्तस्यान्यप्रत्ययान्तस्येति केष्यम् । तेन पिण्डं मवती ते पिण्डम पिण्डमवौ पिण्डमव । पिण्डमवम् पिण्डमवौ पिण्डमव । इत्यादि सिध्यति ॥

भवत्सु । इत्यादि ॥ एवं पचत्शब्दः । पचन् पचन्तौ पचन्तः । हेपचन् हेपचन्तौ हेपचन्तः । पचन्तम् पचन्तौ पचतः । पचत्सु । (क)इत्यादि ॥४१॥

(च०) भा भासौ । 'भातेर्डवतु' । यतः—'भातेर्डवतुः परः । भवान् पूज्ये युष्मच्च' इति ङकारानुबन्धो भवच्छब्दः । तस्य पक्षद्व—'मितो नुम्' इति नुमागम । ततः सूत्रम्—'अत्वसोः सौ' अतुम् च असु च अत्वसौ तयोः अत्वसोः षष्ठीद्विवचनान्तम् । 'स्वरहीन०' 'धोवि०' । सौ इति निषाभ्दस्य समस्येकवचनम् । 'हे तो निः' ॥ अत्वन्तस्येति । ङकारानुबन्धस्य असन्तस्येति । नुमागमरहितस्यास्य तस्य शब्दस्य चित जित सौ परे दीर्घो भवति । अनेन सौ परे दीर्घो भवति, धौ न, 'धित्रजिते' इति विशेषणात् ॥ धौ 'हसेपः सेः' 'संयोगान्तस्य लोपः' हे भवन् अन्यत्र 'नश्चापदान्ते' स्वरादौ सति 'स्वरहीनं०' । मकारादौ 'हसे जबाः' । शेषं सुगमम् ॥ एवम् अघीवत्—यक्षीवत्—'कशावत्-शब्दाः ॥ भू 'सत्तायां तिन्तेवत् क्रियायाम्, 'अप् कर्तरि' गुण 'ओ अव्' 'स्वरहीन' 'अदे' 'स्वरहीनं०' ऋकारानुबन्धो भवच्छब्दः । भवत इत्यस्य ऋकारानुबन्धत्वात् 'मितो नुम्' इति नुमागम एव स्यात् । परम् अत्वन्तत्वाभावात् 'अत्वसोः सौ' इति दीर्घत्वं न । शेषं सुगमम् । एवं पचत् शब्दः । पचत् शब्दोऽपि रित् ऋकारानुबन्ध इत्यर्थः । एवम् अन्येऽपि शतृप्रत्ययान्ता ऋकारानुबन्धा ज्ञेया ॥ इति तान्ता ॥ रूपान्ता अप्रसिद्धाः ॥ ४१ ॥

(प्र०) अत्वसोरिति । अतुश्च असुश्च अत्वसौ तयोः अत्रापि वानुवृत्ते 'पुष्ठ यन्ते एवः पिण्डम्' इत्यादौ न नुमागम । एतस्यैव कारणेन अत्वन्तत्वाभावाच्च दीर्घ इत्यर्थः ॥

शकारान्तो विश्शब्दः । 'छशषराजादेः षः' इति षत्वम् । 'षो डः' इति डत्वम् । 'वावसाने' चपा जबाश्च । विट्-विड् विशौ विशः । हेविट् हेविड् हेविशौ हेविशः ॥ विशम् विशौ विशः । विशा विड्भ्याम् विड्भिः । विट्सु इत्यादि ॥

(च०) शकारान्तो विश् शब्दः । तस्य 'छशषराजादेः षः' इति षत्वे कृते । 'षो डः' 'वावसाने । स्वरादौ 'स्वरहीनं०' ॥ सुपि 'हसे चपाः झसाः (पा) नाम्' सम्राज् शब्दवत् । विट् विड् इत्यादीनि रूपाणि ॥ विड् मनुष्यो वैश्यश्च ॥ इत्यान्त्यः शान्ताः ॥

षकारान्तः षष्शब्दो नित्यं बहुवचनान्तस्त्रिषु सरूपः । षष् जस् इति स्थिते । 'जस्शसोर्लुक्' 'षो डः' 'वावसाने' । षट् षड् षड्भिः षड्भ्यः षड्भ्यः । 'ष्णः' इति नुट् । 'षो डः' षड् नाम् इति स्थिते ॥ डुः णः ।

(क) द्विरुक्तानां जक्षादीनां च शतुर्नुम्प्रतिषेधः पुंलिङ्गे नित्यं वक्तव्यो नपुंसके वा औ च ॥ ददत्-ददद् ददतौ ददतः । ददतम् ददतौ ददतः । ददता ददद्भ्याम् ददद्भिः । इत्यादि ॥ नपुंसके ददत्-ददद् ददती ददति ददन्ति । अत्र जक्ष् दरिद्रा जागृ दीधी वेवी चकास् एते जक्षादयः । पाठोऽयं विशेषतया पुस्तकान्तरेषूपलभ्यते ॥

सङ्ख्यासम्बन्धिनो डकारस्य णत्वं भवति नामि परे । 'ष्टुभि ष्टु' षण्णाम् । षट्सु । क्वचित्पदान्तेऽपि पदान्तताभ्युपगमनीया ॥ ४३ ॥

(च०) षकारान्तः षष् शब्दः । नित्यं बहुवचनान्तस्त्रिषु लिङ्गेषु सदृशरूपः । अ' घुटोऽनुक्' 'षोड' 'वाक्याने' । षष् षट् । षकारादौ षो द इति कृते 'स्वरहीन०' नामि—'ष्ण.' इति नुमागमः । षो द' षट् नाम् इति स्थिते सति सूत्रम्—'ष्ण' इ बहुवेकवचनान्तम् । सौत्रिकम् । ण इति प्रथमैकवचनान्तम् । 'स्रोति ०' ॥ षेष्वा० इति क्वचा । अनेन नामि परे डकारस्य णकार । 'ष्टुभि ष्टुः' 'स्वरहीन' ॥ सवि 'षा इ' 'सते चरा हसा[पा]नाम्' तत्र डकारस्य सकारयोगे 'ष्टुभि ष्टु' इति प्राप्तौ 'टोरन्त्यात्' इति सूत्रेण 'ष्टुभिः ष्टुः' इति सूत्रस्य वर्त्वनिषेधः ॥ ननु अत्र पदान्तत्वाभावात् 'टोरन्त्यात्' इति सूत्रं कथं सम्भवति अत आह—क्वचिदिति । क्वचित्प्रयोगान्तरे अपदान्तेऽपि पदान्तता आश्रयणीया वक्तव्या इति भावः ॥ ४३ ॥

(प्र०) ननु षट्सु इत्यादौ ष्टुत्वं कुतो नेत्यत आह—क्वचित्पदान्तेति । अपदान्तेऽपि पदान्तताश्रयणात् टोरन्त्यादिति ष्टुत्वनिषेधात् भवतीति भावः ॥ ४३ ॥

दोष्शब्दस्य भेदः ॥ दोषा रः ॥ दोष्सजुष्माशिष्हविष्प्रभृतीनां षकारस्य रेफो भवति रसे पदान्ते च ॥ 'हसेपः' 'सोर्विसर्गः' दोः दोषौ दोषः । हे दोः हे दोषौ हे दोषः ॥ दोषम् दोषौ ॥ ४४ ॥

(च०) दोषशब्दो भुजार्थवाचकस्तस्य भेदः । सूत्रम्— 'दोषा' दोषां षष्ठीबहुवचनान्तम् । 'स्वरहीनं०' मोऽनुस्वारः पदमिदं सूत्रम् ॥ अथवा 'दोषां रः' इति द्विपदं सूत्रम् । दोष् सजुष् आशिष् हविष् धनुष् सर्पिष् शब्दानां षकारस्य रसे पदान्ते च रेफो भवति । षकारस्य स्थाने जातस्य षकारस्येति व्याख्येयम् । अनेन रसे पदान्ते च रेफः । सौ धौ च—'हसेपः से०' 'धर्जि०' ॥ द्विवचनादौ 'स्वरहीनं०' ॥ दोः दोषौ दोषः । दोषं दोषौ ॥ ४४ ॥

(प्र०) दोषामिति । अतो रेः रासिस्थितस्तो र इत्यनुवर्तते बहुवचनं बहुत्वं दाह क्वचित्वमित्याह—दोः हुविरित्यादि । यद्यपि दाम्नशीति इमर्तीति देहिरिति ततः परत्वा त्सोर्विसर्गं इत्यनेनैव सिद्धिस्तथापि भुवो धोडौ वाचनं कुरु तत्र सह वर्तेत इति सद्भिः [illegible] वर्णरूपिकस्य विसर्गभावेत्सदर्थं क्रियमाणमेतामन्युपकारकम् अप्युरसामशाकम्य वा । यकारोच्चारणादौ रेफयुक्तिकस्य सदे वैकल्पेन पक्षे रेफोपपत्तयः स्यादिति वा वाच्यम् । [illegible] वा [illegible] वा [illegible] अकारोपादानं च्यामित्यादौ दो च यद्दे अवस्थानं ॥ ४४ ॥

[हसादावसन्तता वा वक्तव्या ।] दोष दोष्ण । दोषा-दोष्णा दोर्भ्यां-दोषभ्याम् दोर्भिः-दोषभिः । दोषे-दोष्णे दोर्भ्यां-दोषभ्याम् दोर्भ्यः-दोषभ्यः । दोष दोष्ण दोर्भ्यां-दोषभ्याम् दोर्भ्यः दोषभ्यः । दोष्‍ दोषो दोष्णो दोषां [illegible] -दोषणि-दोषि

दोर्षु दोःषु-दोषसु । सप्तमीबहुवचने कृत्रिमत्वाद्विसर्गः (क) ॥

(च०) शसादौ तु विशेषः । 'शसादौ स्वरे परे नान्तता वा वक्तव्या' । अस्यार्थः । दोष्शब्दस्य शसादौ स्वरे परे नान्तत्वं भवति वा विकल्पेन अन्ते नकारागमो भवतीत्यर्थ । दोष् न इति स्थिते । 'पूर्वो णो०' पक्षे 'स्वरहीनं०' । दोष्णः दोषः दोष्णा दोषा । नकाराभावे 'दोषां र' 'अञ्जुपिबिका०' । दोभ्यां दोर्भिः । पक्षे 'दोषां रः' 'रायो द्विः' 'सर्वे जशः' 'स्वरहीनं०' दोभ्यां दोर्भिः इत्यादि । केचित्—'शसादावनन्तता वा वक्तव्या' इत्येवं पठन्ति, स्वर इति पदं न पठन्ति तन्मते स्वरादौ हसादौ च सर्वत्र विकल्पेन अन् आगम कृते स्वरादौ 'अल्लोप स्वरे' 'पूर्वो णो०' 'स्वरहीनं०' । द्वितीयपक्षे केवलं 'स्वरहीनं०' दोष्णः दोषः । दोष्णा दोषा । नकाराभावे पक्षे अन् आगमे कृते 'स्वरहीनं०' 'नाम्नो नो०' दोषभ्यां । द्वितीयपक्षे 'दोषां रः' अञ्जुपि० । दोर्भ्याम् ॥ एवं दोषभिः दोर्भिः । दोषे 'स्वरहीनं०' दोष्णे शसादावनन्तता । तता 'अल्लोप स्वरे०' 'पूर्वो णो०' 'स्वरहीनं०' ॥ दोषभ्यां दोर्भ्यां दोषभ्यः दोर्भ्यः । दोषः दोष्णः दोषभ्यां दोर्भ्यां दोषभ्यः दोर्भ्यः । दोष्णः दोषः दोष्णोः दोषोः । दोष्णाम् दोषाम् । 'षष्ठ्योः दोषि दोष्णि । दोषोः दोः षु यदि अनन्तरत्वे कृते 'नाम्नो नो लोपः०' दोषसु पक्षे 'दोषां रः' इति रत्वे । विसर्गः कृत्वा स' दोर्षु । केचित् 'दोषां र' 'खरोविसर्गः' 'विसर्जनीयस्य०' दोःषु इत्यपि साधयन्ति । कश्चित्तु दोषसु इति पठन्ति तदा यथा सम्यक् साधनम् ॥ दोष् शब्दः पुंस्त्रीलिङ्गः । नकारे तु दोषो दोषि ॥ भुजो बाहुः प्रवेष्टो दोः । सेयमं कुट् मिश्रनं सह तम वर्तते इति सजूर्मित्रम् ॥

एवं सजुष्शब्दः ॥ सजुषाशिषो रसे पदान्ते च दीर्घो वक्तव्य ॥ दोषाम् । सजूः सजुषौ सजुषः । हेसजूः हेसजुषौ हेसजुषः । सजुषम् सजुषौ सजुषः । सजुषा सजूर्भ्याम् सजूर्भिः । सजूर्षु सजूःषु । इत्यादि ॥

(च०) 'सजुषाशिषो रसे पदान्ते च दीर्घो वक्तव्यः' इति केचित्पठन्ति । 'दोषां रः' इति रत्वं विनाप 'र्वादिहस' इत्यनेनैव सिद्धत्वात् । इति भाष्यम् ॥

(प्र०) सजुषाशिषोरिति र्वादिहस इति सूत्रेणेत्यर्थः । भाष्यपूर्वस्य धातोः किम् इत्याद्य इकारं धातुपरक्रियाद्विस्तर्येवाः अथवा [illegible] र्वादिहस इति दीर्घविधानार्थमित्यवधानमात्र । कुर्वं इत्यादौ दीर्घाभावः । [illegible] दीर्घविधानार्थं वा समर्पयुक्तवचने भाजोति देव्य विसर्गः । [illegible] विधानं । [illegible] कार्यं विसर्गं [illegible] ॥

सकारान्त पुम्शब्द ॥ पुंसोऽसुङ् ॥ पुम्शब्दस्य असुङादेशो भ

(क) [illegible]

वति पुंसि परेषु परेषु सौ च ॥ ककारोऽन्त्यादेशार्थ । ककारो नुम्विधानार्थ (क) ॥ 'न इवरे' पुमस् सि इति स्थिते । 'मितो नुम्' 'सम्महत' इति दीर्घ । 'संयोगान्तस्य लोपः' 'हसेपः सेर्लोप' पुमान् पुमांसौ पुमांस । हे पुमन् हे पुमांसौ हे पुमांसः । पुमांसम् पुमांसौ पुंस । पुंसा । पुंसि पुंसोः । पुंसु सु इति स्थिते ॥ ४५ ॥

(च०) सकारान्तः पुंस्शब्दः । पुनातीति पुमान् । 'पुनातेः डम्सुन् पुम् च इति उ प्रत्ययो पुमागमश्च स्वादेरन्त्यः । अथवा-पाति त्रिवर्गं पुमान् 'पातेडुम्सुन्' इति डुम्सुन् प्रत्ययः ॥ पुंस शब्दस्तस्य पञ्चसु विशेषः । सूत्रम्—'पुंसोऽसुङ् पुंसः पञ्चस्वेकवचनान्तम् । 'स्वादीने॰' घोटि 'असुङ् प्रथमैकवचनान्तम् । 'हसेप॰' 'अतोऽस्तु' 'ङ को 'पदोऽतेऽस्त ॥ पुंस्शब्दस्य पञ्चसु स्यादिषु परेषु असुङ् इत्ययमादेशो भवति । ककारोऽन्त्यादेशार्थः । उकार उच्चारणार्थः । अनेन सकारस्य सकारस्य असुङ् इत्यादेशः । पुमस इति स्थिते । 'मितो नुम्' इति नुमागमः । पञ्चसु । 'सान्महत॰' इति दीर्घत्वम् । अस्यान्यो लोपः । सौ परे च 'हसेप॰ इति सिलोपः 'संयोगान्तस्य॰' इति सलोपः । अथ द्विती यादिषु यावत् 'नश्चापदान्ते॰' 'स्वादीने॰' पुमान् पुमांसौ । पुमांसः । हे पुमन् हे पुमांसौ हे पुमांसः । पुमांसम् पुमांसौ । शसादौ 'नश्चापदान्ते॰' 'स्वादीने॰' पुंसः पुंसा । भ कारादौ 'संयोगान्तस्य॰' नश्चापदान्ते झसे' ॥ ८८ इति 'संयोगान्तस्य॰' 'नश्चापदान्ते पुंसु ॥ ४५ ॥

असम्भवे पुंसः ककुसौ ॥ असम्भवेऽर्थे पुंस्शब्दस्य ककागमो भवति सुपि परे ॥ ककारः कित्कार्यार्थः । अकार उच्चारणार्थः ॥ स्कोराद्योश्च । संयोगाद्यो सकारककारयोर्लोपो भवति धातोर्झसे परे नाम्नश्च झसे पदान्ते च ॥ 'विवक्षात्' इति सस्य षत्वम् । 'कषसयोगे क्ष' पुक्षु(ख) ॥ ४६ ॥

(च०) अथ रूपान्तर साधयति—असम्भव इति । असम्भवे वैदिकप्रयोगे । अ सम्भवो नाम यत्रात्मैकदेशस्य आत्मनो बहुत्वासम्भवः । न विद्यते आत्मनो महता बहुत्व सम्भवो यत्र सोऽसम्भवः । कुतः 'एकमेवाद्वितीयं ब्रह्म' नेह नानास्ति किञ्चन' इति वे

(क) "एक स्वरूपं सर्वं दृष्ट्वाऽसरोऽहमिति अधिकार । पुर स्थितं यदा पश्येद् लभते स्वरम् ॥ स कुमारो भवत्येव वाक्यतोऽयमागत । पूर्वं सर्वं लभेनाववक्ष्यते पुरतः स्वरम्" ॥ पाठोऽयं प्राचीनपुस्तके विद्यतोऽस्ति ।

(ख) ननु पुंल्लिङ्गस्य मकार एव संयोगादिः पकारस्तर्हि कथं लोप । पुक्षु अत्र स्कोराद्योः' इत्यनेन संयोगाद्यस्य लोपे प्राप्ते मकारस्यैव लोपो भवेत् तु पकारस्य । आदित्वाभावात् । संयोगाद्यस्तु पुंस् शब्दस्य त्रितयमि मकार एव । तस्मात्तारूपमिति त्रिविधम् । पुक्ष्वित्यसाधितं च । अत्र तस्यादित्वमारोपितम् । पुंस् न इत्यत्र ककारस्य मकारमादि ककारापेक्षया मकार आदिरिति ककारस्यैव लोपः । पुक्ष्वित्यादि हस्तेषु पाठः पुस्तकेष्वलभ्यते ।

दा[illegible] यदा तथाऽऽदेशे वैयर्थ्य श्रेयस्यात्मनो बहुत्वासम्भवः ॥ अथवा––नास्ति स म्भवो युदैः सुभादेश यत्र सोऽसम्भवस्तस्मिन् वाच्ये सति सावित्ति क्वचि परे कमाग मो भवति ॥ अनेन [illegible] क्विबादन्ते । 'स्कोराद्योश्च' इति सलोपः । [illegible] स० 'कसंयोग क्ष' पुंक्षु इति सिद्धम् । परमपुंस्तु पुंक्षु लौकिकेषु पुं पेषु पुंक्षु ॥ ३६ ॥

(प्र०) असम्भवे इति । वेदान्तैकवेद्यस्यात्मनः "एकमेवाद्वितीयं, नेह नानास्ति किञ्चन" इत्यादिभिरद्वितीयत्वेन प्रतिपादितस्य पुंसः बहुषु बहुवचनमिति बहुर्वचादित्वे त्रि हितबहुवचनासम्भव इत्यर्थः । अथवा संयोगान्तलोपेन पुंक्ष्विति सर्वत्र सम्भव एवमुक्ति । पुंक्षु बहुस्वरोत्यादिप्रयोगाभ्यासम्भवे [illegible] न सम्भवतीत्यर्थः । तत्र संयो गान्तलोपे [illegible] कमागमे वत्वे आदेशे मस्यानुस्वार । [illegible] मोऽपि सकारस्यादित्वविवक्षया स्कोराद्योरवेति सलोप इति । तदसत् । पूर्वविप्रतिषेध विवक्षया अप्रामाणिकत्वात् । [illegible] सम्भवे क्लिष्टकल्पने प्रमाणाभावात् अति प्रसङ्गाच्च ॥ ३६ ॥

एवं विद्वस्शब्दः । विद्वान् विद्वांसौ विद्वांसः । हे विद्वन् । विद्वांसम् विद्वांसौ ॥

(च०) विद्वस्शब्दस्य प्रथम पूर्ववत् 'मितो नुम्' 'नसम्महतो०' दीर्घः । 'संयोगा न्तस्य लोपः' 'हसात्' विद्वान् विद्वांसौ विद्वांसः । हे विद्वन् । विद्वांसम् विद्वांसौ ॥ ११ ॥

वसोरुः ॥ वसोः सम्बन्धी वकार उत्वं प्राप्नोति घसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ विदुषः । विदुषा ॥ ४० ॥

(च०) [illegible] 'वसोरुः व०' वसो [illegible] । [illegible] '[illegible]' 'नामिनो र०' [illegible] । [illegible] प्रथमैकवचनान्तम् 'सा०' । [illegible] । 'आदेशे [illegible]' [illegible] 'विदुषो वसुः' इत्यादि [illegible] [illegible] सम्बन्धी वकारः [illegible] उत्वं प्राप्नोति घसादौ स्वरे परे तद्धिते [illegible] ईपि च परे । तद्धिते वैदुष्यम् । ईपि विदुषी ॥ [illegible] घसादौ स्वरे [illegible] [illegible] 'नामिनः स०' 'षत्वादौ०' ॥ ४० ॥

(प्र०) वसो इति । [illegible] पूर्वसूत्रात्[illegible] । [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] । तद्धिते वैदुष्यं विदुष्मान् । ईपि विदुषी । [illegible] । विदुषा पुंसि ॥ ४० ॥

'वसां रसे' इति दत्वम् । विद्वद्भ्याम् विद्वद्भिः । विदुषे विद्वद्भ्याम् विद्वद्भ्यः । विद्वत्सु । इत्यादि (क) ॥

(क) [illegible]

(च०) हसादौ 'वसो रसे' इति सस्य दत्वे कृते मकारादौ 'स्वरहीनं०' इति 'वन वरा हलसानाम्' इत्यस्य तः । स्वाहीनं० ॥

एवं तस्थिवस्शब्दः । तस्थौ इति तस्थिवान् । ष्ठा गतिनिवृत्तौ । 'आद् एच उप० स्था । क्वसुप्रत्ययः । वस् । सत्र लद्वत् । तेन द्वित्वम् । 'हस्वः' 'समानस्वरा०' इति पूर्वस्य लोपः । 'क्वासौ अवधपा' इति थस्य तः ['स्थामी' इति आकारस्य ईकारः] । तस्थिवस इति जाते स्वादिः । तस्थिवान् तस्थिवांसौ । तस्थिवांसः तस्थिवांसम् तस्थि वांसौ ॥ शसादौ 'वसोर्व उः' इति वस्य उत्वे कृते 'निमित्ताभावे नैमित्तिकस्याप्यभाव०' इति इकारस्य आकार एव । तत आतोऽनपि इत्याकारलोपः । 'स्वरहीनं०' क्विप्रान्तः सा०' तस्थुषः तस्थुषा तस्थिवद्भ्यामित्यादि ॥ एवं मन इति जग्मिवान् जग्मिवांसौ जग्मिवांसः । जग्मिवांसम् जग्मिवांसौ जग्मुषः । जग्मुषा जग्मिवद्भ्यामित्यादि ॥ एवं पेचिवान् पेचिवांसौ पेचिवांसः । पेचिवांसम् पेचिवांसौ पेचुषः । पेचुषा पेचिवद्भ्यामि-त्यादि । उषा(सा)शब्दस्य स्वसादीनां तु रसे पदान्ते च 'वसो रसे' इति दत्वम् । स्वरा दौ स्वाहीनं । उषा(सा)यन् उषा(सा)सनौ उषा(सा)सम उषा(सा)यद्भ्याम् उषा (सा)यद्भिः उषा(सा)यत्सु । एवं पर्णध्वत् पर्णध्वसौ पर्णध्वसः इत्यादि ॥

सकारान्तः सुवचस्शब्दः । 'अत्वसः सौ' सुवचाः सुवचसौ सुवचसः । हेसुवचः हेसुवचसौ हेसुवचसः ॥ सुवचसम् सुवचसौ । इत्यादि । एवं चन्द्रमस्प्रभृतय । 'अत्वसो सौ' 'हसेप सलोप' चन्द्रमा चन्द्रमसौ चन्द्रमसः । हेचन्द्रमः हेचन्द्रमसौ हेचन्द्रमसः । चन्द्रमसम् चन्द्रमसौ चन्द्रमसः । चन्द्रमसा चन्द्रमोभ्याम् चन्द्रमोभिः । चन्द्रमस्सु चन्द्रमःसु । इत्यादि ॥

(च०) सकारान्तः सुवचस्शब्दः । वच परिभाषणे धातुः । 'वचादेरस्' वचा दीनं०' नामत्वात्स्वाद्युत्पत्तिः । ततः सौ परे 'अत्वसः सौ' इति दीर्घे 'हसेपः से०' इत्यादि ।

[illegible]

धो 'इसेरः से०' 'खार्ति०' । स्वादौ धपि च सर्वत्र 'स्वरहीनं०' मकारादौ 'घोर्ति०' 'हसे' 'ह सो' धोर्ट उकारम् । एवं चन्द्रमस् शब्दः । चन्द्रमाः चन्द्रमसौ चन्द्रमसः । चन्द्रमसा चन्द्रमोभ्यां चन्द्रमस्सु । एवं वेधाः वेधसौ वेधसः । दुर्मेधाः दुर्मेधसौ दुर्मेधसः । इत्यादि । एवं प्रचेतस जातवेदस् हरचे मनस् छन्दस् तेजस्प्रभृतय ॥

उसनस्शब्दस्य भेद ॥ उशनसाम् ॥ उशनस् पुरुदंसस् अनेहस् इत्येतेषां सेरेर्डा भवति(क) ॥ डित्वाट्टिलोप । उशना उशनसौ उशनस । उशनसो धौ सान्तता नान्तताऽदन्तता वा वक्तव्या । हेउशनन् हेउशन हेउशन हेउशनसौ हेउशनस ॥ उभयविकल्पे रूपत्रयम् । सम्बोधने तूश नसास्त्रिरूपमिति वचनात् ॥ उशनसम् उशनसौ उशनस । उशनसा उशनोभ्याम् उशनोभिः । उशनस्सु उशनःसु । इत्यादि ॥ [पुरुदंसा पुरुदंससौ पुरुदंसस । इत्यादि ॥ अनेहा अनेहसौ अनेहस । अनेहसम् । इत्यादि] ॥ ५८ ॥

(च०) उशनस्प्रभृतीनां सौ विशेषः । सूत्रम्—'उशनसाम्' । उशनसां षष्ठीबहुवचनान्तम् । 'स्वरहीनं०' उशनस् पुरुदंसस् अनेहस् इत्येतेषां शब्दानां सिर्डित्स्य सेर्डा भवति । अनेन सेर्डा । डकारष्टिलोपार्थः । 'डिति टेः' इति टेर्लोपः । 'स्वरहीनं०' । शेषं टिप्पण्यादौ उक्तवत् । उशनसो धौ विशेषमाह—'उशनसो धौ सान्तता नान्तता अदन्तता च वक्तव्या' उशनस् शब्दस्य धिविषये सान्तता अन्त्यसकारस्य नकारः अदन्तता अकारान्तता च सकारस्य लोपो भवतीत्यर्थः । चकारात् तृतीये तु सान्त एव सिद्धमिति धौ रूपत्रयम् ॥ यतः 'सम्बोधने तूशनसः' इति । एकत्र 'हसेर०' 'स्रो०' । द्वितीयपक्षे सस्य न० । 'हसेरः०' तृतीये तु अदन्तता वक्तव्येति सलोपः । समानादेर्लोपो०' इति वर्णलोपः । हे उशन हे उशनन् हे उशनः इति रूपत्रयम् । उशनस् भ्यामित्यत्र 'खार्ति०' 'हसे' 'ह सो' उशनोभ्याम् उशनोभिरित्यादि । उशना शुक्रः । एवं पुरुदंसस् अनेहस् शब्दः । पुरुदंसा पुरुदंससौ पुरुदंससः । पुरुदंसा इन्द्रः ॥ अनेहा अनेहसौ अनेहस इत्यादि । अनेहा कालः ॥ ५८ ॥

(ह०) उशनसो धाविति । सकारान्तस्योशनःशब्दस्य सकारस्थाने—नकारान्तता अकारस्थाने चादन्तता । धौ०वर्थः । सान्ताऽदन्तयोर्विकल्पे च सान्तस्यापि रूपस्य सिद्धत्वात् रूपत्रयम् ॥ ५८ ॥

अदस्शब्दस्य भेद । 'त्यदादेः' इति सर्वत्राकार । अद् सि इति स्थिते ॥

स्रौ सः ॥ अदसो दकारस्य सौ परे सत्व भवति ॥ ५९ ॥

(क) [illegible]

(म०) अदस्शब्दस्य सकारान्तस्यापि विग्रहः । तस्य 'त्यदादेरः' इति सर्वत्रा- कारः । सौ तु अदस् सौ इति स्थिते सूत्रम्— सौ स' साविति सिसाप्स्य सप्तम्येकव- चनान्तम् । सौ सिलोपः । स प्रथमैकवचनान्तम् 'सोर्डौ' ॥ अदसो दकारस्य सौ परे सो भवति । अनेन दस्य सः । असम इति स्थिते ॥ ४९ ॥

(प्र०) सौ इति । अत्र स्यदादित्वादुत्वाभावेऽसौ दस्य सादेशस्तदा न इत्युक्तम् ॥

सेरौ ॥ अदस सेरौकारादेशो भवति ॥ असौ ॥ ५० ॥

(म०) सूत्रम्- सेरौ' सेः इति सिशब्दस्य षष्ठ्येकवचनम् । सिरिति इदम् औरिति औ प्रथमैकवचनान्तम् । सांकेतिकम् । नामिनो र' स्वरहीनं० ॥ अदस सम्बन्धिन सेः औकारो भवति । अनेन सिस्थाने औ । 'औ औ औ' सन्धाविति सिद्धम् ॥५०॥

द्विवचने अदस् औ इति स्थिते ॥ 'दस्य म' ॥ 'औ औ औ' अमौ इति स्थिते ॥ मादू ॥ मात् ऊश्च ऊ । अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारादेशो भवति दीर्घस्य च दीर्घ ऊकारादेशो भवति ॥ अमू ॥ बहुवचने सर्वादित्वात् 'असी' दस्य म 'अ इ ए' अमे इति स्थिते ॥ ५१ ॥

(म०) द्विवचनादौ स्यदादेरः० इति सर्वत्राकारे कृते 'दस्य म' अम औ इति स्थिते 'औ औ औ' इति सूत्रम्— मादू मात पञ्चम्येकवचनम् । ऊरिति 'अस्मे दीर्घ०' अत्र ऊ उ ऊ प्रथमैकवचनान्तं सांकेतिकम् । [illegible] सिद्धम् । अदसो मकारात्परस्य ह्रस्वस्वरस्य उकारो भवति दीर्घस्य च दीर्घ ऊकारो भवति । अनेन अमौ इत्यत्र औकारस्य दीर्घत्वात् ऊकारः । अत्र पूर्वं विभक्तिकार्यं पश्चात् मादू । इत्यत्रापि तु पूर्वं मादू पश्चा- द्विभक्तिकार्यमिति विवेकः । अमू ॥ ५१ ॥

(प्र०) मादू च इति [illegible] । [illegible] द्विमात्र- [illegible] [illegible] ॥ ५१ ॥

एरी बहुत्वे ॥ ए ई बहुत्वे । बहुत्वे सति मकारात्परस्य अदस एकारस्य ईकारादेशो भवति ॥ अमी । अमुम् अमू अमून् ॥ नान्ते इ- त्वे । 'टा न ऽस्त्रियाम्' अमुना अमूभ्याम् अमीभिः । अमुष्मै । अमूभ्याम् अमीभ्य । अमुष्मात् अमूभ्याम् अमीभ्य । अमुष्य अमुयोः अमीषाम् । अमुष्मिन् अमुयोः । अमीषु ॥ ५२ ॥

(म०) अस्मे बहुवचने सर्वादित्वात् 'जस्' अ इ ए अमे इति स्थिते सूत्रम्— एरी बहुत्वे [illegible] । ई प्रथमैकवचनान्तं सांकेतिकम् । [illegible] । बहुत्वे सप्तम्येकवचनान्तम् । बहुत्वे बहुवचने सति [illegible] मकारात्परस्य एकारस्य ईकारो भवति । अनेन एकारस्य ईकारः । अमी । [illegible] यदेति चेत् [illegible] अमुके अमुके इति न सिध्यति । [illegible]

स्य' 'मादू' इत्यकारस्य उकारः । मो नुम्वारः' अमुमिति सिद्धम् । द्विवचने प्रथमादि वत्सवत् । बहुत्वे 'अमुशमोरम्य' 'सो म: पुंस' 'शसि' 'मादू' अमून् इति सिद्धम् । टाविषये 'मादू' अन्य उः । अमु तत 'टानाऽस्त्रियाम्' अमुना । द्विवचने 'भ्यां' इत्या त्वम् पश्चात् 'मादू' इत्याकारस्य दीर्घत्वादूकारः अमूभ्यामिति सिद्धम् । एवं चतुर्थी पञ्चमीद्विवचनेऽपि । तृतीयाबहुवचने 'भिसभिस्' इति वचनात् 'ए भिस बहुत्वे' 'एरी बहुत्वे' अमीभिः । एवं चतुर्थीपञ्चमीबहुवचने । चतुर्थ्येकवचने 'सर्वादेः स्मट्' 'मादू' 'किलात्' स ' 'ए ए ऐ' अमुष्मै । पञ्चम्येकवचने 'ङसिरत्' 'अतः०' इति स्मडागम । 'सवर्णे०' 'मादू' 'स्वरहीनं०' 'किलात्' स ०' अमुष्मात् । षष्ठ्येकवचने ङस्य' 'मादू' किलात् स ०' अमुष्य । षष्ठीसप्तम्योर्द्विवचने ओसि मकारस्य उकारः । 'उ वम्' 'मादू' 'स्वरहीनं०' । आमि 'सुडाम' 'ए स्मिन् बहुत्वे' 'एरी बहुत्वे' 'किलात्' स०' अमीषाम् । सप्तम्ये कवचने 'ङि स्मिन्' 'मादू' किलात्: स:०' अमुष्मिन् । सुपि 'ए स्मि बहुत्वे' 'एरी' बहुत्वे' 'किलात्: स०' अमीषु । त्यदादित्वात्संबोधनाभावः । सम्बोधनं न भवतीत्यर्थः ॥ ५२ ॥

(प्र०) एरीति । अत्रापि मान्त्यनुस्वारमुक्ते इत्यत्र मत्वे च कृते इति वक्तव्यमेतत् । अन्यथा एवंविधनियामकाभावात् ॥ ५२ ॥

सामान्ये अदसः क स्यादिवच्च ॥ सामान्येऽर्थे वाच्ये सति अदस्शब्दात्पर क प्रत्ययो भवति स स्यादिवज्ज्ञेय (क) ॥ 'त्यदादेष्टेर स्यादौ' दस्य म ' 'मादु' अमुक अमुकौ अमुके । अमुकम् अमुकौ अमुकान् । अमुकेन अमुकाभ्याम् अमुक ॥ इत्यादि(ख) ॥ ५३ ॥

इति हसान्तपुल्लिङ्गप्रक्रिया ॥ १० ॥

(च०) पुनर्विशेषमाह—सामान्य इति । सामान्यार्थे विशेषाकथने अज्ञानार्थे अदस्शब्दस्य कप्रत्ययो भवति । स च स्यादिवज्ज्ञेयः । स्यादौ परे यत्कार्यं भवति तत्कार्यं कप्रत्यये परेऽपि भवतीत्यर्थः । तेन 'दस्य म ' 'मादू' इति भवति । स्यादिवच्चेति चकारात्प्रथमैकवचने असकौ इति रूपमिति भवति । पुंसि स्त्रियां च अदसः कः प्रत्ययः स्यादिवत्वात् । 'त्यदादेष्टे०' 'दस्य म ' 'मादू' अमुक इति सिद्धम् । ततः स्यादयः । प्रक्रिया सर्वशब्दवत् ॥ इति सान्ताः । इति हसान्तपुल्लिङ्गसाधनम् ॥ ५३ ॥

(प्र०) सामान्ये इति । सामान्ये विशेषाप्रकाशनेऽर्थे अदस्शब्दात्कप्रत्ययो भवति स च स्यादिवत् । सेः सिप्रत्ययस्यादिः प्रकृतिः अदस्शब्दस्तद्वत् । तत्सहितस्यादस्य सादस्कार्यं भवतीत्यपि सम्प्रेणार्थः । अथवा सिशब्देन सकार उपलक्ष्यते ततश्च सेः सकारस्य कार्यं दिदिति स्यादिवत् सकारात्पूर्वं भवतीत्यर्थः । ततश्च तन्मध्ये पतितस्तद्ग्रहणेन ग्राह्य

(क) एकस्य स्यादिवत् बहुर्यो न पते न सामान्यम् ।

(ख) शीर्षं सर्वशब्दवत् शेषम् । चकारादासरस्थेऽसत् तेन 'त्यदादेः' 'दो द' 'मादू' अमुक । इत्यादि । इत्यपि भवति । इति अधिक पाठ ।

इति कप्रत्ययसहितस्य सेरौ सौ च इत्यादिकार्यम् । वस्तुतः स्यादिविधिरेव पाठ । अमकौ इति केचित् । नपुंसके अमुक इति सेरौ इत्यत्र इत्वो देत्यतो मन्द्रकस्तुत्या वाऽमुकः कप्रत्ययसहितस्य वा औत्वाभावपक्षे च स्यादिविधेरिति वकारादधिकारोऽसारपरत्वाच्च अमुकः । किन्तु कप्रत्ययस्य स्यादिस्थानिवैशादकप्रत्ययेऽपि स्यशायत्वमदोत्वादि भवति । अव्ययाभावस्य न स्त्रीत्वात् एव वाऽमुकशर्मेत्यादिप्रयोगसिद्धिरित्याहुः । तदसत् पाणिनि विरोधात्(ड) । अमुकस्मै । अमुकस्मादित्यादिषु कप्रत्ययसहितस्य सर्वादिकार्याभावप्रसङ्गाच्च अमुकशर्मेत्यादि तु पृथक् शब्दत्वादेव ॥ ११ ॥

इति सारस्वतप्रसादे हसान्ताः पुंलिङ्गाः ॥ १० ॥

* हसान्ता स्त्रीलिंगा० ॥ ११ ॥ *

अथ हसान्ता स्त्रीलिङ्गा उच्यन्ते ॥ तत्र हकारान्त उपानह्शब्दः ॥ नहो धः ॥ नहो हकारस्य धकारादेशो भवति धातोःसे परे नाम्नश्च रसे पदान्ते च । 'वाऽवसाने' उपानत्-उपानद् उपानहौ उपानहः । हेउपानत्-हेउपानद् हेउपानहौ हेउपानहः । 'खसे चपा झसानाम्' उपानत्सु ॥ १ ॥

(च०) अथ हसान्तस्त्रीलिङ्गे किञ्चिद्रूपसाधनं लिख्यते । हकारान्त उपानह्शब्दः पाञ्चालापवावकन्तस्य स्वरादौ 'स्वरहीनं०' 'हो ढः' इति ढत्वप्राप्तौ तदपवादार्थे रसे पदान्ते च विशेषमाह—सूत्रम्— नहो धः । नहः षष्ठ्येकवचनान्तम् । 'स्वरहीनं०' 'धो धिः' । धः प्रथमैकवचनान्तम् । 'सोर्विसर्गः' इति 'ढ लोपः' सिद्धम् । वृत्तिः स्पष्टा । अनेन रसे पदान्ते हस्य धः । सौ धौ च धत्वे कृते 'हसेपः०' 'वाऽवसाने' धकारस्य वा तकारदकारौ भकारादौ 'धुटां तृतीयः' धस्य द् । 'स्वरहीनं०' । सुपि—'खसे चपा झसानाम्' धस्य तः । 'स्वरहीनं०' शेषं स्पष्टम् । गोधुक्प्रभृतयः पुंलिङ्गवत् ज्ञेयाः । इति हान्ताः ॥ धकारान्ता अप्रसिद्धाः ॥ १ ॥

(प्र) नह इति । इति धातोश्च हस इत्यधिकारादुपानदमित्यादावपि धत्वप्राप्तौ इत्युपानह । 'स्व इति । अधातुत्वात्रुत्वस्याभावात् हे धौः ॥ १ ॥

अभितो ग्रामं सर्वतो ग्रामं नदी वहति धिग्देवदत्तम् ॥ देवदत्तस्य धिक्(क) ॥ उपर्युपरि पुरोहितं याचकाः पतन्ति ॥ अधोऽधो नगरं निधानानि सन्ति ॥

(च०) एवं द्वितीयार्थमाख्यायाधुना तदधिकारात् पुनर्नूतिकारं उपपदद्वितीयाम् आह—अभिसर्वतसोः इत्यादि श्लोकं । तस् च तस् च तसौ अभिश्च सर्वश्च अभिसर्वौ ताभ्यां सहितौ तसौ अभिसर्वतसौ । अभितस्सर्वतसावित्यर्थः । अथवा द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकं सम्बध्यत इति तयोरुपयोगे षष्ठ्यर्थे द्वितीया विभक्तिः कार्येति योगः । धिगिति धिगर्थेऽपि धिक्शब्दयोगेऽपि द्वितीया कार्या । "धिक् निर्भर्त्सननिन्दयोः" । पुनः त्रिषूपर्यादिष्विति । उपरि अधः अधि इत्येतेषु त्रिष्वव्ययेषु प्रयुज्यमानेषु द्वितीया विधेयेति। कथम्भूतेषु ? आम्रेडितान्तेषु आम्रेडितमिति द्विर्निर्वचनं तदन्ता येषां ते आम्रेडितान्ताः द्विवारमुच्चरिता इत्यर्थः । यथा उपर्युपरि अधोऽधो अध्यधिरूपान्तेषु । तत इति अभितः सर्वतसादिव्यतिरिक्तेऽन्यत्र अन्यस्मिन्नप्यर्थे षष्ठ्यर्थे द्वितीया दृश्यते क्वचित्तथा दिति ॥ तत्रोदाहरम्—अभि० । अभितोग्रामं ग्रामस्याभितः अभितो ग्रामम् अनेन द्वितीया । अभितोग्राममिति ग्रामस्य समीपे चतुर्दिक्षु इत्यर्थः । तत्र नदी वहति । एवं सर्वतो ग्रामं वनं ग्रामस्य सर्वतः चतुर्दिक्षु वनमित्यर्थः । एवं धिग्देवदत्तमित्यत्र धिगर्थे द्वितीया । उपर्युपरि ग्रामं पक्षिणो गच्छन्ति । ग्रामस्योपरीत्यर्थः । अधोऽधोग्रामं निधानं दृश्यते ग्रामस्याधः इत्यर्थः । अध्यधिग्रामं ग्रामे ग्रामे तापसास्तिष्ठन्ति । एवमत्र त्रिष्वव्याम्रेडितान्तेषु द्वितीया । ततोऽन्यत्रापि दृश्यत इति वचनात् उभयतः, परितः, समया, निकषा, हा, प्रति, अनु, एतषां योगेऽपि द्वितीया । [उभयतः कृष्णं गोपाः कृष्णस्य पार्श्वद्वयेऽपीत्यर्थः ।

(क) उपर्यध्यधसः सामीप्ये ॥ एषां द्वे स्तो देशतः कालतश्च सामीप्ये ॥ तस्य परमाम्रेडितम् ॥ द्विरुक्तस्य पर रूपम् आम्रेडितसंज्ञं स्यात् इत्यधिकम् ॥

परितः कृष्णम् कृष्णस्य सर्वेष्वित्यर्थः] समया ग्रामं तीर्थं वर्तते । निकषा ग्रामं हृतो ग्रामः ग्रा मस्य समीप इत्यर्थः । एवं मार्गं मार्गं प्रति प्रतिमार्गं हा स्वामिनमित्यादि ॥ अन्तरा ग्रामं ग्रामस्यान्तु एभाव सीमा वर्तते ॥

(प्र०) एवं कारकद्वितीयामुक्त्वोपपदद्वितीयामाह । अभिसर्वतसोरिति । अभि सर्वशब्दाभ्यां तसौ अभितस्सर्वतसौ इत्यन्ते श्रूयमाणं च प्रत्येकमभिसम्बध्यत इति न्यायात्तसः प्रत्येकं सम्बन्धः । तथा चिद्योगे द्वितीया कार्या । उपर्युपरि अधि अधः एते यस्तेषु आम्रेडित द्विरुक्तमिति त्रिकाण्डीस्मरणाद्द्विरुक्तानि मन्ते येषु तेषु योगे द्वितीया कार्येत्यर्थः । ततोऽन्यत्रापि । अभितः परितः समया निकषा हा इत्ये प्रयोगस्यादिष्वयोगेष्वपि क्रमेणोदाहरति । अभितो ग्राममित्यादि । धिगादयमेत्या दौ आद्यन्तारीवा सम्बोध्यत्वेन विवक्षणात्तु प्रातिपदिकार्थमात्रविवक्षया प्रथमायोगाभावात्र द्वितीया । उपर्युपर्यादौ उपर्यध्यधसः सामीप्ये इति द्विर्वचनम् । समयानिकषाशब्दौ सामीप्यस्य सम्बन्धद्योतकौ । अत्र यद्यपि सम्बन्धस्योभयनिष्ठत्वादुभयत्रापि योगस्तथाप्येतद्वचनस्य षष्ठ्यपवादत्वादपवादो हुत्सर्गं निबाधत इति न्यायादत्रैव षष्ठी प्राप्ता तत्रैव द्वितीया । स म्बन्धस्य द्विनिष्ठत्वेऽप्यप्रधानादेव षष्ठीति वक्ष्यमाणत्वात् । अपिशब्दस्य विकल्पार्थत्वेन हा राम हा ईश्वर तात मातरित्यादौ न । क्रियाविशेषणानामपि कर्मत्वम् । स्तोकमोदनं पचति । क्रियाविशेषणानामपि कारकत्वादीनां करणत्वम् । कात्स्न्येन करोति । प्रत्यक्षेण पश्यति । सुखादीनां च वा । सुखं सुखेन वा करोतीत्यादिप्रयोगानुसारेणान्यत्रापीत्यूहो ऽवसेयम् ॥

कालाध्वनोर्नैरन्तर्ये ॥ कालाध्ववाचकशब्दानां नैरन्तर्येऽर्थे वाच्ये सति द्वितीया विभक्तिर्भवति(क) ॥ मासमधीते देवदत्तः ॥ क्रोशं पर्वतः ॥५॥

(च०) कालाध्वनोरितीयं कारिका । अन्तरेण रहितं निरन्तरं तस्य भावो नैरन्तर्यं तस्मिन्नैरन्तर्ये वाच्यमाने । तथा कालो दिनमासादिः अध्वा मार्गः क्रोशयोजनादिस्तत एतयोर्द्वयोर्विषये द्वितीया कार्या । नैरन्तर्ये कालवाचकशब्दात् अध्वशब्दाच्च द्वितीया भव तीत्यर्थः । तत्रोदाहरणम्—काले—मासमधीते मासपर्यन्तं निरन्तरमधीते । पठति । अत्र नैरन्तर्ये द्वितीया । अन्यथा मासस्य द्वित्रावे मासे वा एक दिवसाध्ययने इति भवति । एवं मार्गे क्रोशं पर्वतः क्रोशं व्याप्य निरन्तरं पर्वत इत्यर्थः । क्रोशप्रमाणखण्ड इत्यर्थः । अन्यथा क्रोशस्यैकभागे पर्वत इत्यर्थः । अन्यत्रापि महतः शान्तयोमग्न ग्राममिच्छतः सम्प्रा इवाः ॥ इति ॥ ५ ॥

(प्र०) कालाध्वनोरिति । कालाध्वार्थनैरन्तर्ये अत्यन्तसंयोगेऽर्थे द्वितीयेत्यर्थः । नैरन्तर्ये किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥ ५ ॥

कर्तरि प्रधाने क्रियाश्रये साधने च ॥ प्रधाने कर्तरि, (कि

(क) अत्र चात्यन्तसंयोगे नैरन्तर्ये । नैरन्तर्ये किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः । इति विवेकः ॥

श्रये) क्रियासिद्ध्युपकारके करणेऽर्थे च तृतीया विभक्तिर्भवति(क) ॥६॥

भिन्न शरेण रामेण रावणो लोकरावण ।

करामेण विदीर्णोऽपि वानरैर्युध्यते पुन (ख) ॥ १ ॥

(च०) अथ तृतीयार्थसूचकं कर्तृसाधनयोरिति पदं व्याचिख्यासुराह—'कर्तरि०' कर्तरि कर्तृविषये तृतीया विभक्तिर्भवति । कथम्भूते कर्तरि ? प्रधाने मुख्ये क्रियाया आश्रये मुख्यत्वेन कार्यस्य कारके इत्यादिके ईदृशे कर्तरि तृतीया भवति ॥ च पुनः साधनेऽपि तृतीया भवति कथम्भूते साधने ? क्रियासिद्ध्युपकारके क्रियासिद्धेः उपकारके कार्यस्य साहाय्यकारके ॥ पुनः करणनामकारके साधनेऽपि तृतीया । यः प्रधानभूतः सन् क्रिया या आश्रयभूतः स्वातन्त्र्येण क्रियां कर्तुं प्रवृत्तः स कर्ता तदर्थे तृतीया भवति । च पुनः क्रियासिद्धेः उपकारके करणे प्रकृष्टकारणभूते साधनेऽपि तृतीया भवति । करोतीति कर्ता । स क उच्यते ? इत्याह—क्रियाश्रयः क्रियायाः कार्यस्य आश्रयः ॥ क्रियाया आश्रयोऽप्रधानोऽपि भवति । यदोक्तौ तुरीयेमान्विदित्याह—प्रधान इति । सकलकारकप्रयोक्तृत्वे सति इतरकारकाप्रयोज्यत्वमत्र प्रधानत्वम् । तस्मिन् । किंविशिष्टे साधने ? क्रियासिद्ध्युपकारके क्रियायाः सिद्धिमुपकरोतीति क्रियासिद्ध्युपकारकं क्रियासिद्धेः साहाय्यदायकं । तस्मिन् । पुनः कीदृशे साधने ? करणे । 'साधकतमं करणं' क्रियासिद्धेः प्रकृष्टं कारणं यत् करणं करणनाम कारकं तस्मिन् । एवं कर्तृसाधनयोर्द्वयोरर्थे तृतीया भवति ॥ उदाहरणम्—भिन्नः शरेणेत्यादिश्लोकः । रामेण रावणो भिन्नः । केन ? शरेण । रामेण इति कर्तरि तृतीया । शरेणेति साधने तृतीया कथम्भूतो रावणः ? लोकरावणः । लोकान् रावयति क्रन्दयतीति लोकरावणः । उदाहरणान्तरमाह—तथा रावणो वानरैः करामेण नखेन विदीर्णोऽपि विदारितोऽपि पुनः पुनरपि युध्यते । अत्र वानरैरिति कर्तृपदम् । करामेणेति साधनपदम् । अत्र यत्रापि तृतीया । करामेणेत्यत्र आतानेकवचनम् । पुनस्तृतीयार्थं 'विना सह'इत्यादिना अग्रे वक्ष्यति । इति तृतीयार्थः ॥ ६ ॥

(प्र०) "कर्तृसाधनयोः" इति पदं व्याचष्टे । कर्तरीत्यादि । तत्र तावत्कर्ता द्विविधः । स्वतन्त्रः प्रयोजकश्च । स्वतन्त्रोऽभिहितानभिहितभेदेन द्विविधः । प्रयोजकोऽपि प्रैषकोऽध्येषक आनुकूल्यभागी चेति त्रिविधः । तत्र प्रभुत्वेन प्रयोजकः प्रैषकः । यथा । शिष्येण कारयति । हीनः प्रयोजकोऽध्येषकः । यथा गुरुं भोजयति । यस्तु प्रभुत्वहीनत्वाभावादानुकूल्यमात्रेण कारयति स आनुकूल्यभागी । यथा । आनन्दयति पितरं पुत्रः । एवं पञ्चविधः कर्ता । तत्राभिहिते प्रथमाऽनभिहितेऽनभिहिते कर्तरि तृतीया । तत्र कर्तृलक्षणमाह । प्रधाने क्रियाश्रये इति क्रियाश्रयः कर्तृत्वेन कर्मादीनामपि तत्रातिव्याप्तिः स्यादत उक्तं प्रधाने इति । प्रधानत्वं च इतरकारकाप्रयोज्यत्वे सति सकलकारक

(क) [illegible]

(ख) [illegible]

स्वकर्तृकोपन्यासः । यथा देवदत्त काष्ठैः स्थाल्यामोदनं पचति । इत्यत्र देवदत्त आस्ते येन इत्यादौ तण्डुलोऽन्यत्र कर्मत्वं स्वीयमादाय आसादितिति धातुकक्रियात्वं प्रधानक्रमतने मम । यदीयो व्यापारो धात्वर्थोपयोगे स कर्तेत्यर्थः । तथा चोक्तम् । "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।" इति । करणमपि बाह्याभ्यन्तरभेदात् द्विविधम् । बाह्यं यष्ट्यादि आभ्यन्तरं चित्त दि । तल्लक्षणम् । क्रियासिद्धेत्युपकारक इति । क्रियायाः सिद्धिं करोति उपस्थितिमन्तरेण करोतीति तथा बहूनामाभ्यन्तरमविकल्पेन क्रियोत्पत्तिरित्यर्थः । तथा चाक भर्तृहरिणा । "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥" इत्याहरति । मित्र इति कर्मेण कर्मोक्तमिति तद्वचनात्कर्मणि प्रथमा वा भीः कर्तृभिः करणेन मधौः विरोधोऽपि है. रामेण वा सह पुत्रादि युज्यते । करणेनेति आधारेकस्वक्षम् ॥ ६ ॥

दानपात्रे सम्प्रदानकारके चतुर्थी ॥ सम्यक् श्रेयोबुद्ध्या प्रदीयते यस्मै तत्सम्प्रदानकारकम् ॥ वेदविदे गां ददाति ॥ अन्यत्र राज्ञो दण्डं ददाति ॥ रजकस्य वस्त्रं ददाति(क) ॥ ७ ॥

(च०) अथ चतुर्थीमाह—दानपात्रे सम्प्रदानकारके चतुर्थी । दीयते इति दानं दानस्य पात्रं दानपात्रम् । दानस्यानुगः स्वामी भवतीति भावः । तस्मिन् दानपात्रे । कीदृशे दानपात्रे ? सम्प्रदाने नाम कारके । सम्यक् श्रेयोबुद्ध्या यस्मै प्रदीयते तत्सम्प्रदानम् । यस्मै दत्तं आमुष्मिकफलप्राप्तिर्भवति तत्सम्प्रदानमुच्यते । सम्प्रदानं च तत्कारकं च सम्प्रदानकारकं तस्मिन् । उक्तञ्च—

> "गच्छति दत्तं पुरतो महोत्सवं यत्र भक्तिम च दानकामना ।
> प्रदीयते दानमथो दयार्थे तत्सम्प्रदानं कथितं मुनीन्द्रैः ॥"

तस्योदाहरणम्—वेदविदे गां ददाति । वेदं वेत्तीति वेदवित् तस्मै वेदविदे वेदज्ञाय ब्राह्मणाय कश्चित्पुरुषो गां ददाति । इत्यत्र वेदवित्त्वे सति दानपात्रत्वं सद्गुणमेव । एवं सामर्थ्ये कर्म प्रतिफलवति ॥ अन्यथा दानपात्राभावे—राज्ञो दण्डं ददाति । अत्र चतुर्थ्यभावः ॥ ७ ॥

(प्र०) दानपात्रे । इत्येतद्व्याख्यां कुरुते सम्प्रदानकारके इति । दानं नाम पुण्यानुपदानमनया स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं तस्य पात्रम् । "न हि दाता वेद कथा तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ॥" इत्याद्युक्तं त

(क) [illegible] पुरुषो [illegible] दानकल्पना । [illegible] वर्जने [illegible] । [illegible] चतुर्थी— [illegible] वेदविदे [illegible] । [illegible] दत्त्वा [illegible] ॥ [illegible] ॥ [illegible] इति विद्वत् ।

स्सम्प्रदानकारकमित्यर्थः । तथा चोक्तम् । "अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् । प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम् ॥" इति । तच्च त्रिविधम् । अनिराकर्तृ, प्रेरकम् । अनुमन्तृ चेति । तत्रानिराकर्तृ यथा । आदित्यायार्घं ददाति । प्रेरकम् । विप्राय गां ददाति । मह्यं गां देहीति प्रेरितो ददातीत्यर्थः । अनुमन्तृ । गुरवे गां ददाति । ददतं न वारयति दीयमानं च सादरं गृह्णाति यत्र कुर्यादिति । अनुक्तं सर्वं इति । "अत्रानिराकरणात्कर्तुः सर्वं सम्प्रदानमिष्यते । प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥" इति । ब्राह्मणाय गां ददाति । रजकस्य वस्त्रं ददातीत्यादौ सम्प्रदानत्वाभावः ॥ ७ ॥

विश्लेषावधौ पञ्चमी ॥ विश्लेषो विभागस्तत्र योऽवधिः स च चलतया अचलतया वा विवक्षितस्तत्रापादाने पञ्चमी(क) ॥ धावतोऽश्वात्पतत् ॥ भूभृतोऽवतरति गङ्गा ॥ ८ ॥

(च०) अथ पञ्चम्याः प्राप्तिविषयावधिविश्लेषात्मकत्वमिति यद् व्याकरोति—विश्लेष इत्यादि । विश्लेष इति कार्यः । विश्लेषो विभागो वियोगः पृथग्भावः इत्यर्थः स्वरूपतः वा पृथक्भावपूर्वकं भवनमित्यर्थः । तत्र विश्लेषे योऽवधिरावधौ यस्माद्विभागो जायते स चलतया अश्वादिगत्यादिमत्त्वेन अचलतया पर्वतादिस्थिरादिभावेन विवक्षितो वक्तुमिष्टः स्थितः । तत्र विश्लेषावधौ अपादाननामकारके अपायः । ध्रुवमपाये अपादानम् । अपादाने च तत्कारके च । तस्मिन् पञ्चमी विभक्तिर्भवति । उदाहरणम्—धावतोऽश्वात् पतितमत्र अपतदिति विशेषः अश्वादि तस्मादवधिः आश्रय । धावत इत्यनेन चलति धावतीत्यावचलतया विवक्षितावधित्वम् । एवं भूभृतः पर्वतात् गङ्गा अवतरतीत्यत्र अत्र तस्मादचला विश्लेष । भूभृत इति स्थिरावधिः । एवमन्येऽप्यवगन्तव्या ॥ ८ ॥

(प्र०) विश्लेषावधावित्येतद्व्याचष्टे । विश्लेषो विभाग इति । अपादानं च द्विविधम् । 'अपाये यदुदासीनं चलं वा यदि वाऽचलम् । ध्रुवमेव तदावेशात्तदपादानमुच्यते ॥' इति । तच्च त्रिविधाख्यम् । 'निर्दिष्टविषयं किंचिदुपात्तविषयं तथा । अपेक्षितक्रियार्थं च त्रिधाऽपादानमुच्यते ॥' इति । यत्र साक्षाद्धात्वर्थभूतक्रिया निर्दिश्यते तन्निर्दिष्टविषयम् । यथा । ग्रामादायातीत्यादि । यत्र धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम् । यथा । बलाहकात् विद्योतते विद्युत् । बलाहकात् निःसृत्य विद्योतते इत्यर्थः । 'प्रमाणान्तरप्रतीतक्रियाकं तृतीयम् । यथा गच्छन्तं पृच्छति कस्मात्त्वमिति परस्परस्मान्मेषादपसरतः इत्यत्रान्योऽन्यमवधित्वमुक्तम् । मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् मेषयोः स्वक्रियापेक्षकर्तृत्वं च पृथगिति ॥ ८ ॥

सम्बन्धे षष्ठी ॥

राज्ञः स पुरुषो ज्ञेय पित्रोरेतत्प्रपूजनम् ।

(क) विश्लेषो नाम संयोगपूर्वको विभाग ॥ आधारभेदयोर्मध्ये आधारत्वेन यो ज्ञायमान योऽवधिः ॥ आधीयतेऽस्मिन्नाधौ आधार ॥ आधारं येन्य आधेयः ॥

गुरूणां वचनं पथ्यं कवीनां रसवद्वच (क) ॥ ९ ॥

(च०) अथ षष्ठ्यर्थमाह—सम्बन्ध इति । सम्बन्धस्तु जन्यजनकादिनेकेति सम्बन्धो जन्यजनकादिः स्वस्वामित्वादिः । यथा लिङ्गार्थकारकव्यतिरिक्तः स्वस्वामित्वादिभिन्नः । स चोभयनिष्ठश्च भवति । तस्मिन्नर्थे षष्ठी विभक्तिर्भवतीति । यत —

'भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्' ॥

उदाहरणं श्लोकेनाह—राज्ञ इति । स पुरुषः पुमान् राज्ञः राजसम्बन्धी ज्ञेयः । इत्ययं स्वस्वामिसेवकसम्बन्धः । पुत्रसमीपवर्ति पुत्रस्य पुत्रगोपकरणम् । पितराविति माता च पिता च पितरौ तयोः पित्रोः पितृमातृसम्बन्धि गुरूणां गुरुसम्बन्धि वचनं आज्ञारूपं हितमुक्तार्थं पथ्यवत् पथ्यमुक्तम् । कवीनां यथा वचनं रसवदिति रसयुक्तम् । एवमन्येऽप्यूह्याः ॥ ९ ॥

(प्र०) सम्बन्ध इत्येतत्पदमाह । सम्बन्धे षष्ठीति । सम्बन्धश्च स्वस्वामिभाव-जन्यजनकभावावयवावयविभावादिभेदादनन्तः । कारकभिन्नश्च । क्रियासम्बन्धाभावात् । तदुक्तम् । 'सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः । श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयते ॥' इति । तत्र श्रुतायां यथा । मातुः स्मरति । अश्रुतायां यथा । राज्ञः पुरुष इति । तत्र यद्यपि सम्बन्धस्योभयाश्रितत्वादुभयोरप्यविशेषेण षष्ठी प्राप्ता तथा व्यपदेशादेव द्विविधत्वादेव । तदुक्तम् । एतच्च स्वार्थनिवेदनार्थं विशेषणम् । विशेष्यं सम्प्रधार्य व्यावर्त्यार्थस्यैव प्रकाशनात् ॥ भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योन्यमुच्यते । द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥' इति । एवमन्यानप्युदाहरति । राज्ञः स पुरुषो ज्ञेयः । अत्र क्रियायोगिनः पुरुषादयः प्रधानभूता राजादिभिस्त्वप्रधानभूतैर्विशिष्यन्त इति राज्ञ इत्यादौ षष्ठी । पुरुषादौ तु लिङ्गार्थे प्रथमैव । यदा पुनः पुरुषो विवक्ष्यते तदा पुरुषस्य राजेत्येव । यदा चोभयोरप्राधान्येन विवक्षा तदोभयोरपि षष्ठ्येव । यथा राज्ञः पुरुषस्य वस्त्रमित्यादि ॥ ९ ॥

आधारे सप्तमी ॥ आधारो नामाधिकरणम् ॥ तद्द्विविधमधिकरणम् । औपश्लेषिकं सामीप्यकमभिव्यापकं वैषयिकं नैमित्तिकमौपचारिकं चेति (ख) ॥ १० ॥

(च०) आधारेऽधेयोरिति पदं व्याचिख्यासुः प्रथमसप्तम्यर्थं सूत्रमाह—आधारे सप्तमीति ॥ सूत्रार्थः । आध्रियते स्थाप्यते कर्तृकर्मद्वारा क्रिया अस्मिन्निति आधारः क्रियाश्रयस्य कर्तुः कर्मणो वा । क्रियाया आधारस्तत्र सप्तमी विभक्तिर्भवति । आधाराधिकरणे एकार्थौ ।

(क) भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योन्यमुच्यते । द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ अथ [illegible] ॥

(ख) औपश्लेषिकं [illegible] ॥

आधारस्तदेवाधिकरणमेवोच्यते अतोऽधिकरणस्याधारस्य भेदानाह—चतुर्विधमिति। अधिक्रियते आधारतया तदधिकरणम्। गुणानां गुणित्वम्। तच्चतुर्विधमिति। चत्वारश्चाकारविधाः प्रकारा यस्य तच्चतुर्विधम्। चोदेऽस्यार्थः। तानेव चतुर्भेदानाह—औपश्लेषिकमित्यादि। तत्र सामीप्येन श्लेषणं ईषत्संबन्धः एकदेशमात्रसंयोगे वा सम्बन्धः। यथा कटे शेते कटस्यैकदेशे इत्यर्थस्तेन नि 'समीपस्थेऽपि'कम्। सामीपिकं समीपेन निर्वृत्तं सामीपिकम्। यत्राधेयसमीपमात्रेण क्रियाहेतुः। यथा वटे वटसमीपे गावः सुशेरते। गङ्गायां घोषः गङ्गासमीपे इति। अभि समन्ताद्व्याप्नोतीत्यभिव्यापकम् आधेयेन समन्तात्सर्वसंयोगोऽभिव्यापकः। यद्वा अपृथग्भूतयोराधाराधेययोर्यः सकलावयवसंबन्धः सोऽभिव्यापकः। यथा तिलेषु तैलम्॥ विषये भवं वैषयिकम्। अनन्यत्र भवो विषयिकः। यथा नभसि तारकाः। आकाशे वायुः। हृदि ब्रह्मेत्यादि। हृदि विषये ब्रह्मैव परं ब्रह्मप्रमाणमस्ति॥ निमित्तेन भवं नैमित्तिकं यथा युद्धे युद्धनिमित्तमित्यादि॥ अविद्यमानस्याप्यारोपः कल्पनया तत्समीपत्वादिकम्। एवं चतुर्विधेऽप्यधिकरणे सप्तमी विभक्तिर्भवतीति भावः॥१०॥

(प्र०) आधाराधेययोर्विश्लेषयैकदेशमाह। आधारे सप्तमीति। अधिक्रियते। च किमधिकरणमाधारः। स च क्रियाश्रयकर्तृकर्मणोरेव। तदुक्तं भर्तृहरिणा। "कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम्। उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥" इति आधारस्यैवाधिकरणत्वात्स्वमभिप्रेत्याधिकरणभेदानाह। चतुर्विधमित्यादि। तत्रान्यत्र श्लिष्टयोराधाराधेययोः प्रायेणिकः सम्बन्धः संश्लेषः। सामीप्यं सान्निध्यम्। तत्र भवं सामीपं सामीपिकमिति वा। अपृथग्भूतयोराधाराधेययोः सकलावयवसम्बन्धेन व्यापकमभिव्यापकम्। विषयोऽनन्यत्र भावस्तत्र भवं वैषयिकम्। निमित्तं कारणम्। अन्यानि उदाहरणानि स्पष्टम्॥१०॥

कटे शेते कुमारोऽसौ वटे गावः सुशेरते।
तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम्॥
युद्धे सन्नह्यते धीरोऽङ्गुल्यग्रे करिणां शतम्।

भावे सप्तमी॥ क्रियाकृतेन भावलक्षणापि सप्तमी॥ यस्य च क्रियया क्रियान्तरं लक्ष्यते तत्र भावे॥ देवे वर्षति धीर आयात॥ गन्तव्युद्धे ऊर्वे वाम्भोऽपति. । काके शादि पुष्पन्ति साधवः॥११॥

(प्र०) अथ साधकतमकारकत्वाधारे सप्तम्यन्ताह—कटे शेते इत्यादि। असौ कुमारः कटे [illegible] शेते। [illegible] ॥१॥ [illegible] वटे गावः [illegible] ॥२॥ [illegible] तिलेषु विद्यते तैलं [illegible] ॥३॥ [illegible] ॥४॥ युद्धे [illegible]

तन्नोदाहरणेन द्वितीयां व्यञ्जयति—विना पापमिति । पापं विना पापाभावेन सत्त्वमपि धर्मं इत्यादि फलति फलमावहति । एवमत्र विनार्थे वाच्यमाने विनाशब्दयोगे द्वितीया । च-कारात् पापेन विना पापाद्विनेति तृतीयापञ्चम्यावपि । 'त्वदन्यं ज्ञाता विना' ॥ अक्षिणी इति । नन्वे अन्तरेण विना जीवितेन किं । जीवनेन न किमपीति भावः । अक्षिणी इत्यत्र द्वितीयाद्विवचनं नपुंसकान्तम् ॥ अन्तरेत्यादि । त्वां मामन्तरा मध्ये विवादं मनु क्षौद्रं मधु वा वर्तते । त्वां मामिति युष्मदस्मदोर्द्वितीयैकवचनान्तत्वम् । आभ्यिन्द्वादन्तरेण अन्तरा इत्यत्र द्वयोऽपि द्वितीयाविभक्तिर्भवति । एतदेवाह—इत्यादिशब्दाद्ग्राह्यमिति । इत्यु दाहरणद्वयम् आभ्यिन्द्वाद् विनादियोगे द्वितीया इत्यादिग्रन्थादुपलक्षम् अवसेयमिति भावः ॥ इति द्वितीयाया ॥ १२ ॥

(प्र०) एव कारकविभक्ती प्रसङ्गोपपदविभक्तीर्दर्शयितुमाह । विना सहेति । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायाद्विनादिशब्दस्य प्रत्येकं सम्बन्धः । तथा च विनादिभिर्योगे द्वितीया । सहादियोगे तृतीया । नमआदिभिर्योगे चतुर्थी । ऋते आदिभिर्योगे पञ्चमी । निर्द्धारणादयर्थेस्वामिनिर्द्धारणार्थयोगे षष्ठी । स्वाम्यादिभिः सप्तमीति । चकारात्पापेन विना पापाद्विनेत्याद्यपि । अन्तरेणरवनत्वयोगे अक्षिणी इति द्वितीयाद्विवचनान्तम् अन्तरा मध्ये इत्यर्थः । इत्याद्यपदाद् ग्राह्यमिति । द्वन्द्वान्ते श्रूयमाणस्यादिशब्दस्य प्रत्येकं सम्बन्धात्प्रयोगानुसारेण तृतीयाषष्ठीनामर्थानुयोगे अपाम न्वयसिता सेना । तथा सह सम्बद्धेत्यर्थः । अनुहरिं सुराः हरेर्हीना इत्यर्थः । तथा हीनार्थोपयोगेऽपि उपहरिं सुराः । हरेर्हीना इत्यर्थः । तथा लक्षणेत्थंभूताख्यानभाग वीप्सास्वर्थे प्रतिपर्यनुभिर्योगेऽपि । तत्र लक्षणे हरिं प्रति-परि-अनु वा प्रकाशते भक्तिः । इत्थम्भूताख्याने भक्तो विष्णुं प्रति-परि-अनु वा । विष्णोः भक्त इति तात्पर्यार्थः । भागे लक्ष्मीर्हरिं प्रति-परि-अनु वा । हरेर्भागा लक्ष्मीरित्यर्थः । वीप्सायां भूते भूतं प्रति-परि-अनु वा प्रभु । एकैकं भूतं प्रभुरस्तीत्यर्थः । तथा भागवर्जितलक्षणाद्यर्थेऽभि योगेऽपि । हरिमभिवर्तते भक्तो हरिमभि । देवं देवमभिसिञ्चति । तथातिक्रमपूजार्थे तियोगेऽपि । अति देवान् कृष्णः । इत्यादयो यथायथमूह्याः ॥ १३ ॥

सहादियोगे तृतीयाऽप्रधाने (क) ॥ सह शिष्येणागतो गुरुः ॥ सहचैत्रो मैत्रेण ॥ साकं नयनाभ्यां लक्ष्मणा दृष्टा ॥ सार्धं धनिना भुङ्क्ते साधु (ख) ॥ १२ ॥

(प्र०) अथ तृतीया । सहादियोगे तृतीया । तत्र द्रव्यगुणक्रियाभिस्तुल्ययोरर्थार्थ

(क) सह इत्यर्थे च सर्वं समाने अहन्य ॥

(ख) अयं शिष्यप्रधानीते ॥ सह शिष्येण गुरुणा भुज्यते ॥ आगच्छतस्तदे तावस्य प्रधाने चतु-र्थर्थे तृतीया ॥ इत्यादि देवदत्ते कारक । अर्थे तु मार्गेणे धैर्यवति ॥ स्वप्रधाने तृतीया ॥ अत वि-वरेण वा ... । ... वर्ते करणे वा ... पदे च । ... ... ॥ ... । ... । यथा ... यथा । ... ... यथा । इति विग्रहः ॥

विद्यमानत्वं सहार्थे तृतीयाविभक्तिर्भवतीति सूत्रार्थः। सह शिष्येणेति। गुरुः शिष्येण सह आगतः। अत्रागमनक्रियया शिष्यस्यापि गुरुणा तुल्ययोगत्वात् शिष्ये तृतीया सिद्धम्। सह पुत्रेण पिता धनी इत्यत्र धनवत्त्वेन तुल्ययोगत्वे पुत्रस्य तृतीयास्त्वम्। अन्यत्रैवं ज्ञेयम्। चौडकर्मा कश्चित्पुरुषः मैत्रेण मैत्रकान्ता पुरुषेण सह समस्तुल्यः। सार्द्धं सहार्थमिति। सहार्थकाः साकं सार्द्धं इत्याद्याः सहोक्ताः। अत्र गुणेन तुल्ये तृतीया। एवमादिभिरप्यात्मानः पुरुषः वनितिभिर्वेदद्भिः पुरुषैः सार्द्धं गतो युनीनः वर इत्यर्थः। सहार्थेऽयोगे तृतीया समर्थार्थसंयोगे चतुर्थीत्यर्थः। एतावता अत्र विचारे च। अर्थेन अर्थः। गुरुः मित्रः। धान्येन कलहः। कर्मणा विना। पुत्रेण हीन इत्यादयोऽपि प्रयोगा अवसेयाः। इत्थंभावे तु तुल्यार्थे तृतीयापवादौ स्तः। कृष्णेन तुल्यः स्त्र वा पुत्रः। चतुर्थं रघुकाव्ये—"एतेन धीरः सदृशोऽस्त्येव सः॥ इति तृतीया॥१३॥

(प्र०) सहादियोगे तृतीयां दर्शयति। सहसार्द्धेत्यादि। समं सिनेत्यादि [illegible] विनापि तदर्थविवक्षायां तृतीया। यद्यपि योगस्य सम्बन्धस्य तुल्यसम्बन्धाभिधानात् [illegible] प्रसिद्धत्वादि [illegible] आदिशब्दात्र कृत्वान्विताऽपि। प्रकृत्या चारुः। प्रायशोऽलम्। गोत्रेण गार्ग्यः। समेनैति। विषमेणेति। द्विद्रोणेन धान्यं क्रीणाति। दण्डेन दुःखेन वा याती इत्यादि। तथा कलापातौ सहसमासार्थ्यां [illegible]ऽपि। सदा [illegible]ऽधीत। अन्यत्र तु मासमधीतो यातातः। तथा संपूर्वस्य जानातेः कर्मणि षष्ठ्यादयः। पित्रा पितरं वा संजानीते। तथा [illegible] कर्मणि वा। शतं शतं वत्सान् पाययति पयः। [illegible] दानेन वा। तथा [illegible]ऽपि। कृतमेतावता। धर्मेणार्थो विसृष्टिसाध्। गुरु मित्रः। धान्येन कलहः। पुत्रेण हीनः। मासधावा। मासेन पूर्वः। तथा [illegible] सर्वदेऽपि। दात्या [illegible] कामुक इत्यादि प्रधानतो ज्ञेयम्॥१३॥

नमआदियोगे चतुर्थी॥ नमो नारायणाय। स्वस्ति राज्ञे। सोमाय स्वाहा। पितृभ्य स्वधा। अलं मल्लो मल्लाय। वषट् इन्द्राय (क)॥ १४॥

(च०) अथ चतुर्थीं व्याचष्टे—नमआदियोगे चतुर्थी॥ नम स्वस्तिस्वाहास्वधालं वषट् एतेषामव्ययानां योगे चतुर्थी वक्तव्या। उपमम्। तत्र नम इति नमस्कारार्थः। स्वस्ति इति कल्याणाद्याशंसनम्। स्वाहा इति होमाद्यर्थे मन्त्रावसानेऽप्युच्चार्यम्, इत्यवधारणम्॥ स्वधेति पित्र्यकर्म्म वस्तु। अलमिति सामर्थ्यार्थः। वषट् हो तव्यं वस्तु॥ नमो नारायणायेति। नमो नमस्कारार्थे। स्वस्ति राज्ञे। राज्ञे नृपाय कल्याणं भवतु। अत्र स्वस्ति कल्याणार्थे। सोमाय स्वाहा। सोमाय चन्द्राय स्वाहा हव्यवस्तु॥ पितृभ्यः स्वधा संतानकल्पितं वस्तु॥ अलमिति। मल्लो मल्लाय अ॰ सम

(क) [illegible]

र्थः । इन्द्राय वषट् । होतव्य मस्तु । इत्यादिष्वर्थेषु चतुर्थी ॥ १४ ॥

(प्र०) नमआद्यन्योगे चतुर्थी दर्शयन्नाह । नम इत्यन्तीत्यादि । अलं मल्लो मल्लायेत्यत्रालंशब्दः पर्याप्त्यर्थः शक्त इत्यर्थः । वारणार्थस्य तु योगे तृतीयैव । आदिनो क्रियया यमभिप्रैति सोऽपि । पत्ये शेते । एव रुच्यर्थधातुप्रयोगे प्रीयमाणोऽपि । हरये रोचते भक्तिः । तथा श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानोऽपि । कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा गोपी स्मरात् । तथा धारेरुत्तमर्णोऽपि । भक्ताय धारयति मोक्षं हरिः । तथा स्पृहेरीप्सितादपि । हरये स्पृहयति । तथा राध्यीक्ष्योर्यस्य विप्रश्नस्तत्र कर्मणि चतुर्थी । कृष्णाय राध्यति ईक्षते च । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः । तथा प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्तरि । विप्राय गां प्रतिशृणोति आशृणोति प्रतिजानीत । तथा अनुप्रतिपूर्वस्य गृणातेः पूर्वप्रवर्तनक्रियाकर्तुः । होत्रे अनुगृणाति प्रतिगृणाति । होतारं शंसन्तं प्रोत्साहयतीत्यर्थः । तथा नियतकालं वेतनेन स्वीकरणे परिक्रयणे संप्रदानं वा । शताय शतेन वा परिक्रीतः । तथा क्लृप्यर्थयोगे सम्पद्यमाने । भक्तिर्ज्ञानाय कल्पते सम्पद्यते जायते इत्यादि । तथोत्पातज्ञापितादपि । वाताय कपिला विद्युत् । हितयोगे च । ब्राह्मणाय हितम् । तथा तुमर्थक्रियायामे तुमुनोऽप्रयोगे कर्मणि । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । तथा तुमर्थभाववचनप्रत्ययान्तात् । पाकाय याति । पक्तुं यातीत्यर्थः । गौकाकाद्य... मन्यते । कर्मणि वाऽनादरे । न त्वा तृणं तृणाय वा मन्ये । अप्राण्ये तु न । त्वां नावं मन्य इत्यादि । चेष्टायां गत्यर्थानां कर्मणि चतुर्थी वा । ग्रामाय ग्रामं वा गच्छति । अध्वनि तु मार्गं याति । असम्प्राप्ते तु भवत्येव । उत्पथेन पथे गच्छति । अचेष्टायां तु मनसा वनं याति इत्याद्यप्रयोगतो ज्ञेयाः । अत्र वार्थविषयविधिविकल्पादिकं व्याकरणान्तरे ... ऽवसेयम् ॥ १४ ॥

अन्यआदियोगे पञ्चमी ॥ (क) अन्ये ज्ञानात् मुक्तिः ॥ अन्या गृहाद्विहारः ॥ आराद्वनात् ॥ इतरो ग्रामात् (ख) ॥ १५ ॥

(च०) अथ पञ्चमी—अन्ये इति । ज्ञानादन्ये मुक्तिर्न भवतीति शेषः । अत्र अन्येशब्दयोगे ज्ञानादिति पञ्चमी । आदिशब्दात् गृहादन्या विहारः विहरणं । विनायुक्तयोगेऽपि । विनाकामात् । पृथग्ग्रामात् । एवं भिन्ना ग्रामादिति । इतरो ग्रामात् । प्राक् ग्रामात् । दक्षिणाहि ग्रामात् । गृहाद्बहिः । आरात् कुमारादित्यादि ॥ १५ ॥

(प्र०) अन आद्यन्योगे पञ्चमीमुदाहरन्नाह । अन्ये ज्ञानादित्यादि । अन्य इति अन्यार्थ... । इतरो भिन्नो वा ग्रामात् । अन्यो देवदत्तात् ... ... पञ्चमी न । आदिशब्दादितरयोगेऽपि ।

(क) [illegible]

(ख) [illegible]

पूर्वो ग्रामात् । अथ ग्रामात्पूर्वः । दक्षिणेत्याजन्तनिपात । दक्षिणाहीत्याजन्तनिपातः । विप्रयोगेऽपि । दक्षिणा ग्रामात् । दक्षिणाहि ग्रामात् । आरम्भार्थयोगे बहिर्योगे च । प्रभृत्यारभ्य प्रभृतिप्रभृति वा सेव्यो हरिः ग्रामाद्बहिः । ग्रामाद्बहिर्वासयोग । कस्मात् कथा आगत । तथा प्रतियोगे प्रतिनिधिप्रतिदाने पञ्चमी । प्रद्युम्नः कृष्णात्प्रति । कृष्णसदृश इत्यर्थः । प्रतिदाने च । तिलेभ्यः प्रतियच्छति माषान् । तिलान् गृहीत्वा माषान् ददातीत्यर्थः । पृथग्विनानानायोगे पञ्चमी तृतीया द्वितीया च । पृथग्विना नाना ग्रामात् ग्रामेण ग्रामं वा । तथा असत्त्ववचनानां स्तोकाल्पकृच्छ्रकतिपयानां करणे वा । स्तोकात् स्तोकेन असत्त्वे च कृच्छ्रात्कृच्छ्रेण कतिपयात्कतिपयेन वा मुक्तः । द्रव्यवाचित्वे तु स्तोकेन विषेण हत इत्यादि । दूरान्तिकार्थेभ्यः प्रातिपदिकार्थे द्वितीयापञ्चमीतृतीयाः स्युः । ग्रामस्य दूरं ग्रामस्यान्तिकं दूरात् दूरेण वा । अन्तिकादन्तिकेन वा तथा वारणार्थानां धातूनां प्रयोगे वारयितुमिष्टात् । यवेभ्यो गां वारयति । यद्भिमित्तमात्मनोऽदर्शनमिच्छति ततोऽपि । मातुर्निलीयते कृष्णः । तथा विद्याख्योकारेऽध्यापकात् । उपाध्यायादधीते । अध्वकालपरिमाणे तत्र पञ्चमी तद्युक्तात्काध्वनः प्रथमासप्तम्यौ स्तः कालात्सप्तमी । स्वाद्ग्रामो योजने वा । कार्त्तिक्या आग्रहायणी मासे इत्यादि प्रयोगाद्गम्यतेवम् । विकल्पादिकं च पूर्वप्रकाशात् ॥ १५ ॥

निर्धारणम् ॥ क्रियागुणजातिभिः समुदायात्पृथक्करणं यतस्तत्र षष्ठी । क्रियापराणां भगवद्दासाश्रयः श्रेष्ठः । गवां कृष्णा गौः सम्पन्नक्षीरा ॥ एतेषां क्षत्रियः शूरतमः ॥ १६ ॥

(प) अथ षष्ठ्यर्थप्रसङ्गे निर्धारणं व्याचष्टे निर्धारणमिति । निर्धीयते पृथक्क्रियतेऽनेनेति निर्धारणं । काभिः ? क्रियागुणजातिभिः । क्रिया कल्याणादिका गमनस्थानादिका । गुणो रूपादिः । जातिर्ब्राह्मणादिः । ततः क्रिया च गुणश्च जातिश्चेत्यादिना द्वन्द्वः । तत एताभिः कृत्वा यत्समुदायात् बहूनां समुदायात् पृथक्करणमेकस्य तन्निर्धारणमुच्यते । तदर्थे षष्ठीविभक्तिर्भवतीति । तत्रोदाहरणम्—क्रियासु पराः क्रियापरास्तेषां इत्यर्थः । तेषां मध्ये यो भगवद्दासानुरक्तस्य आराधकः स एव श्रेष्ठः प्रथमः । अत्र सामान्यक्रियापरेषु भगवदाराधकत्वरूपक्रियया पृथक्करणे क्रियापरशब्दस्य षष्ठी । गवां धेनूनां मध्ये या कृष्णा गौः सा सम्पन्नक्षीरा बहुदुग्धा । अत्र गोशब्दस्य कृष्णगुणेन निर्धारणे षष्ठी । एतेषां क्षत्रियः शूरतम इति । एतेषां सर्वजातीयानां पुरुषाणां मध्ये क्षत्रियोऽतिशयेन शूर इति शूरतम । अत्र जात्या निर्धारणे षष्ठी । व्याकरणान्तरमते तु निर्धारणे सप्तम्यपि भवतः ॥ १६ ॥

(प्र०) निर्धारणादौ षष्ठीं दर्शयितुं निर्धारणं तावद्व्याचष्टे । निर्धारणमित्यादि । क्रियया गुणेन जात्या वा धर्मविशेषेण निर्धार्यमाणस्य समुदायाद्विभजनं निर्धारणमित्यर्थः । तत्र षष्ठी चकारात्सप्तम्यपि । सा चाश्रयभूतात्समुदायादेव न त्वितरस्मात् । ननु निर्धार्यमाणोऽप्यवयवः समुदायान्तर्गत इति यदा आधारत्वेन विवक्ष्यते तदा आधार

त्वेव सूत्रे मार्गेणैवास्पदमो स्यात् । यदा त्वाख्यानस्यैकमात्रं विवक्ष्यते तदा तुरगस्य मार्गेतिवत्सम्बन्धे इत्येव षष्ठी स्यादिति] बोध्यम् । तस्य प्रयत्नार्थत्वात् क्रियोत्पादकतया समासनिवेशार्थत्वाच । क्रियागुणजातिभिरित्यस्य सम्बन्धिकत्वात् कर्माणां छात्राणां देवदत्तः पटुरित्यादौ [illegible] व्यवच्छेदे भवत्येव । क्रमेणोदाहरति क्रियाणामित्यादि । आराधनक्रियया कृष्णगुणेन प्रमिहस्वरात्या च मनस्तापद्यते दत्तो निर्दिश्यते जातिशब्दात्मविवक्षायामिति । अतो [illegible] । तथा भावकर्तृकाणां ज्वरिरोगाणां रुजार्थानां कर्मणि । चौरस्य रुजति रोगः । भावकर्तृकाद्यन्यत्र भयोद्भूते रुजति कर्मविवक्षायां तु चौरं रुजत्येव । तथा नाथतेः कर्मण्याशिषि । सर्पिषो नाथते । सर्पिर्मे भूयादिति प्रार्थयते इत्यर्थः । अन्यत्र तु नाथति । याचन इत्यर्थः । तथा जासिः निप्रहणनाटक्राथपिषां हिंसायाम् । जासेः निहन्तेः प्रहन्तेः नाटयतेः क्राथयतेः पिनष्टेश्च कर्मणि हिंसायाम् । चौरस्योज्जासयति । निप्रहन्ति । निहन्ति । प्रहन्ति । प्रणिहन्ति । नाटयति । क्राथयति । पिनष्टि वा । हिंसायां किम् । धानाः पिनष्टि । अवहन्तीत्यर्थः । तथा व्यवहृपणोः समर्थयोर्द्यूतार्थयोरेव कर्मणि । शतस्य व्यवहरते पणते वा । अन्यत्र शलाकां व्यवहरति । विक्षिपतीत्यर्थः । ब्राह्मणं पणायति स्तौतीत्यर्थः । शतस्य दीव्यति । [illegible] शतस्य वा । शतं शतस्य वा प्रतिदीव्यति । तथा कृत्योऽर्थप्रयोगे कालेऽधिकरणे । पञ्चकृत्वोऽह्नो भुङ्क्ते । अधिकरणविवक्षायां तु द्विरह्न्यधीते इत्यादि [illegible] ॥ १६ ॥

स्वामित्वे षष्ठीसप्तम्यौ ॥ गोषु स्वामी गवां स्वामी ॥ गवामधिपतिः गोष्वधिपतिः ॥ १७ ॥

(५०) स्वामित्वे षष्ठीसप्तम्यौ ॥ स्वामिनो भावः स्वामित्वं तस्मिन् षष्ठीसप्तम्यौ स्तः । स्वरात् षष्ठी भवति । गोषु स्वामी गवां स्वामी । एवं गोष्वधिपतिः गवामधिपतिः इत्यादि बोध्यम् । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च षष्ठीसप्तम्यौ भवतः ॥ १७ ॥

(५१) [illegible] षष्ठीसप्तम्यौ च इत्यादि । [illegible] ॥ १७ ॥

कर्तृकर्मणोः कृद्योगे कृति षष्ठी ॥ कर्तरि कर्मणि च षष्ठी विभक्ति-

र्भवति क्तादिवर्जितकृदन्ते शब्दे प्रयुज्यमाने ॥ व्यासस्य कृतिः । भारतस्य श्रवणम् (क) ॥ १८ ॥

(च०) पुनः षष्ठ्या अर्थान्तरमाह—सूत्रम्—कर्तृकर्मणो० ॥ कर्ता च कार्यं च कर्तृकार्ये तयोः । सप्तम्यद्विवचनान्तम् । क्तादि इत्यत्र 'स्वरहीनं०' इत्यादि । क्त इत्यादि प्रत्ययस्य आदिर्यस्य सः क्तादिः न क्तादिः अक्तादिः तस्मिन् सप्तम्येकवचनान्तम् । 'कृतौ हिन्' इति लोपः । स्वरहीनं परेण 'नामिनोऽरः' 'स्वरहीन०' ॥ इति सप्तम्येकवचनान्तम् । स्वरहीनं० ॥ अथ षष्ठी । षष्ठी एकपादपूरणी षष्ठी । प्रथमैकवचनान्तम् । हलोप ०' सिद्धम् ॥ कर्त्रोरिति । प्रागुक्तलक्षणे प्रधाने क्रियाश्रये अर्थे तथा कार्ये कर्मणि षष्ठीविभक्तिर्भवति । क सति ? कृदन्ते सति । कृत् तृतीयाकृत्प्रत्ययः प्रत्ययसमूहः अन्तः यस्य स कृदन्तस्तस्मिन् कृदन्ते शब्दे प्रयुज्यमाने व्यवधाने सत्यपि भावः ॥ कथंभूते कृदन्ते शब्दे ? क्तादिवर्जित क्तप्रत्ययादिरहिते । क्तादीत्यादिशब्दात् क्तवतु ईयसुन् वसु शतृ शानचौ क्त्वा समासे ल्यप् तुम् इष्णु स्नु कु इत्यादि कृत्प्रत्ययान् विहाय अन्येषु कृत्प्रत्ययान्तेषु परेषु सत्सु इत्यर्थः ॥ तत्रोदाहरणम्—व्यासस्य कृतिः, व्यासेन क्रियते स्म इति । अत्र व्यासः कृतेः कर्ता । ततः कृतिरिति कृत्प्रत्ययान्ते शब्दे प्रयुज्यमाने व्यासस्येति कर्तरि षष्ठी । एवं भारतस्य श्रवणं भारतं शृणोतीति । श्रवणमिति युडन्ते कृदन्ते प्रयुक्ते भारतस्येति कर्मणि षष्ठी । क्तोऽभवत्यपि कृदन्तत्वात् षष्ठी ॥ क्तादावित्ति किम् । त्वया कृतम् । ग्रामं प्राप्तः । अत्र यथाक्रमं कर्तरि कर्मणि च तृतीयाद्वितीये क्तप्रत्ययान्तत्वात् । आदिशब्दात् क्तवतुशानच्शतृक्त्वाल्यप्तुमुन्इष्णुकुरन तुम् ल्यप् ... तेष्वपि अन्येषु परेषु षष्ठी न भवति किन्तु द्वितीयैव । ग्रामं गतवान् । ग्रामं पचमानः । ग्रामं पेचिवान् । पुत्रं पश्यन् । हरिं दिदृक्षुः । आत्मानमलङ्करिष्णुः । दैत्यान् घातुकः । दानवान् जिष्णुः । देवं नत्वा । पुरं प्राप्य । ग्रामं गन्तुम् । इष्णुगुन्क इत इत्यादिस्तपुराद्वदन्तान्ययपेक्षया ॥ द्विषः शतुर्वा षष्ठी मुरस्य मुरं वा द्विषन् ॥ १८ ॥

(प्र०) कर्तृकार्ययोरिति । क्तादाविति आदिशब्दात् क्तवतु किं वा इष्णु ... तुम् ... कृदन्तेऽपि षष्ठी न भवति । कर्मादिषु ... इत्यादयो गृह्यन्ते । क्रमेण प्रत्युदाहरणम् । त्वया कृतम् । ग्रामं गतः सर्वे । ग्रामं गतवान् विष्णुः । हरिं दिदृक्षुः । अलङ्करिष्णुरिदम् । दैत्यान् घातुकः । ... सुखं वर्द्धनम् । हरिं प्रणम्य । लक्ष्मीमिच्छन् । मांसं विभाजः । ... । ईश्वरः प्रणमी हरिणा । विश्वं कर्त्ता । ... । ... सामान्यतया ... षष्ठी । ... ईश्वरस्येत्यादौ च न । ... इति ... । तथा ... षष्ठी । ... । ... । ... ।

(क) ... इति ... पुस्तके ॥

योगे षष्ठी । सरस्याः कामुकः । तथा द्विष धातुर्वा । चरस्य घरं वा द्विषन् । कृत्यानां प्रयोगे कर्तरि वा । मया मम वा सेव्यो हरि । उभयप्राप्तौ कृत्ये षष्ठी न । नेतव्या व्रज गावः कृष्णेन । कृत्कर्मणोरुभयोः प्राप्तिर्यस्मिन् इति तद्योगे कर्मणि षष्ठी । आश्चर्यो गवां दोहोऽगोपेनेत्यादि ज्ञेयम् ॥ १८ ॥

स्मृतौ च कार्ये ॥ स्मृत्यर्थे धातौ प्रयुज्यमाने च कार्ये षष्ठी भवति ॥ मातुः स्मरति ॥ १९ ॥

(च०) स्मृतौ च कार्ये' स्मृत्यर्थ'स्मृ स्मरणे' इति धातुयोगे कार्ये कर्मणि विषये षष्ठी विभक्तिर्भवति । उदाहरणम्—मातुः स्मरति मातुः स्मर्तव्ये षष्ठी । चकाराद् द्वितीयापि कर्मणि भवति—मातरं स्मरति ॥ 'तृप्त्यर्थानां करणे वा षष्ठी' फलैः फलानां वा तृप्तः । अद्भिः अपां वा तृप्तः ॥ १९ ॥

(प्र०) स्मृताविति । स्मृतावित्यर्थग्रहणम् । ततश्च स्मरणार्थधातुयोगे कर्मणि षष्ठीत्यर्थः । चकाराद्दयेशोरपि । सर्पिषो दयते । जगतामीष्टे । कर्मत्वविवक्षायां तु मातरं स्मरति । ननु कर्मत्वविवक्षायां सम्बन्धमात्रविवक्षायां षष्ठीसिद्धावानर्थक्यमेतस्येति चेत्सत्यम् । एतदारम्भसामर्थ्यादुपपदविधानषष्ठ्या न समास इति सूचनात् । तत्र मातुः स्मरणमित्यादौ समासाभावः ॥ १९ ॥

हेतौ तृतीया पञ्चमी च वक्तव्या ॥ अनित्यः शब्दः कृतकत्वेन कृतकत्वात् ॥

(च०) हेतौ साधने तृतीयापञ्चम्यौ भवतः । इह किल प्रतिज्ञा-हेतु दृष्टान्त उपनय निगमन भेदादनुमानस्य पञ्चावयवाः । तत्र पक्षवचनं प्रतिज्ञा । प्रतिज्ञासाधको हेतुः (क) । यथा पर्वतोऽयं वह्निमान् । कस्मात् ? धूमवत्त्वात् । अयं पर्वतो वह्निमानिति प्रतिज्ञा । सा च धूमवत्त्वेन हेतुना साध्यत इति । तत्र हेताविति द्वितीयानुमानावयवे तृतीया पञ्चमी च भवति । तत्रोदाहरणम्—अनित्यः शब्दः इति प्रतिज्ञा । कृतकत्वेन कृतकत्वादिति हेतुः । तत्र तृतीया विकल्पेन पञ्चमी । हेतुत्वादिति प्रस्तावाच्छेषा अपि त्रयोऽवयवा व्यज्यन्ते । ते चामी—यो यः कृतकः स सोऽनित्यः यथा घट इति दृष्टान्तः । कृतकोऽयमित्युपनयः । तस्मादनित्यश्चायमिति निगमनम् (ख) ॥

(प्र०) हेताविति साध्यसाधक इत्यर्थः । शब्दे अनित्यत्वं साध्यम् । कृतकत्वं हेतुः । अनित्यस्य इति प्रथमप्रयोज्यश्च साध्यस्यापोतमायेत्यशेष ॥

अपहेतौ पञ्चमी च वक्तव्या ॥ चौराद्बिभेति ॥ व्याघ्राद्बिभेति ॥ विद्युत्पाताच्चकितः ॥ ॥

(क) तदुक्तं न्यायसूत्रम्—"साध्यनिर्देशः प्रतिज्ञा" इति "उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः" "तथा वैधर्म्यात्" इति च ।

(ख) "साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्" "तद्विपर्ययाद्वा विपरीतम्" उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः" "हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्"—इति न्यायसूत्राणि ॥

(च०) भयेतौ भयस्य कारणे पञ्चमी । भयस्य हेत्वर्थः पञ्चम्युपचारितमित । कारणत्वात्तस्मिन्नर्थे पञ्चमी विभक्तिर्भवति । चौराद्बिभेति । व्याघ्रात्त्रस्यति । विषस्यातात्र स्ति । अत्र भयहेतौ अपाये पञ्चमी ॥

(प्र०) भयहेताविति । भयस्य हेतुः कारणं तत्र पञ्चमीत्यर्थः । भयेत्युपलक्षणं जुगुप्साविरामप्रमादार्थानां तत्र । पापाज्जुगुप्सते । पापाद्विरमति । धर्मात्प्रमाद्यति ॥

षष्ठी च हेतुप्रयोगे ॥ हेतुप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् ॥ कस्य हेतोरिह वस्ति ॥ २० ॥

(च०) षष्ठी हेतुप्रयोगे च ॥ हेतुशब्दस्य प्रयोगे हेतुशब्दे प्रयुज्यमाने षष्ठी भवति । कस्य हेतोरिदं कन्या । कस्य निमित्तमित्यर्थः । चकारात्सर्वा हेतुप्रयोगे तृतीयापञ्चम्यौ स्तः । केन हेतुना । कस्य हेतोः । निमित्तकारणहेत्वर्थप्रयोगे सर्वाः सर्वा विभक्तयो भवन्ति । को हेतुः । कं हेतुं वसति । केन हेतुना । कस्मै हेतवे । कस्माद्धेतोः । कस्य हेतोः कस्मिन् हेतौ इत्यादि ॥ २० ॥

(प्र) षष्ठी च हेतुप्रयोगे इति । प्रयोगस्य सम्बन्धमत्वार्थे हेतुशब्द एव गृह्यते न हेत्वर्थः । चकारात्सर्वादियोगे तृतीयापि । कस्य हेतोः केन हेतुनेत्यादि । सर्वनाम्नो हेतुप्रयोगे द्वितीयाव्यतिरिक्ता सर्वा विभक्तयो निमित्तकारणहेत्वर्थे भवन्तीति भाष्य व्याख्यानम् । को हेतुः । केन निमित्तेन । कस्मै कारणायेत्यादि । सर्वासामप्रयोगेऽपि प्रातिपदिकमात्रात्तृतीयाद्य इति केचित् । ज्ञानेन निमित्तेन हरिः सेव्यः ॥ २० ॥

इत्थम्भावे तृतीया ॥ शिष्यं पुत्रेण पश्यति ॥ ससारमसारेण पश्यति ॥ २१ ॥

(च०) 'इत्थम्भावे तृतीया' इति । प्रकारमनेनेति इत्थंभावस्तस्मिन्नर्थे तृतीया विभक्तिर्भवति । उदाहरणम्—शिष्यं पुत्रेण पश्यति पुत्रसदृशं पश्यति । पुत्रमिवेति भावः । अत्र अयं प्रकारः इत्थम् तस्य भावः इत्थंभावः । सामान्यस्य भेदको विशेष प्रकारः किञ्चित्प्रकारं प्राप्तः इत्थंभावः । यथा मनुष्यत्वसामान्यभेदको विशेष शिष्यत्वं, तस्मिन् पुत्र इति न भवति किन्तु तद्वत्स्नेहः प्रकारेणोच्यते इति । आचार्यः शिष्यं पुत्रेण पश्यति पुत्रमिव पश्यतीत्यर्थः । एवं ससारमसारेणापि ज्ञेयम् । साधुः संसारमसारमिव पश्यति असारतया पश्यतीत्यर्थः ॥ २१ ॥

(प्र०) इत्थम् अनेन प्रकारेण भवनम् इत्थंभाव तस्मिन्नर्थे तृतीया भवतीत्यर्थः । शिष्यं पुत्रत्वेन ससारमसारत्वेन पश्यतीत्यर्थः ॥ २१ ॥

येनाङ्गविकारः ॥ येन विकृतेनाङ्गेनाङ्गिनोऽङ्गविकारो लक्ष्यते तस्मादङ्गात्तृतीया विभक्तिर्भवति ॥ अक्ष्णा काणः ॥ पादेन खञ्जः । शिरसा खल्वाटः ॥ २२ ॥

(च०) सूत्रम्—'येनाङ्गविकारः' येनेति पञ्चम्यन्तस्य तृतीयैकवचनान्तम् । ‘स्वराम्भे०' ‘स्व अ इ ए'। अङ्गविकारः अङ्गं विक्रियतेऽनेनेत्यङ्गविकारः । प्रथमैकवचनान्तम् ।

'घोति०' 'तस्ये०' सिद्ध सूत्रम् । येन विकृतेनाङ्गेन अङ्गिनो विकारो लक्ष्यते स अङ्गविकारः यतोऽङ्गविकृतिर्लक्ष्यते तस्मात् तस्मादङ्गवाचकात् तृतीया विभक्तिर्भवति । अत्र विकृताङ्ग द्विविधं स्वरूपेण भावितेन चेति । स्वरूपं यथाक्षि । अक्ष्णा नेत्रेण काणः । पादेन खञ्जः । शिरसा मस्तकेन खल्वाटः खल्वाटितः । कर्णे कुणिः । स्वरूपविकृताङ्गादित्युदाहरणद्वयम् । एवं पृष्ठेन त्रिभङ्गः । बाहुना कुब्जः । इत्येवमुदाहरणद्वयमाश्रित्य विकृताङ्गम् ॥ २२ ॥

(प्र०) येनेति । अङ्गानि सन्त्यस्येत्यङ्गी शरीरं येनाङ्गेन तन्माध्यम इत्यनेन निर्दिश्यते स च त्रिकृत एव विकाराद्युदितः येन विकृतेनाङ्गेन विकारः लक्ष्यते तस्मात्तृतीयेत्यर्थः ॥ २२ ॥

जनिकर्तुः प्रकृतिः ॥ जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति ॥ तत्रापादाने पञ्चमी । यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेति (क) ॥२३॥

(च०) अथ पञ्चम्या अर्थान्तरमाह—सूत्रम्—'जनिकर्तुः प्रकृतिः ॥' जनिकर्तुः जने उत्पत्तेः कर्ता जनयिता: क्रियायाः कर्ता उत्पद्यमानं वस्तु जनिकर्ता तस्य जायमानस्य कार्यस्य । 'कर्ता च वाः' अस्य कः क्रियाविशिष्टः । स्वाहोऽ०' 'ष्यादि०' । प्रकृतिः इत्येकवचनान्तम् । 'ध्यादि०' ॥ सिद्धं सूत्रम् । 'जनिकर्तुः प्रकृतिरपादानम्' इत्येव वा सूत्रम् अथ वृत्ति —जनिकर्तुरिति । कोऽर्थः ? जायमानस्य जायमानमुत्पद्यमानं यत्कार्यं तस्य प्रकृतिरुपादाने मूलकारणं तदपादानसंज्ञं भवति । तत्र अपादाने पञ्चमी विभक्तिर्भवतीति शेषः । यदुत्पत्त्यर्थे कर्ता स जायमानः सन् कार्यं भवति तस्य प्रकृतिः कारणं पञ्चमी । उदाहरणम्—'यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेत्यभिधीयते ।' प्रजायन्ते इति जनि धातुपदं प्रजा इति जनिकर्तृपदम् जायमाने कार्यत्वात्, तस्य प्रकृतिर्यच्छब्दनिर्दिष्टं ब्रह्म । ततो यस्मादिति मूलकारणत्वात् प्रकृतिपदस्य पञ्चमी ॥ २३ ॥

(प्र०) जनिकर्तुरिति । जननं जनि जन्यर्थस्य कर्ता जनिकर्ता स च जायमान एवेत्यभिप्रेत्याह । जायमानस्य कार्यस्येत्यादि । अपादानमत्र करणमात्रं सूत्रेण न सम वायिकारणम् । पुत्रात्प्रमोदो जायत इत्यादौ तदभावादप्रसङ्गात् । अपादानम् अपादाने पञ्चमीति सूत्रद्वयानुसारेणोक्तम् । अपादानश्च स्यात्तत्रापादाने पञ्चमीति ॥ २३ ॥

आङादियोगे च ॥ आङादियोगे पञ्चमी विभक्तिर्भवति ॥ आपा टलिपुत्राद्वृष्टो देवः ॥ २४ ॥

(च०) 'आङादियोगे च' ॥ आङुपसर्गादियोगे पञ्चमी । आदिशब्दात् आङ् अप परियोगे । आङ उपसर्गो मर्यादायाम् अभिविधौ च वर्तते । तत्र तेन विनेति मर्यादा । तेन सहेत्यभिविधिरिति भेदः । तत्रोदाहरणम्—आपाटलिपुत्रादिति आपाटलिपुत्रं नगरं मर्यादीकृत्य तस्मादर्वागित्यर्थः, अभिव्याप्य वा देवो मेघो वृष्ट इत्यर्थः ॥ पर्यपायोर्वर्जने पञ्चमी ।

(क) 'यतो वा इमानि भूतानि जायन्ते' इत्यत्रापि उपादानस्यापादानत्वेन पञ्चमी । तच्च उपादानं च स्यापादानत्वेन बोध्यम्, स्वप्रधानतया निमित्तत्वात् । यथा मृदा स घटः कार्यं मते स्वप्रधानतया निमित्तमपि स्वप्रतियोगि वस्तूपादानं च भवति ॥—इति श्रीमद्वेदान्तसिद्धान्त ॥

पर्दयो वर्जनार्थे । परि त्रिगर्तेभ्यो देवो वृष्टः । अप त्रिगर्तेभ्यो वृष्टो देवः । त्रिगर्तदेशान् वर्जयित्वा वृष्ट इत्यर्थः । 'आङि मर्यादायां' इत्यनेनार्थः ॥ विभाषयोर्कार्थे मात्रयानुः पञ्चमी स्यात् । कथाख्यायाद्योत ॥ २४ ॥

(प्र०) आङादियोगे चेति । मर्यादाभिविध्यर्थकाङ्योगे पञ्चमी । आदिना वर्जनार्थकापपर्योर्योगेऽपि । अप हरेः परि हरेः संसारः । हरिं वर्जयित्वा संसार इत्यर्थः । तथा भूषणैः प्रभवादिरिति । हिमवतो गङ्गा प्रभवति । तत्र प्रथमं दृश्यत इत्यर्थः । तथा पततेः प्रयोगेऽप्यपादानत्वं विवक्षायां [illegible] इत्यादि ज्ञेयम् ॥ २४ ॥

तादर्थ्ये चतुर्थी वक्तव्या(क) ॥

> संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ।
> धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये ॥ १ ॥

(च०) अथ पुनश्चतुर्थीमाह— तादर्थ्ये इति ॥ सोऽर्थो यस्य तस्य तदर्थस्य भावस्तादर्थ्यम् । यद्वा स एवार्थस्तदर्थस्तस्य भावस्तादर्थ्यम् । यद्वा तस्मै कार्याय इदं कार्यं तदर्थं तस्य भावस्तादर्थ्यं तस्मिंस्तादर्थ्ये अर्थे वाच्यमाने चतुर्थी विभक्तिर्भवति । तस्योदाहरणं श्लोकेन—संयमायेति । नरो मनुष्यः श्रुतं शास्त्रं धत्ते । कस्मै ? । संयमाय संयमार्थमित्यर्थः । धर्माय धर्मार्थं संयमं धत्ते । मेधावी बुद्धिमान् मोक्षाय मोक्षार्थं धर्मं धत्ते । धनं दानाय तथा भुक्तये भोगाय धत्ते । अत्र संयमादीनां तादर्थ्ये चतुर्थी ॥

(प्र०) तादर्थ्ये इति । तच्छब्देन कार्यं निर्दिश्यते । तस्मा इदं तदर्थं तदर्थस्य भावः कारणस्य कार्यसम्बन्धः । तत्र चतुर्थी वक्तव्या ॥

क्रुध्यादियोगे च ॥ कृष्णाय क्रुध्यति ॥ विप्राय द्रुह्यति । पुत्राय कुप्यति । गुणवते असूयति ॥

(च०) क्रुध्यादिधातुयोगेऽपि चतुर्थी । क्रुधिद्रुहीर्ष्यासूयार्थानाम् [illegible] क्रुध्यादयः । कृष्णाय क्रुध्यति कं प्रति कोपं करोतीत्यस्मिन्नर्थे क्रुध्यादियोगे कर्मणि चतुर्थी । आदिशब्दात् विप्राय द्रुह्यति । गुणवते पुत्राय असूयतीत्यादि । दानवाय [illegible] चतुर्थी । पुत्राय कुप्यति । क्रुधादेरन्येऽप्याहुः । [illegible] । इति भेदः । 'सोपसर्गयोस्तु क्रुधद्रुहोर्योगे चतुर्थीप्रतिषेधो वक्तव्यः' । कृष्णमभिक्रुध्यति । विप्रमभिद्रुह्यति । [illegible] चतुर्थीति सूचितम् । [illegible] । [illegible] । मित्राय तिष्ठति । [illegible] भूषयति इति । [illegible] । [illegible] इत्यादि ज्ञेयम् ॥

कोपादयो [illegible] चतुर्थी । [illegible] विदुर, [illegible]इत्यर्थः ॥

(क) [illegible]

(प्र०) क्रुधादियोगे चेति । क्रुधद्रुहेर्ष्यासूयार्थानां क्रुधादयस्तद्योगे च प्रति कोपस्तत्रचतुर्थी वाच्येत्यर्थः । ततश्च भार्यामीर्ष्यतीत्यादौ तां प्रति कोपाभावाच्चतुर्थ्यभावः । सोपसर्गयोस्तु क्रुधद्रुहोर्द्वितीयैव । क्रूरमभिक्रुध्यति । अभिद्रुह्यति । एवमायुष्यमद्रभद्रकुशलसुखार्थहितयोगेऽप्याशिषि चतुर्थी षष्ठी च । कृष्णाय कृष्णस्य वा हितं जीवितं भूयादित्यादि ॥

तुमन्तलोपे चतुर्थी । फलेभ्यो याति, फलान्याहर्तुं यातीत्यर्थः ॥

(च०) तुमर्थाच्च भाववचनात् । यागाय याति । य॒ष्टुं यातीत्यर्थः ॥ मन्यतेः कर्मण्यनादरे वा चतुर्थी । न त्वां तृणाय मन्ये इत्यर्थः ॥ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ । ग्रामं ग्रामाय वा गच्छति ॥

क्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्या ॥ हर्म्यात् प्रेक्षते । हर्म्यमारुह्य प्रेक्षत इत्यर्थः ॥ [आसनात्प्रेक्षते । आसने उपविश्य प्रेक्षत इत्यर्थः] ॥

(च०) 'क्यब्लोप इति' ॥ क्यबर्थो वाच्यमानः क्यबन्ताप्रयोगः क्यब्लोपस्तस्मिन्सति पञ्चमी वक्तव्या । यत —'क्यबर्थो दृश्यते यत्र क्यबन्तं न प्रयुज्यते । स एव क्यब्लोपः स्यादिति प्रोक्तं मनीषिभिः ।' क्यब्लोपे कर्मण्यधिकरणे पञ्चमी वक्तव्या । उदाहरणम्—हर्म्यात्प्रेक्षत इति ॥ कोऽर्थः ? । हर्म्यं गृहमारुह्य प्रेक्षते पश्यतीत्यर्थः । एवमासनात्प्रेक्षते आसने उपविश्य पश्यतीत्यर्थः ॥

(प्र०) क्यब्लोप इति । यत्र क्यबर्थः प्रतीयते स च न प्रयुज्यते स च क्यब्लोपः तस्मिन् सति कर्मण्यधिकरणे च पञ्चमी वक्तव्येत्यर्थः । हर्म्यमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः ॥

निमित्तात्कर्मयोगे च सप्तमी वक्तव्या ॥

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः (क) ॥

विषये च(ख) ॥ तर्के चतुरः ॥

(च०) सप्तमीमाह—निमित्तादिति । निमित्तं नाम प्रयोजनं तस्मान्निमित्तात् प्रयोजनवाचिनः शब्दात् कर्मयोगे सप्तमी वक्तव्या । तत्रोदाहरणम्—चर्म० । चर्मणीति चर्मनिमित्तं द्वीपिनं चित्रकं हन्ति विनाशयति । दन्तयोर्दन्तनिमित्तं कुञ्जरं हस्तिनं हन्ति । केशेषु केशनिमित्तं चमरीं गां हन्ति । सीम्नि सामार्थं सीमानिमित्तं पु-

---

(क) [illegible]

(ख) विषयेऽप्यथ्य ॥

चक्रको नाम ग्रामाधिपति इतो मारितः ॥ विषये यथा । विषये विषयार्थे गम्यमाने सप्तमी विभक्तिर्भवति ॥ उदाहरणम्—तर्के तर्कविषये चतुरो निपुणः । अत्र तर्कः क्रिया अपत्याभावादाधिकरणं ततो विषये सप्तमी ॥

(प्र०) निमित्तादिति । निमित्तात्प्रयोजनवाचिशब्दात्कर्मणो योगे सप्तमी वक्तव्येत्यर्थः । चर्मणीत्यादौ इननिमित्तात्कर्मादेः द्वीप्यादिकर्मयोगे सप्तमी समभूत् । सीम निमित्तं पुष्कलकः पाषाणो हतो निहितः । केचित्तु । "गुल्मेपूत्ताले वा सीमेति प्रोच्यते बुधैः । पुष्कलो मृगभेदः स्यात्कस्या सौगन्ध्यहेतुकः ॥" सीम्नि गुल्मेऽस्तरकान्यत्र निमित्तं पुष्कलो मृगविशेषः इतो घत इत्याहुः । विषये यथा । क्रियापदाप्रयोगे कथं कर्मोपसंभवे तदाधारत्वात्कथमाधारत्वम्? । तर्कचतुर इति । तर्कविषयं चातुर्यमस्येत्यर्थः । चकारात्साध्वसाधुप्रयोगे । साधुः कृष्णो मातरि । असाधुर्मातुले । तथा इह प्रयोगे कर्मणि । अधीती व्याकरणे इत्यादि ॥

षष्ठीसप्तम्यौ चानादरे ॥ बहूनां क्रोशतां गतश्चौर ॥ बहुष्व साधुषु वदत्स्वपि स्वयमार्यो याति साधुमार्गेण ॥ बहुषु साधुषु वदत्स्वपि स्वयमनार्यो यात्यसाधुमार्गेण ॥ मातापित्रोः रुदतो प्रव्रजति पुत्र ॥ २५ ॥

(च०) षष्ठी० । अनादरे क्रियमाणे सति षष्ठी सप्तमी च भवति । तयोरुदाहरणम्—बहूनां जनानां क्रोशतां सतां च चौरो गतः । बहून् जनान् आक्रोशतोऽवज्ञाय अनादृत्येत्यर्थः । बहुषु साधुषु निवारयत्स्वपि निषेधयत्स्वपि आर्यः साधुः स्वयमात्मना साधुमार्गेण यातीत्यत्रानादरे सप्तमी । बहुषु साधुजनेषु वदत्स्वपि कथयत्स्वप्यनार्योऽसाधुः स्वयमात्मना असाधुमार्गेण असमीचीनमार्गेण याति । बहुषु साधुजनेषु अनादरं कृत्वा गच्छतीत्यर्थः । एवं मातापित्रोः रुदतो प्रव्रजति पुत्र इत्यादि ज्ञेयम् ॥ इष्यन्ते कर्मण्यपि सप्तमी अधीती व्याकरणे ॥ २५ ॥

(प्र०) षष्ठीसप्तम्यौ चानादर इति । अनादरे षष्ठी सप्तमी च वक्तव्येत्यर्थः । अनादरस्तु अवज्ञविवेकाविवेकजत्वात् द्विधा इति चेतसि कृत्वोदाहरणद्वयमाह । बहूनामित्यादि । बहून् आक्रोशतोऽनादृत्य गत इत्यर्थः । आर्यो विवेकी विवकादसन्मार्गमनादृत्य सन्मार्गेण यातीत्यर्थः । अनार्यं इत्यत्राविवेकादनादर । सन्मार्गस्य प्रवृत्ति इत्य स्यति । इत्यविवेकाद्वा । चकारात्कारकद्वयमध्यस्थात्कारकशब्दात् सप्तमीपञ्चम्यौ । अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद्वा भोक्ता । अत्र कारकं नाम क्रियानिमित्तभूता शक्तिः । तत्र अद्य भुजिक्रियायाः कर्तरि द्वे शक्ती व्यवस्थिते । एका अद्य भुजेः साधनभूता । अपरा द्व्यहेऽतीत इति भिन्नयोर्द्वयोः कारकशक्त्योर्मध्ये कालः । अथवाधिकरणकर्तृकारकद्वय मध्यस्थः । एवमिहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् । अत्रापीहस्थलक्ष्ययोः कर्तृकर्मकारकयोर्मध्येऽध्वा । तथा अधिकयोगेऽपि । लोके लोकाद्वा अधिको हरि इत्यादि प्रयोगनबसातूकम् ॥ २५ ॥

अन्योक्तः प्रथमा ॥ यदेदं कार्यादि येनान्यभावेन कृता चोक्ता भवति तदा प्रथमा प्रयोक्तव्या ॥ घटः क्रियते । घटः कार्यः ॥ २६ ॥

(च०) सूत्रम्—'अन्योक्ते प्रथमा' ॥ अन्योक्तमन्येनोक्तमन्योक्तं तस्मिन्। सप्तम्येकवचनान्तम्। 'अ इ ए'। प्रथमैकवचनान्तम्। 'आप' इति लोपः। सिद्धं सूत्रम्। अन्योक्त इति पदं व्याचष्टे—यदिति। यदा इदं कार्यादि कर्मादिकारकम्। अन्येनेति केनार्थः। आख्यातेन द्वितीयवृत्त्युक्तसूत्रनिष्पन्नेन तप्रत्ययान्तधातुरूपेण, कृता च तृतीयवृत्तिसाधितशब्देन, चशब्दात् समासेन तद्धितेन च सह यदुक्तं भवति तदुच्यते तदा तस्मिन् कर्मणि प्रथमा विभक्तिर्भवति। अर्थात् यत्र तृतीयान्तः कर्ता तत्र कर्मणि प्रथमा विभक्तिर्भवति। उदाहरणम्—कुम्भकारेण घटः क्रियते इत्यत्र घटस्य कार्यत्वात् क्रियते इत्याख्यातोक्तत्वेन कर्मणि प्रथमा। एवं काष्ठकेन कटः कार्यः इत्यत्र कृताभिहितत्वात्कर्मणि प्रथमा। एवं राजा राजते अत्राख्यातेनोक्ते राजा इत्यत्र कर्तरि प्रथमा ॥ २६ ॥

(प्र०) अन्योक्त इति। अन्यैरुक्तमन्योक्तम्। तदेव विवृणोति। यदिदमिति। कृता चेति। चकारात्तद्धितेन समासेन च। तद्धितोक्ते कुङ्कुमेन रक्तं कौङ्कुमम्। समासोक्ते प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः ॥ २६ ॥

छन्दसि स्यादिः सर्वत्र ॥ दधि जुहोतीत्यस्मिन्नर्थे दध्ना जुहोति ॥ पुनन्तु ब्रह्मणस्पतिं ॥ अजवीर्विरेजु ॥ २७ ॥

(च०) छन्दसि कारकानियममाह—छन्द०। छन्दसि वेदविषये स्यादिर्विभक्तिः सर्वत्र सर्वस्मिन्नर्थे व्यत्ययेन च भवति। अत्रापवादत्वान्न विभक्तिनियम इत्यर्थः। उदाहरणम्—दध्ना जुहोतीति। द्वितीयासम्भवे छान्दसत्वात् द्वितीयास्थाने तृतीया। भो लोकाः ब्रह्मणस्पतिं पुनन्तु ब्रह्माणं प्रक्षालयन्तु इति द्वितीयार्थे 'ब्रह्मणस्पति' इति प्रथमा। यद्वा ब्रह्मणस्पतिर्भक्षा 'पुनन्तु'। अत्रैकवचनसम्भवे बहुवचनम्। अत्र 'अजस्यो गाव्यो विरेजु' इति प्रथमाबहुवचनसम्भवे द्वितीयाबहुवचनम्। उक्तं च अजवीर्विरेजुरिति। भागवते दशमस्कन्धे पञ्चमाध्याये कृष्णजन्माधिकारे 'नन्दालयं सवत्सा अजवीर्विरेजु'। एवमन्यान्यपि छान्दसोदाहरणानि अवगन्तव्यानि ग्रन्थगौरवभयान्न लिख्यन्ते। अथ विभक्तीनां क्वचिद्दर्शनं समाहृत्याह—सामान्यलिङ्गवचनाभिधानकर्तृकर्मवाचकानाम्योक्तेषु प्रथमा। कर्मण्यभितः सर्वतः समया परितः प्रतिसमयानिकषाहा बुधिग् उपर्युपरि अधोऽध्यधि अन्तरा अन्तरेण अन्तरा स्मरति कालाध्वनोरत्यन्तसंयोगे अनुप्राप्तिकर्मकप्रवचनीयानुयोगे क्रियाविशेषणे च द्वितीया। करणाधनया सहार्थमन्यथाकर्मनामांशविनार्थतद्योगेषु कृत्विकारकाणार्थोपयोगे निमित्तार्थे कृतादियोगे हेतुत्वभावादिषु तृतीया। दानपात्रे नमः-स्वस्तिस्वाहास्वधालंवषट्तादर्थ्यरुचार्थादिक्रुधद्रुहादियोगे समर्थार्थेष्वगणकीनितरशद्योगेषु च चतुर्थी। विश्लेषावधौ भयाद्यन्यारादितरर्तेदिगर्थदिक्शब्दयोगे अपादाने प्रभृत्यर्थयोगेषु च पञ्चमी। स्वस्वामिसम्बन्धे कृत्कर्मकर्तृस्मरणार्थदयेशादियोगे अवयवादिषु षष्ठी। आधारे भावलक्षणे निमित्तात्कर्मयोगे निर्धारणादिषु सप्तमी। सम्बोधने प्रथमा। सर्वा विभक्तयः संख्यायां वर्तन्ते। नानार्थकवचने बहुवचनं भवति। एको द्वौ वा अस्मदो विवक्षायां बहुवचनम्। गुरौ च एको द्वौ बहुवचनम्। इत्यादि ज्ञेयम्। यथा देव प्रभो वीर विरहतः। अथ अहं आर्यो वनवासी 'वयम्' इति भवति। तथा एकोऽपि गुरु

"पूज्ये गुरवः" इति बहुवचनं भवति ॥ कारकविभक्तिप्रक्रियाविवरणं संक्षेपेण समाप्तिमगात् ॥ १० ॥

(प्र०) स्वतन्त्रोऽति । [illegible] । [illegible] द्वितीया तृतीया । प्रातिपदिकार्थमात्रे प्रथमा । [illegible] द्वितीया इत्यादि । "कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट्" ॥ १७ ॥

इति श्रीमदनुभूतिस्वरूपाचार्यविरचिते सारस्वतप्रसादे कारकप्रकरणं समाप्तम् ॥ १७ ॥

कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ॥
द्वितीया कर्मणि ज्ञेया कर्तरि प्रथमा मता ।
उक्तकर्तृप्रयोगोऽयं स तदा प्रयुज्यते ॥
तृतीया कर्तरि यदा कर्मणि प्रथमा तदा ।
उक्तकर्मप्रयोगोऽयं स तदा परस्मैपदम् ॥

स्वतन्त्रः कर्ता ॥ क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् प्रधानीभूतधात्वर्थाश्रयः कर्ता ॥ साधकतमं करणम् ॥ क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् । कर्तृकरणयोस्तृतीया ॥ अनभिहिते कर्तरि करणे च तृतीया स्यात् ॥ अकथितं च ॥ अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ॥

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः ॥ गां दोग्धि पयः ॥ बलिं याचते वसुधाम् ॥ अविनीतं विनयं याचते ॥ तण्डुलानोदनं पचति ॥ गर्गान् शतं दण्डयति ॥ व्रजमवरुणद्धि गाम् ॥ माणवकं पन्थानं पृच्छति ॥ वृक्षमवचिनोति फलानि ॥ माणवकं धर्मं ब्रूते शास्ति वा ॥ शतं जयति देवदत्तम् ॥ सुधां क्षीरनिधिं मथ्नाति ॥ देवदत्तं शतं मुष्णाति ॥ ग्राममजां नयति हरति कर्षति वहति वा ॥ अर्थनिबन्धनेयं संज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि ॥ अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् ॥ कुरून्स्वपिति ॥ मासमास्ते ॥ गोदोहमास्ते ॥ क्रोशमास्ते ॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् ॥

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम् ॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ।
गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ॥
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥

गौर्दुह्यते पयः ॥ अजा ग्रामं नीयते ॥ बोध्यते माणवकः धर्मं माणवकं धर्ममिति वा ॥ देवदत्तो ग्रामो गम्यते ॥ अकर्मकाणां कालादिकर्मणां च कर्मणि भावे च लकार इष्यते ॥ मासो मासं वा आस्यते देवदत्तेन ॥ णिजन्तेषु प्रयोज्ये प्रत्ययः ॥ मासमास्यते माणवकः ॥ तत्प्रयोजको हेतुश्च ॥ कर्तुः प्रयोजकः कर्तृसंज्ञो हेतुसंज्ञश्च स्यात् ॥ स्वार्थं परित्यज्य अन्यार्थाभिधायित्वमुपसर्जनत्वम् ॥ क्रियाजन्यफलशालित्वं कर्मत्वम् ॥ साक्षात्सम्बन्धेन क्रियान्वयित्वं मुख्यत्वम् ॥ परम्परासम्बन्धेन क्रियान्वयित्वं गौणत्वम् (क) ॥

इति कारकप्रक्रिया सम्पूर्णा ॥ १७ ॥

---

* समासप्रकरणम् ॥ १८ ॥ *

अथार्थवद्विभक्तिविशिष्टानां पदानां समासो निरूप्यते ॥ **समासश्चान्वये नाम्नाम्** ॥ नाम्नामन्वययोग्यत्वे सत्येव समासो भवति ॥ चकाराद्द्वितोऽपि । ततो भार्या पुरुषस्येत्यादौ समासो न भवति (ख) ॥१॥

(क) कर्ताकर्म च इत्यादिगौणत्वमन्तपाठो मूलपुस्तके दृश्यते । स चाध्येतृणां परोपकारकतया-अस्माभिर्नियोजितः ।

(ख) कर्मधारयादिष्वन्यतमत्वं समासत्वमिति केचित् । अन्यतमत्वञ्च भेदकूटावच्छिन्नप्रतियोगिता-कभेदवत्त्वम् । मैवम् । आत्माश्रयत्वात् । आत्माश्रयस्तर्कविशेषः । स्वापेक्षापादकप्रसङ्गः । अन्वाभिधानाश्रित लोपाभावान्यमध्यवर्तिविभक्तिशून्यनामसमुदायत्वं समासत्वमिति पक्षे गौरवात् । जातित्वं घटघटमित्यादा-वव्याप्तेर्जातेश्चाव्याप्तिर्वात् । वस्तुतः समासत्वमखण्डोपाधिविशेषः ।

(च०) तत्र प्रथमं परिभाषामाह—अथार्थेत्यादि ॥ अथ व्याख्या—अथेति कारकानन्तरं समासो निरूप्यते इति सम्बन्धः । तत्र समसनं अनेकेषां पदानामेकपदमित्यादि पदसंक्षेपणं स समासो निरूप्यते कथ्यते । केषां ? पदानां स्यादिविभक्त्यन्तानामेवंविधानां समासो निरूप्यते कथ्यत इति योगः । कथम्भूतानां पदानाम् ? अर्थवन्तीत्यादि । अर्थः प्रथमादीनां लिङ्गादि सोऽस्त्यास्विति अर्थवत्यस्ताश्च ता विभक्तयश्च अर्थवद्विभक्तयस्ताभिर्विशिष्टानि युक्तानि अर्थवद्विभक्तिविशिष्टानि तथा तेषाम् । यद्वा अर्थवन्ति च तानि विभक्तिविशिष्टानि च अर्थवद्विभक्तिविशिष्टानि तेषाम् ॥ अथ सामासस्य याथार्थ्यमाह—सूत्रम्—'समासश्चान्वये नाम्नाम्' ॥ समास प्रथमैकवचनान्तम् । चोऽपि० ॥ प्रथमैकवचनान्तम् । अन्वया० । पश्चात् विभक्तेर्लोपः स्यात् इतो इत्युभि रघु 'हशहोमे०' च अन्वये अन्वति एकामार्थमित्यन्वयस्तस्मिन् सप्तम्येकवचनान्तम् । अ इ ए यवात् । सर्वे०' । नाम्नामिति नामन्शब्दस्य षष्ठीबहुवचनान्तम् । अल्लोपः स्वरे ' स्वरहीनं० 'मोऽनुस्वारः' ॥ सिद्धं सूत्रम् ॥ नाम्नामन्वयेऽथादिवृत्तिः कण्ठ्या । परमत्र नामग्रहणेन पदमेव विवक्षितम् । अन्यथा 'अविभक्ति नाम' इत्युक्ते 'समासप्रत्यययोः' इति सूत्रं व्यर्थं स्यादिति द्विवचनस्य बहूर्थाभावापत्तित्वात् द्वयोरपि नाम्नोः समासः स्यात् । यद्वा नाम्नी च नामानि च नामानि तेषां नाम्नामेकशेषः समासः । तेन द्वयोरपि नाम्नोर्बहूनां च नाम्नां समासो भवति । न वाम् । अन्वयेति । पारस्परमर्थानामनमन्वयः बाधकप्रमाणाभावो योग्यता । यत्र नाम्नोः पदानां वाच्यानामन्वयोपपन्नं संभवति तत्रैव समासो भवति नान्यत्रेति भावः ॥ आकाङ्क्षासहितोऽन्वययोग्यत्वे सत्येव भवति । तत्र इति तस्मात्कारणात् भार्या पुरुषस्येत्यादौ विनाऽन्वये समासो न भवति । यद्वा इदस्तस्य भार्या पुरुषस्य वचमित्यत्र चतुर्णां शब्दानां मध्यात् भार्या इति च शब्दं विहाय सर्वत्र पदद्वयग्रहणात् अन्वयोग्यत्वं नास्ति । ततः समासो न भवति अन्वयायोग्यत्वादितः पुरुषस्य भार्येत्यादौ तु भवति ॥ १ ॥

षट्चतुरोस्थट् ॥ षण्णां सङ्ख्यापूरकः षष्ठः ॥ **पञ्चादेर्मः ॥** पञ्चमः । सप्तमः । अष्टमः । नवमः । दशमः । इत्यादि ॥ **एकादशादेर्डः ॥ द्विव्यष्टैकाना द्वात्रयोष्टैकाः ।** मान्तशतादनशीतिपद्धतिभ्यो डिरिति वक्तव्यम् ॥ एकेनाधिका दश एकादश । एकादशानां सङ्ख्यापूरक एकादशः -एकादशी । द्वादशः -द्वादशी । त्रयोदशः त्रयोदशी । चतुर्दशः चतुर्दशी । सप्तदशः सप्तदशी । अष्टादशः अष्टादशी ॥

(च०) 'षट्चतुरोस्थट्' । षट् चतुर् इत्येताभ्यां सङ्ख्येयविशेषावधारणेऽर्थे थट् प्रत्ययो भवति । षष् । षण्णां सङ्ख्यापूरणः षष्ठः । षट् प्रत्ययः । 'ष्टुना ष्टुः' थस्य ठः । [illegible] प्रथमैकवचनं [illegible] ॥ चतुर् । चतुर्णां सङ्ख्यापूरणश्चतुर्थः । अत्र थटः [illegible] ॥ [illegible] । षष्ठी चतुर्थी । चतुर्णां सङ्ख्यापूरणश्चतुर्थः इति पूर्वमेवोक्तम् ।

'पञ्चादेर्मः' ॥ पञ्चादिभ्यो दशान्तेभ्यः सङ्ख्येयविशेषावधारणेऽर्थे मट् प्रत्ययो भवति । पञ्चानां सङ्ख्यापूरणः पञ्चमः । सप्तमः । 'नान्तस्य०' नलोपः । एवं सप्तमः । अष्टमः नवमः दशमः इति ॥

'एकान्तादृशे' ॥ इकाराद्युच्चारणमप्यनुवर्तनीयम् । एकान्नम् इत्यादेः अत्र न यावत् सेत्स्यतिविशेषावधारणं इत्यस्य भवति । मड्प्रत्ययविधिः । एकादशम् । एकार शब्दे संख्यापूरणः एकान्तः । डप्रत्ययः । अत्र द्विशब्दादिकार्यः । स्वरादौ० 'द्वादि०' ॥ सहाः सादि इति एक च एका इत्यन्तः । प्रक्रियान्ते तु 'आम०' इति यावद्विभागस्तावत् । इयत् । एकादशस्य एकादशमेव ॥ एवं द्वा वा प्रयोगः । द्विशब्दानां द्वादश दा इति द्विशब्दस्य द्वादश्यादिः । त्रिशब्दस्य त्रय इत्यादेशः । चतुर्दश । पञ्चदश ॥ षोडशः । 'सप्त सादिः' इति अस्य वः । दस्य ड । 'डशो । सप्त श । अष्टादश । एकान्नविंशति । अत्र डमत्यये कृते निपातनात्सिद्धिरिव च देरकारस्य लोप स्वरादौ० एकोनविंश ॥

(प्र:) पञ्चादयश्चिनि । सङ्ख्यावाचिशब्द उच्चारणे इति सप्तम्यानुवर्तते पञ्चमी षष्ठी स्त्रीप्रत्ययः । सप्तम । अष्टम । नवमः । दशमः । एकान्तादिरिति निपातनात्कर्तृ-त्वम् इत्यर्थे पर आत्मम् । एव द्वादशीत्यादौ । द्विशब्दानां समासे सहाः सादि रिति । द्वाविंशतिः आदात्। मतान्ते स्तु । द्वाविंशः । त्रयोविंशः । द्वात्रिंशत्प्रभृतिरनाया इत्यादि नत्वी वा । द्विचत्वारिंशत्-द्वाचत्वारिंशदित्यादि । यत् एकान्ना इत्यादौ द्विस्व-विधावपि मा चेति टिलोपः सम्भवति तथापि विंशः इत्यन्ते यस्य लोप कृतः लोपार्थं द्विस्व मिति सम्बन्धः । विंश इत्यत्र वाचाच्छाब्दोन्नतिकाय द्विवाइलोप ॥

विंशत्यादेर्वा तमट् ॥ विंशतः सङ्ख्यापूरकः विंशतितमः । पक्ष- विंशतेस्तिलोपः ॥ विंशः ॥

(च०) विंशत्यादिभ्यस्तमट् विंशत्या योगः इत्येयविशेषावधारणे तमट्प्रत्ययो वा भवति । वाग्ग्रहणात् एकत्र तमट द्वितीये डः (इताचे प्रत्यया न यथास्थित एव तिष्ठति ?) विंशति । आद्ये तमट प्रत्यय । डकार इदर्थ । विंशते संख्यापूरणः विंशतितमः । तथा आद्ये विंशतितमो इत्यपि भवति । द्वितीये डप्रत्ययः । डानुबन्धेऽ त्यस्वरादेर्लोप तत्र विंशतिरिति इत्यनेन सह टिलोप । स्वरादौ० विंश ॥ तथा प्र क्रियायां 'ति विंशतेर्डिति' विंशतेस्त्य त्रिशब्दस्य लोप स्यात् डिति पर ॥ अत्र कश्चित् टिलोप इत एव 'इकारान्ता०' इति टिलोपमिच्छन्ति ॥ केचित्तु टिलोप कृते 'सहाः सादि' इति विंशति इत्यस्य विंशं कृत्वा प्रमिच्छन्ति ॥ (तृतीये विंशतितिस्त्वेव रूपं भवति । विंशतिसंख्य इत्यर्थः ।) कश्चित्तु वाग्ग्रहणेन पञ्चमे इति मप्रत्ययमपो कर्तृ त । तन्मते विंशम इत्यपि स्यात् । एकविंशतितम एकविंश । द्वाविंशतितमः द्वाविंश । त्रयोविंशतितम त्रयोविंश । चत्वारिंशत्तमः चत्वारिंश । एवं पञ्चाशत्तम पञ्चाश । एवं षष्टितम एकषष्टितमः एकषष्ट । इत्यादि ज्ञेयम् । अत्र प्रत्यासत्तेरन्यानि बहुरूपाणि सन्ति । द्विशब्दाद्यो द्वात्रयोऽष्टा भवन्ति । 'प्राक्शतादनशीत' शताराक् शत यावत् अनशीत अशीतिपर्यन्तं बहुविधा अन्यत्र द्वित्रिअष्टशब्दा सन्ति तत्र क्रमेण द्वा त्रयः अष्टा एते आ वा भवन्ति । यथा द्वादशः त्रयोदश अष्टादश ॥

चत्वारिंशदादौ वा ॥ द्विचत्वारिंशत् द्वाचत्वारिंशत् । त्रिचत्वा रिंशत् । त्रयश्चत्वारिंशत् । अष्टचत्वारिंशत् । अष्टाचत्वारिंशत् । ऊनशीती

विशेषणाद् द्व्यशीति त्र्यशीति अष्टाशीति । शतादेर्नित्यम् ॥ शततम ॥

(च०) चत्वारिंशदादौ वा । चत्वारिंशदादिषु परेषु द्वित्र्यष्टानां द्वात्रयोष्टा वा भवन्ति । द्विचत्वारिंशत् द्वाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् । अष्टचत्वारिंशत् । अष्टाचत्वारिंशत् । द्विपञ्चाशत् । द्वापञ्चाशत् । त्रिपञ्चाशत् । त्रयः पञ्चाशत् । अष्टपञ्चाशत् । अष्टापञ्चाशत् । एवं द्विषष्टि द्वाषष्टि त्रिषष्टि । त्रयःषष्टि । अष्टषष्टि अष्टाषष्टि । द्विसप्तति द्वासप्तति । त्रिसप्तति त्रयःसप्तति । अष्टसप्तति अष्टासप्तति । द्विनवति द्वानवति । त्रिनवति त्रयोनवति । अष्टनवति अष्टानवति । अशीतिरिति विशेषणात् द्व्यशीति द्व्यशीतिम । त्र्यशीति अष्टाशीति । अत्र द्वात्रयष्टा न भवन्ति ॥ 'शतादेर्नित्यम्' तमट्प्रत्ययः स्यात् । शततम । 'एकादशादिभ्यो समानार्थे शत सहस्र च डप्रत्यय' । एका वा अधिका यस्मिन् तत् एकाधिकं शतं सहस्रम् । एवं द्वादशं शतं त्रयोदशं शतं एकत्रिंशं त्रिंशं चत्वारिंशं पञ्चाशं शतमित्यादि ज्ञेयम् ॥ शतादेरित्यादिशब्दात् शततम । एकशततम । मासतम । अर्धमासतम । संवत्सरतम इत्यादि ज्ञेयम् । शतादीनि संख्यावाचकानि लोकादवगन्तव्यानि ॥

सङ्ख्याया प्रकारे धा ॥ सङ्ख्यावाचकाच्छब्दात्प्रकारेऽर्थे वाच्ये सति धाप्रत्ययो भवति ॥ द्विप्रकार द्विधा । त्रिप्रकार त्रिधा । चतुष्प्रकार चतुर्धा ॥४५॥

(च०)'संख्याया प्रकारे धा' ॥ संख्यावाचिनो नाम्नः प्रकारेऽर्थे धाप्रत्ययो भवति । द्विप्रकारं इति । द्वौ प्रकारावस्येति वा द्विधा त्रिधा चतुर्धा पञ्चधा षोढा इत्यादि ॥ ४५ ॥

गुणोऽण् च ॥ धाप्रत्ययान्तस्य शब्दस्य गुणो वा भवति अण् च वा भवति ॥ द्विप्रकार द्वेधा । त्रिप्रकार त्रेधा । धाप्रत्ययान्तात्स्वार्थेऽण् । द्विधा एव द्वैधम् । त्रैधम्(क) ॥ **क्रियाया आवृत्तौ कृत्वस्** ॥ (ख)पञ्चवारान् भुङ्क्ते इति पञ्चकृत्वो भुङ्क्ते । सप्तकृत्व ॥ ४६ ॥

(च०) गुणोऽण च धाप्रत्यये परे द्वित्रिशब्दयोर्गुणो भवति अण च वा भवति । इकारस्य ए गुणः । द्वेधा त्रेधा । प्रथमैकवचने । 'कृत्वाद्यन्तं च' इति अव्ययाद्विभक्तिलुक् । तथा धाप्रत्ययान्तात्स्वार्थेऽण् प्रत्ययो भवति । णकारो वृद्ध्यर्थं । द्विधा त्रिधा । उभयत्रापि अण वृद्धि । 'यस्य लोपः' 'नपुंसकात्स्यमोर्लुक्' इति नपुंसके प्रथमैकवचन । 'अतोऽम्' द्वैध त्रैधम् ॥ 'क्रियाया आवृत्तौ कृत्वस्' क्रियाया भोजनगमनकरणादिकाया आवृत्तौ तत्संख्यापरिवृत्तेन पौन पुन्येन वारवारं पञ्चपञ्चादिसंख्यायाः कृत्वस् इति प्रत्ययो भवति ॥ पञ्चन् । पञ्च वारान् इति । पञ्चन् कृत्वस्प्रत्यय । 'नाम्नो नो०' प्रथमैकवचनं सि । 'अव्यया०' 'सोर्वि०' पञ्चकृत्व । सप्तकृत्वः । त्रिसप्तकृत्व । कतिकृत्वः । इत्यादीन्युदाहरणानि ॥ ४६ ॥

(क) एकाद्ध्यमुञ्च ॥ ऐकध्यम् । एकधा इति विग्रहः ।

(ख) पौन पुन्यम् गणनम् पृत्ति । वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात् कालाध्वनोरिति द्वितीया । भुङ्क्ते इत्यत्र भुजिशब्दस्य लौकिकक्रियावाचित्वेऽपि न कृत्वसु । एकत्वादिसंख्याविवक्षाभावात् ।

(प्र०) गुणोऽग्रण् चेति । आपत्यर्थे परे गुणो भवति । [illegible] गुणाभावपक्षे आपत्यप्रत्ययेन [illegible] । विकल्पार्थः । क्रियाया आवृत्तौ क्रियाभ्यावृत्ति [illegible] । पञ्च वारानिति पञ्चकृत्वः ॥ ४६ ॥

द्वित्रिचतुर्भ्यः सुच् ॥ द्वित्रिचतुःशब्देभ्यः सुच्प्रत्ययो भवति ॥४७॥ द्विवारमिति द्विः । त्रिवारमिति त्रिः । चतुः । द्विरहन्भुङ्क्ते । त्रिरहन्भुङ्क्ते ॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ बह्वादेः शब्दाच्छस्प्रत्ययो भवति ॥ बहुवारानिति बहुशः । अल्पशः । शतशः । सहस्रशः । लक्षशः । कोटिशः । इत्यादि । बहुशो धनं ददाति ॥ कारकात्किम् । बहूनां स्वामी । ४८ ॥

(च०) 'द्वित्रिभ्यां च' ॥ द्वित्रिशब्दाभ्यां क्रियाया आवृत्तौ सुच्प्रत्ययो भवति । [illegible] । द्वौ वारौ इति द्विः । त्रीन् वारानिति त्रिः । सुच्प्रत्यये कृते पञ्चमैव [illegible] । 'अलोपश्च' 'छोऽपि' ॥ [illegible] 'वारिनिमित्तः' [illegible] । एवं द्विर्भुङ्क्ते । द्वौ वारौ इत्यर्थः । त्रिर्भोजने त्रिः । त्रीन् वारान् भोजने इत्यर्थः । चतुः [illegible] इति इत्यपि क्वचिद् दृश्यते ॥ [illegible] ॥ बह्वाद् [illegible] बह्वल्पार्थकेभ्यो [illegible] भवति । बहु । बहून् वारानिति बहुशः । अथवा बहवः एव बहुशः । कोटि संख्या येषां ते कोटिशः । [illegible] 'अल्पार्थ०' ॥ एवं [illegible] [illegible] कोटिशः [illegible] कथितः इत्यादीनि ॥ ४७–४८ ॥

(प्र०) द्वित्रिभ्यां सुचिप्रत्यये क्रियावृत्तावित्येव । बहुः [illegible] । बह्वादेः [illegible] बहूनां स्वामीत्यादौ न । अत्रापि क्रियाभ्यावृत्तिगणन एव । भूरिशः । [illegible] । स्तोकशः । अल्पशः । कतिकशः इत्यादि ॥ ४७–४८ ॥

संख्याया अवयवे तयप् ॥ संख्याया अवयववृत्त्येः सति तयायहो प्रत्ययौ भवत ॥ द्वौ अवयवौ यस्य तद् द्वितयम् ॥ त्रितयम् । द्वौ अवयवौ यस्य तद्द्वयम् । त्रयम् । चतुष्टयी ॥ अल्पे कुटीशमीशुण्डाभ्यो रः ॥ अल्पा कुटी इति कुटीरः । अल्पा शमी इति शमीरः । अल्पा शुण्डा इति शुण्डारः ॥ ४९ ॥

(च०) [illegible] ॥ [illegible] अवयवे इत्यतो प्रत्ययो भवतः । [illegible] [illegible] । द्विवि । [illegible] । [illegible] । [illegible] इति [illegible] । द्वौ अवयवौ [illegible] । [illegible] इदम् । [illegible] । [illegible] प्रत्ययः । [illegible] ॥ [illegible] चतुष्टयी [illegible] ॥ [illegible] । द्वौ अवयवौ [illegible]

दुमया । 'यस्य लोपः' ॥ 'अल्पे शमीकुटीशुण्डाभ्यो रः' ॥ अल्पार्थे लघ्वर्थे साध्ये शमी कुटीशुण्डा इति त्रिभ्यः शब्देभ्यः रप्रत्ययो भवति । अल्पा शमी शमीरः । अल्पा कुटी कुटीरः । अल्पा शुण्डा शुण्डारः ॥ ४९ ॥

(प्र०) तयायडाविति । तयश्च अयट् च तौ सङ्ख्याया अवयववृत्तिविवक्षायां भवत इत्यर्थः । द्वावयवौ ययोः तावयवा इति विग्रहः । द्वितयौ । त्रितयीत्यत्र गौरादित्वान्ङीप् । द्वयी । त्रयीत्यत्र । यस्येति लोपः इति ङीप् । केचित्तु तयायनौ इति पठित्वा द्वितयादिङीपे गौरादित्वादत्र । इत्याहुः । तदसत् । यस्य लोप इत्येव सिद्धे टित्त्ववैयर्थ्यप्रसङ्गात् । त द्धितप्रत्ययानामन्तरवाचकादर्शनाभिधानमशक्यत्वादनुक्तनिपातनमाह ॥ ४९ ॥

स्त्रीपुंसाभ्यां नञ्स्नञौ ॥ स्त्रैणम् । पौंस्नम्(क) ॥ शेषा निपात्याः कत्यादयः । आदिशब्दात् या सङ्ख्या येषां ते यति । सा सङ्ख्या येषां ते तति ॥ का सङ्ख्या येषां ते कति ॥ लोकाच्छेषस्य सिद्धिः ॥

इति सारस्वतव्याकरणे तद्धितप्रकरणम् ॥ १९ ॥

(च०) 'स्त्रीपुंसाभ्यां नञ्स्नञौ' ॥ स्त्रीपुंसौ शब्दयोः क्रमेण नञ्स्नञौ प्रत्ययौ भवतः अपत्याद्यर्थे ॥ ञकारो वृद्ध्यर्थः । स्त्रीषु भवं स्त्रिया अपत्यं स्त्रीणां समूहो वा स्त्रैणम् । पुंसि भवं पुंसोऽपत्यं पुंसां समूहो वा पौंस्नम् । तत्र स्त्रैणमित्यत्र नञ् । ञित्वाद्वृद्धिः । 'स्त्रीभोगे०' ॥ तथा पुंसः स्नञ् प्रत्ययः ञित्वाद्वृद्धिः । पौंस्नम् । 'संयोगान्तस्य०' इति सलोपः । प्रथमकरणबलादेव । 'अनोऽम्' 'अनुस्वारो०' मोऽनुस्वारः ॥ अपरमेवाह— 'शेषा निपात्याः कत्यादयः' । शेषा अत्र व्याकरणेऽनुक्ता ग्रन्थान्तरेषु च दृष्टाः शब्दाः कति कतिथ कतिथ कतिपय यति तति अन्येऽपि विंशति त्रिंशत् पञ्चाशत् षष्टि सप्तति अशीति नवति शतं इत्यादयः शब्दाः निपात्याः निपातसिद्धाः प्रयोगानुसारेण साध्याः ॥ इति सुबोधिकायां तद्धितटीका ॥ १९ ॥

> सुबोधिकायां कृतायां सूरिश्रीचन्द्रकीर्तिभिः ।
> स्याद्यन्ता प्रक्रिया पूर्णा अमृतवत् मनोहरा ॥ १ ॥
> तथापि हि सविस्तरो दृश्यतेऽत्र स्फुटाक्षरः ।
> क्लिष्टमोदस्मि सान्द्रा ग्रन्थे प्रागमागमः ॥ २ ॥

इति श्रीनागपुरीयतपागच्छाधिराजविद्याविशारदभट्टारकश्रीचन्द्रकीर्तिसूरिविरचितायां सारस्वतटीकायां प्रथमावृत्तिः पूर्णा ॥

(प्र०) कत्यादय इति । निपातनात् साध्यास्तेषां निपात्याः । किम् सङ्ख्यापरिमाणे डतिः । का सङ्ख्या येषां ते कति । एवं यति तति इत्यादि प्रयोगानुसरणं ॥

इति श्रीमत्प्रसादनन्दपण्डितविरचिते सारस्वतव्याकरणे तद्धितप्रक्रिया समाप्ता ॥ १९ ॥

इति सारस्वतप्रक्रियायाः पूर्वार्द्धं समाप्तम् ।

(क) पौंस्नम् इत्यपि पाठः [illegible]

[illegible]

THE
KASHI SANSKRIT SERIES
(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)

NO 111

(Vyākarana Section No 13)

THE

Sārasvata Vyākarana

of

ANUBHŪTI SVARŪPĀCHĀRYA

EDITED WITH TWO COMMENTARIES

THE SUBODHIKĀ COMMENTARY OF CHANDRAKĪRTI

THE PRASĀDA COMMENTARY

THE LINGĀNUS'ĀSANA WITH COMMENTARY

NOTES (MANORAMA), INDEX etc

BY

Pandit Nava Kishora Kara S'armā

(**Part II**)

PUBLISHED BY
JAYA KRISHNA DAS HARIDAS GUPTA
The Chowkhamba Sanskrit Series Office
Benares City

1936

PUBLISHED BY

JAYA KRISHNA DAS HARIDAS GUPTA

The Chowkhamba Sanskrit Series Office

BENARES

Printed at the Vidya Vilas Press, Benares

1936

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशी-संस्कृत-सीरिजपुस्तकमालाया
१११
व्याकरणविभागे (१३) त्रयोदश पुष्पम् ।

॥ श्री ॥

अनुभूतिस्वरूपाचार्यप्रणीत

सारस्वत-व्याकरणम् ।

श्रीचन्द्रकीर्त्तिसूरिप्रणीतया चन्द्रकीर्त्तिनाम्न्या सुबोधिकया व्याख्यया,

काशीस्थदेवनाथचतुष्पाठी-प्रधानाध्यापक-कवितार्किककौतुकल-धारक-

श्रीनवकिशोरशास्त्रिणा निर्मितया प्रसादाख्यया टीकया,

मनोरमया विवृत्या, सटीकलिङ्गानुशासन-

प्रक्रियया च समुद्भासितम् ।

(उत्तरार्द्धम्)

प्राप्तिस्थानम्—
जयकृष्णदास हरिदास गुप्त—
चौखम्भा संस्कृत सीरिज आफिस,
बनारस सिटी ।

१९५२

प्राप्तिस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज आफिस,

बनारस सिटी।

विज्ञप्तिः

सुन्दरस्तुन्दिलश्शान्तो बालसूर्य्यसमप्रभ ।
विघ्नेशो हरतामत्र प्रत्यूहं कर्म्मधातुकम् ॥

अथ धर्म्मार्थकाममोक्षाख्य चतुर्विधपुरुषार्थो विशेषतो विद्वेशयानां प्रार्थनीय इतिश्रुतिस्मृति दुन्दुभि । तत्र धर्म्मं समीहमान —

स्वरूपान्ताऽनुभूत्यादि शब्दोऽभूयत्र सार्थक ।
स मस्करी शुभां चक्रे प्रक्रियां चतुराचिताम् ॥

येथ माध्वीनाथेव सुमनसां सोधे वाग्गनां कण्ठभूषामादधती संसारपरिसरसमुद्गत ऽनायासज्ञानामान्तुर्षिका विभुषति । चेत्थं प्रतिज्ञा मध्यकसुधार्मिकस्य —

वाग्धीवृद्धिसिद्धय । सारस्वतीमृजुं कुर्वे ।

इति तत्र पूर्तित्रयात्मिकायां पूर्वार्द्धोत्तरार्द्धभागभाजि चान्द्रीं प्रभामिव प्रकृतिव्यञ्जिकां प्रत्ययप्रभां चन्द्रकीर्तिमरारत्वत्तरां पूर्णां सुरिचन्द्रकीर्ति । भट्टोऽपि वासुदेवस्तत्र प्रसादमिव प्रसादं निविभेदेति पूर्वार्द्धोपद्धाने विस्तृतमस्माभिरभाषि । अभिष्टसिद्धिप्रदस्यापि भट्ट विदुषो दुर्घटतया प्रापण प्रसादस्य भाग्यतो यथोपलब्धं समूलं चन्द्रकीर्तिसनाथं १९९१ वसन्तोत्सवावसरे तद्वितान्तैकभागं तत्तु प्रकाशयन्मदनुयोगेन प्रकाशको धीर श्री जयकृष्णदास । अस्मिन् किल सम्वत्सरे तेनानुदिनं प्रोत्साहितेन मयानुपलभ्य मानस्योत्तरभागप्रसादस्य पूरणं रामाश्रमचन्द्रिकातत्त्वदीपिकास्मरणमुखेनाकारि । भद्रसमाजेषु निवेद्यते च —

श्रीवासुदेवभट्टेन पूर्वार्द्धं या विनिर्मिता ।
टीकया पूर्णं तस्या उत्तरार्द्धं प्रकाश्यते । इति ।

हेमाननीयविबुधा कृतवाच्यचर्चा
यद्यत्र नैस्तनगता मम दोषसत्ता ।
तत्ता भवद्भिरनिशं परिमार्जनीया
दोषान्हरन्ति महतामपि ये तु दुष्ट ॥

इति निवेदक

प्रसादपूरक

सारस्वतप्रक्रियोत्तरार्द्धगतविषयाणा-
मनुक्रमणिका ।

* इति *

ॐ

सारस्वतप्रक्रिया

प्रसाद—चन्द्रकीर्तिसमाख्यया व्याख्यया मनोरमा-
ख्यविवृत्या च सवलिता ।

(उत्तरार्द्धम्)

भ्वादिषु परस्मैपदिन १ ।

अथाख्यातप्रत्यया निरूप्यन्ते ॥ ० ॥

✿ चन्द्रकीर्तिः ✿

सारस्वतीं स्तुमः भक्त्या वाञ्छितार्थविधायिनीम् ।
सद्वाग्विलाससन्दोहदोहां कामदुघामिव ॥ १ ॥
नत्वा नागपुरीयाह्वतपागणविभूषणम् ।
श्रीराजरत्नसूरिं चाख्यातव्याख्या विधीयते ॥ २ ॥ युग्मम् ।

अथ ग्रन्थकार आख्यातप्रत्ययान्विवक्षुः प्रतिज्ञां करोति—अथाख्यातेत्यादि । अथेति संज्ञासन्धिविभक्तिपुम्नपुंसकस्त्रीप्रत्ययकारकसमासतद्धितलक्षणाधिकाराष्टकरूपानन्तरमाख्यातं नाम व्याकरणस्य नवमोऽधिकारः । तस्य प्रत्यया निरूप्यन्ते । आख्यायन्ते कथ्यन्ते अर्थात् निष्पाद्यन्ते स्यादीनां रूपाणि येन तदाख्यातम् । अथवा आख्यान्ति आचक्षते कर्तृव्यापारमित्याख्याताः ॥ प्रत्याय्यन्ते ज्ञाप्यन्ते अर्था येभ्यस्ते प्रत्ययाः आख्यातसंज्ञकाः प्रत्ययास्ते निरूप्यन्ते ॥ ० ॥

✿ प्रसादः ✿

दन्तस्तुन्दिलः शान्तो बालसूर्यसमप्रभः ।
विघ्नेशो हरतामत्र प्रत्यूहं कर्मबाधकम् ॥ १ ॥
श्रीवासुदेवभट्टेन पूर्वार्द्धे या विनिर्मिता ।
टीकायाः पूर्णं तस्या उत्तरार्द्धे प्रकाश्यते ॥ २ ॥

[illegible] इति [illegible] ॥

[illegible] ॥ [illegible] ॥ १ ॥

([illegible]) [illegible] इति । [illegible] ॥ १ ॥

([illegible]) [illegible] ॥ १ ॥

भ्वादि ॥ भू सत्तायामित्यादिगणो धातुगणो भवति ॥ स च त्रिविधः आत्मनेपदी परस्मैपदी उभयपदी चेति ॥ २ ॥

([illegible]) अथ [illegible] धातुविभागः—सूत्रम्—'भ्वादि' ॥ भू आदिर्यस्य भ्वादिः । स भ्वादिः ॥ भूधातु सत्तार्थे नियमार्थं [illegible] शब्दा आनुपूर्व्या धातुः [illegible] स धातुसंज्ञो भवति विभक्तिप्रत्ययरहित [illegible] भ्वादिगणो भवति । [illegible] । [illegible] इत्यर्थमिति धातुः ॥ स गणः । स च धातुस्त्रिविधः । तिस्रो विधाः प्रकाराः यस्य स त्रिविधः पदभेदात्त्रिप्रकारः । आत्मनेपदमहात्तु [illegible] विभक्तिप्रत्यय [illegible] मध्यवचनात्मकं विधानं यस्य स आत्मनेपदी 'एध वृद्धौ' इत्यादिः । तथा परस्मैपदं [illegible] भागवचनस्यार्थं मध्यवचनात्मकं विधानं यस्य स परस्मैपदी 'भू सत्तायाम्' इत्यादिः । [illegible] उभे परस्मैपदात्मनेपदे विधेये यस्मिन् स उभयपदी । पचतिकरोत्यादिः । यद्यपि 'नि विशः' इति सूत्रेण कदाचिदात्मनेपदमपि विधेयं भवति । तथाप्यत्र स्वभावेन [illegible] त्रिविधत्वमुक्तम् ॥ २ ॥

(प्र०) भ्वादिरिति । भवनं भूः क्रिया । आद्यावयवोऽनन्तादिः शब्दः । आङ् पूर्वात् दाञ् [illegible] । तथा च भूशब्दः क्रियावाचक आदिशब्दः प्रकारवाचक इत्यर्थः । एवं सति हिरुक् वर्जने इत्यव्ययेऽतिव्याप्तिः अव्ययापि वर्जनरूपक्रियावाचित्वात् । अतो भ्वादिरित्यावश्यकम् । अत्रानिकोऽव्ययार्थे । तथा च भूशब्दमारभ्य ये पठितास्ते धातुसंज्ञाः स्युः । एवञ्च क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वमिति लक्षणम् । याद्यावव्ययेऽतिप्रसङ्गवारणाय सत्यन्तम् । तावन्मात्रोपादाने च हिरुगादावतिव्याप्तिः । अत्राहुः—क्रियावाचित्वलाभायानुवृत्तिर्न कर्तव्या । न च यादावतिव्याप्तिः या इत्यस्य लाक्षणिकत्वेनैवापहरणात् , यदन्त्यदायत्वम् सापि वति सिद्धे , इत्यव्ययस्य च धातुत्वाभ्यनिगदानात् । अथ धातुत्वं [illegible] [illegible]

च१, अनु नास्यास्य एव धात्वर्थादिमपि रिति निवार्णार्थत्वानिषार्थत्वात् । एवं च सूत्रे विनिर्दिष्टस्य धातुरूपम् । न स्यादिति भावः । सर्वेऽपि मात्रत्व तु एव अवे इत्यत्र एतिरिति कमकादिष्वपि शब्दानां सर्वाद्यादेशस्य धातुत्वप्रसङ्गात्, धातुत्वे हि स्यादनुबन्धैरपि क्रियाभिधायकत्वात् । अथ यो हि धात्वर्थस्य स्वार्थाभिधायकत्वं धातुत्वं स्यादिति वाच्यम्, न तत्रापि धात्वनुबन्धानुप्रयोगात् । धातुसम्बन्धादनेनार्थानुप्रयोगेऽन्यत्र विधिरिति । का पुनः क्रिया भावैकदेशेति गृहाण । तथा हि भवतां गमनादेः क्रियाभावात् भवतः भवतः क्रियमाणस्य भवनस्य करोतिकर्मत्वम् । तथा च कर्तृस्वर्थत्वकर्मत्वेऽभिधायकत्वात् भवनस्य च स्वार्थे प्रयोजकव्यापारो भिन्नप्रधानं करोत्यर्थस्य स्पष्टम् ॥ १ ॥

आदनुदात्तङित' ॥ अनुदात्तेतो ङितश्च धातोरादित्यात्मनेपदं भवति ॥ ३ ॥

(च०) अथ प्रथममात्मनेपदं यस्मात् धातुभ्यो भवति तान् दर्शयति । सूत्रम्—'आदनुदात्त०' इति ॥ आत् प्रथमैकवचनान्तम् । इतश्च अनुदात्तश्च ङ् च अनुदात्तङौ अनुदात्तङौ इतौ यस्य सोऽनुदात्तङित्, तस्मात् अनुदात्तङितः पञ्चम्येकवचनान्तम् । इति सूत्रम् । अनुदात्तेदिति धातुपाठे योऽभिहितः धातुपाठे वा धातुरनुदात्तेत्संज्ञक कल्पित 'एध वृद्धौ' इत्यादिः । तथा ङित् ङकारानुबन्ध 'शीङ् स्वप्ने' इत्यादि तत्रानुदात्तेतो ङितश्च धातो आदित्यात्मनेपदं भवतीत्यर्थः ॥ ३ ॥

(म०) आदनुदात्तङित इति । अनुदात्तश्च ङ् च अनुदात्तङौ तावितौ यस्य धातोः सोऽनुदात्तङित् तस्मात् । द्वन्द्वान्ते श्रूयमाण इत्पदं प्रत्येकमभिसम्बध्यते । द्वन्द्वेऽस्य स्थाने इत्य पूर्वनिपातो न इत्यत्वात् । अपाठवनिपत्यादि ज्ञापकसिद्धं हि तत् । ज्ञापकसिद्धं न सर्वत्रेति 'इतरेतरार्थं' इत्यादिना च सम्प्रतिनियत्वाच्च । अनुदात्तेतो ङितश्च धातोरात्मनेपदं भवति । एधते । शेते । अन्यपदार्थस्य धातोरात्मग्रहणं किम्, अगमन् अनिर्दिष्टम् । एतादृशस्य पि धातुत्वाभावादात ॥ ३ ॥

ञित्स्वरितेत उभे ॥ ञितः स्वरितेतश्च धातोरात्मनेपदपरस्मैपदे भवत ॥ आत्मगामि चेत्फलमात्मनेपदं परगामि चेत्फलं परस्मैपदं प्रयोक्तव्यम् । अन्यथानुगतार्थसंज्ञाबकत्वात् ॥ ४ ॥

(च०) अथोभयपदिनो धातूनाह—'ञित्स्वरितेत०' इत्यादि ॥ ञकार इत् यस्य स ञित्, यश्च स्वरितसंज्ञको धातुपाठे इत् । ञिच्च स्वरितेच्च ञित्स्वरितेत्, तस्मात् ञित्स्वरितेतः पञ्चम्येकवचनम् । उभे प्रथमाद्विवचनान्तम् । इमौ अ इ ए इति ञिर् सूत्रम् । ञितो धातोः 'डुदाञ् दाने' 'डुकृञ् करणे' इत्यादिः प्रसिद्धाः तथा स्वरितेत इति यस्य धातुपाठे स्वरितेत इति संज्ञा कल्पिताऽस्ति तस्मात् इत्यादयः धातुपाठादावागतानुभे इति आत्मनेपदपरस्मैपदे द्वे अपि भवतः ॥ अथ ग्रन्थकार उभयपदिनां धातूनां पदप्रयोजनविशेषमाह—आत्मगामि चेदित्यादि । यदि उभयपदिनां

धातूनामुपाय फलं आत्मगामि भवति तदा आत्मनेपदं प्रयोज्यम् । यथा आत्म पचते । परार्थे पचति । यद्यपि 'सारस्वतीमृजुं कुर्वे' इत्यत्र पठनस्य परगामित्वात्परस्मै युज्यत तथापि तत्पठनादुत्पन्नं पुण्यलक्षणं फलं कर्तृगाम्यनेत्यत्रधात्मनेपदं प्रयुक्तम् परगामीति । यद्यदि क्रियाफलं परगामि भवति तदाभयपदिनां धातूना परस्मैपदं भव ति ॥ यथा 'प्रक्रियाकौमुदीं कुर्मः' इत्यत्र करोतेर्धातो परस्मैपदं ग्रन्थस्य शिष्यानुशि ष्यपठनपाठनलक्षणस्य फलस्य परगामित्वात् युक्तम् । एवमन्यदपि यथासम्भवमूह्यम् । एतत्पदद्वयस्य प्रयोजनं कुत इत्याह—अन्वर्थादिति । आत्मने परस्मै इति द्वयो शब्द यो नामानुगतार्थत्वात यादृशं नाम तादृश एवार्थ । यथा आत्मनिमित्तमात्मनेपदम् परनिमित्त परस्मैपदमित्यर्थः । तस्मात् इदं धात्मगामीत्यादिना पदप्रयोगकथनं नाम तादृश एवार्थ । यथा आत्मनिमित्तमात्मनेपदं परनिमित्तं परस्मैपदमित्यर्थ । तस्मात् इदं धात्मगामीत्यादिपदप्रयोगकथनं । तूभयपदिनामेवावगन्तव्यम् । असार्वत्रिकत्वाद विधि ॥ ४ ॥

(प्र०) ञिदिति । अत्र कश्चित्—उभयपदिनां धातूनां कुत्र किं पदं प्रयोक्तव्यं तदाह —आत्मगामि चेति । चेत् यदि क्रियाफलं क्रियाजन्यफलमात्मगामि कर्तृनिष्ठं भवति तदा आत्मने पदं प्रयोक्तव्यं विधेयम् । चेत् क्रियाफलं परगामि परनिष्ठं भवति तदा परस्मैपदं प्रयोक्तव्यम् । कुत इत्यत आह—अन्वर्थेति । आत्मनेपदपरस्मैपदयोर्महासंज्ञ योरेवमन्वर्थेनैवाभिधानार्थत्वादिति भाव । यद्यपि सर्वासामपि क्रियाणां फलं कर्तृधर्म भवति फलेच्छां विना कर्तुं प्रवृत्त्यभावात् तथापि प्रधानं प्रधानगामीति न्यायेन फल शब्देनात्र प्रधानं फलं वाच्यम् । यदर्थ क्रियारम्भस्तदेव प्रधानं फलम् । यथा याग क्रियाया यजमानस्य स्वर्गप्राप्ति पाकक्रियायाश्च भोक्तृतृप्तिस्तदर्थमेव क्रियारम्भात् । दक्षिणावेतनादिकन्तु न प्रधानं फलम् । देवदत्त पचते इत्यत्र स्वार्थे पाकं कुरुते इत्यर्थ । सूपकार पचतीत्यत्र परार्थे पाकं करोतीत्यर्थ । तथा वाक्यम्—"स्वगामि चेत् कर्म यत्र कामस्तत्र प्रयुज्यते परगामिकर्त्रे चैषा कामना च तृतीयया । बहुलाभेऽकर्तृगामक वचनं स्वार्थमात्रतः, परस्मैपदमेव स्यात्" इति । यत्तु कर्तृगामिनि फले आत्मने पदं परगामिनि फले परस्मैपदमिति न संगच्छते उभेषामेव वैयर्थ्यापातात् । तथा हि- ञिस्वरितेत इत्यादेव सूत्रमस्तु आदिति चानुवर्तनीयम् । तेन कर्तृगामिनि फले आत्, अन्यत्र परात्स्यादिति परम् । किञ्च करोति कुरुते वा यज्ञमित्यत्र यज्ञनियोगफलस्य कुक्कुटादिगामित्वस्यासम्भवात् एहि यजति यजते वा ईश्वर इत्यत्र ईश्वरस्य नियोगफलस्य ईश्वरासम्भवात् । यजमाने तु स्वर्गकामो यजेत होतर्यजति मुनिभ्यां यजमानस्विजा यागाच गनियम अन्यत्र तु यथेष्टं प्रयोक्तव्यम् ॥ ४ ॥

परतोऽन्यत् ॥ पूर्वोक्तनिमित्तविधुरात्परस्माद्धातो परस्मैपदं भवति ॥५॥

(प्र०) अथ परस्मैपदस्थलमाह—'परतो०' ॥ परतः पूर्वस्मादुक्तप्रकारात् यदन्य तादृशम् । अन्यत् प्रथमोक्तप्रकारात् । अन्यकारकस्य भावादिषु वर्तमानाः । निरर्थिनं सूत्रम् । पूर्वोक्तमादि । पूर्वोक्तानि यानि सूत्राण्यात्मने निमित्तानि तद्विधुरात्तिरो

आत्मनेपदनिमित्ते निमित्तस्वरितेत्त्व उभयपदनिमित्ते एभिर्विधुराद्रहितात् अस्माद्धातोः उप- सर्गसंज्ञकाद्धातुपाठोच्चारणे ङकारञकारानुबन्धरहिताच्च धातोः परस्मैपदं भवति। स च धातुपाठे ज्ञेय ॥ ६ ॥

(म०) परतोऽन्यदिति। अनुदात्तेता ङिता निविशादिवर्जितः स्वरितेतश्च धातो- रन्यस्माद्धातोः परतः कर्त्तरि परस्मैपदं भवति ॥ ६ ॥

नव परस्मैपदानि ॥ तिबादीनामष्टादशसङ्ख्यकानामाद्यानि नव वचनानि परस्मैपदसंज्ञानि भवन्ति ॥ पराण्यात्मनेपदानि ॥ ६ ॥

(च०) अथ विभक्तिषु परस्मैपदयोर्वचनसंख्यामाह—सूत्रम्—नव परस्मैप- दानि ॥ नव प्रथमाबहुवचनान्तम्। 'अन्यमार्गेषु 'परस्मैपदानि' प्रथमाबहुवचनम्। नपुंसकलिङ्गे। द्विपदमिदं सूत्रम्। तिबादीनामिति। वर्तमाना विधिर्भावना आशी: प्रेरणा अद्यतनी परोक्षायां श्वस्तनी अद्यतन्यां भविष्यति क्रियातिपत्तिर्भूतायां इति लक्षणानां दशविभक्तीनां यान्यष्टादश वचनानि तेषां मध्ये आद्यानि नव वचनानि परस्मैपदसंज्ञानि भवन्ति। तथापि बहुषिन्पुस्तकेषु 'पराण्यात्' इति सूत्रं दृश्यते। नव पराणि प्रथमाबहुवचनम्। आत् प्रथमैकवचनम्। द्विपदम्। पराणि नव वचनानि आत्म- नेपदसंज्ञानि भवन्तीति वृत्तिः सुगमा ॥ ६ ॥

वर्त्तमाने–तिप् तस् अन्ति, सिप् थस् थ, मिप् वस् मस्। ते आते अन्ते, से आथे ध्वे, ए वहे महे ॥ प्रारब्धापरिसमाप्तत्वे- नोपलक्षिते काले वर्त्तमानस्तस्मिन्नभिधेये तिबादयः प्रत्यया भवन्ति ॥ अस्य तिबादेः पाणिनीयानां लडिति संज्ञा ॥ तत्रैकवचनादीनि व्याक्रियन्ते ॥ ७ ॥

(च०) अथाख्यातविभक्तीनां मध्ये सर्वव्याकरणप्रथमप्रतिपादनाय विभक्तिप्रदाम सूत्रमाह—'वर्तमाने०' ॥ सप्तम्येकवचनान्तम्। तिप तस अन्ति। सिप थस थ। मिप वस मस। ते आते अन्ते। से आथे ध्वे। ए, वहे महे। सर्वाण्येतानि प्रथ- मैकवचनान्तानि लोपरहितानि। एवमष्टादशपदमिदं सूत्रम्। अथ वृत्तिकारो वर्त्तमान इति पदं व्याचष्टे—प्रारब्धेति। कस्मिंश्चित् क्रियायाः प्रथमक्षणे एव तस्याः स प्रारब्ध स यावत्परिसमाप्तः अपरिसमाप्त्यावधूतमान इत्युच्यते। प्रारब्धापरिसमाप्तत्वेनोपलक्षित काले वर्त्तमानः तस्मिन् गुणलक्षणे वर्त्तमाने काले अभिधेये वाच्यमाने सति धातोर्नित्यादयो- ऽष्टादशसंख्या अष्टादश प्रत्यया विभक्तिलक्षणा भवन्ति प्रयुज्यन्त इत्यर्थः। तत्र तिबादयो नव परस्मैपदसंज्ञा। त आदयो नव प्रत्यया आत्मनेपदसंज्ञा। अथ पाणिनीयतन्त्र एतेषामष्टादशवचनानां संज्ञामाह—अस्येति। एभिर्वैयाकरणानामकाले पाणिन्युक्त व्याकरणाध्येतॄणां मते अस्य तिबादेरष्टादशसंख्यकस्य प्रत्ययस्य लट् इति संज्ञा कृता। लट्, लिट् लुट् लृट् लेट् लोट् लङ्, लिङ् लुङ् लृङ् इति दश लकाराः। तत्र वर्त्त- माने लट् ॥ ७ ॥

आत्मनेपदम् यथा— तमद्रिनिद्र निदिते [illegible] भवे कामानाम् । परस्मैपदम् यथा— [illegible] कविता भार्या नमिस्पान्युदहास्यताम् इत्यादि ॥ ८ ॥

(प्र०) नाम्नि धात्वादि । अधातुभुवि सम्भवति इत्यादि सम्भवति कर्तरीति अनुवर्तते । परस्मैपदात्मनेपदयोर्विपरिणमयेत् । ननु मार्गे [illegible] कथं तत्र एव भाषा [illegible] यत्र यति यत् सत्यम्, [illegible] गृहाण । अथात् [illegible] तथा हि [illegible] सम्भो च [illegible] ॥ ८ ॥

कर्तरि प च ॥ प परस्मैपदं कर्तरि भवति ॥ चकारादात्मनेपदमपि ॥ तत्र भू इत्येतस्मात्परस्मैपदिनोऽविकरणात्कर्तरि तिबादयो योज्यन्ते ॥ भू सत्तायाम् ॥ तत्रैकत्वविवक्षायां प्रथमपुरुषैकवचनं तिप् । भू तिप् इति स्थिते । पकार इत्कार्यार्थः ॥ ९ ॥

(च०) अथ परस्मैपदप्रयोगनिष्पत्तिमाह—'कर्तरि प च' ॥ कर्तरि सप्तम्येकवचनान्तम् । पं प्रथमैकवचनान्तम् । च प्रथमैकवचनान्तम् । त्रिपदमिदं सूत्रम् । पम् इति परस्मैपदं तिप् तस् अन्ति इत्यादिनवकम् । कर्तरि कर्तृकारक एव भवति । न केवलं परस्मैपदं किन्तु आत्मनेपदमपि भवति । उभयपदिनौ तु उभे अपि परस्मैपदात्मनेपदे लक्षणे भवतः । यथा 'जयन्ति सन्तः' इति परस्मैपदम् । 'तन्तु च विजयन्ते' इत्यात्मनेपदम् । 'आत्मपरस्मै कुर्वे' इत्यत्र कर्तरि आत्मनेपदम् । प्रक्रियाकौमुद्यां कुम' इति परस्मैपदम् । एवमन्यत्राप्यूह्यम् । कर्मणि तु आत्मनेपदमेव भवति ॥ अत्र प्रथमं पतुक भ्वादि इति सूत्रेण भू इत्यादीनां धातुसंज्ञा प्रतिपादिता । तत्र भूधातोर्धातूनामपि [illegible] प्रयोग विधातुं प्रथमं वर्तमानप्रयोगं दर्शयति—तत्रेति । तत्र परस्मैपदात्मनेपदयोर्मध्ये [illegible] । भू सत्तायाम् इत्यादिधातुपाठोक्तत्वात् परस्मैपदी वर्तते स चाविकरणो भवति । विक्रियन्ते [illegible] भजन्ते धातवोऽनेनेति विकरणम् । यद्वा प्रत्ययार्थाभिधाने सहायो विकरणम् । यद्वा प्रकृतिप्रत्यययोर्मध्ये पाती [illegible] प्रत्ययो विकरणम् । स च शप् कर्तरि इत्यादावस्थातोऽपि प्रत्ययमात्रं विकरणमुच्यते । अविकरणो यस्यासौ अविकरणस्तस्मात्परस्मैपदिनोऽविकरणाच्च तिबादयः परस्मैपदसंज्ञाः प्रत्यया योज्यन्ते । इह हि धातवो दशधा । तत्राविकरणा भ्वादयः । लुग्विकरणा अदादयः । लुग्विकरणा अपि द्विरुक्ता ह्वादयः । यविकरणा दिवादयः । नुविकरणाः स्वादयः । शविकरणास्तुदादयः । नम्विकरणा रुधादयः । उविकरणास्तनादयः । श्नाविकरणाः क्र्यादयः । इच्विकरणाश्चुरादयः ॥ तत्र भूधातुरविकरणस्तस्मात् तिबादयः प्रयुज्यन्ते ॥ भू सत्तायाम् । भू इति धातुः सत्तायां विद्यमानार्थे भवनार्थे वर्तते । भूधातोः प्रथमपुरुषैकवचनम् तिप् । अत्र पकार इत्कार्यार्थः । [illegible] इत्यादि [illegible] पकारः । भू इति स्थिते ॥ ९ ॥

(प्र०) वर्तमानेति । [illegible] वर्तमानक्रियाया वाचका ये न तु [illegible] धातुनैव लभ्यते । वर्तमानत्वं तु प्रत्ययात्प्रतीयमानत्वात् , [illegible] न हि भवति इति प्रत्ययात् । [illegible] मिति [illegible] वर्तमानमिश्रत्वं भूतस्य वर्तमानभूतमिश्रत्वं भविष्यन्मिश्रत्वमपि स्यात् , तथा [illegible] दात । [illegible] तिष्ठन्ति इत्यत्र तु यदा भूयमानत्वं [illegible] वर्तमानत्वमिति [illegible] भूतादि भेदमिश्रत्वात्तस्यां क्रियायाम् भूतादिव्यपदेशः । तथा हि स्थानादिकाल तस्य । [illegible] दिकाले स्थास्यति न । इदानीं वर्तमानकाले तिष्ठन्ति । भूतमपि इत्यादि [illegible] व्यापारधारित्वा [illegible] दिक् ॥ ७ ॥

नाम्नि च युष्मदि चास्मदि च भागैः ॥ नामादिषु एतेषु प्रयुज्यमानेषु सत्सु त्रिभिर्भागैरेते प्रत्यया भवन्ति ॥ (ते च त्रयो भागा यथाक्रमं प्रथममध्यमोत्तमसंज्ञका भवन्ति) ॥ नाम्नि प्रयुज्यमाने चशब्दादप्रयुज्यमानेऽपि प्रथमपुरुषः ॥ युष्मदि मध्यमः ॥ तथैवास्मद्युत्तमः ॥ ८ ॥

(च०) एतेषामेव प्रत्ययानां त्रिविधवचनविभागभेदेन पुरुषसंज्ञानार्थं सूत्रम्— 'नाम्नि च युष्मदि चास्मदि च भागैः' ॥ नाम्नि सप्तम्येकवचनान्तम् । च प्रथमैकवचनान्तम् । युष्मदि सप्तम्येकवचनान्तम् । च प्रथमैकवचनान्तम् ॥ अस्मदि सप्तम्येकवचनान्तम् । च प्रथमैकवचनान्तम् । भागैः तृतीयाबहुवचनान्तम् । एतन्मिदं सूत्रम् । नामादिष्विति । देव देवौ देवाः । अथवा स तौ ते इति नाम । त्वं युवां यूयं इति युष्मत् । अहम् आवाम् वयम् इत्यस्मत् । तत्र नाम युष्मद् अस्मत् , एतेषु त्रिषु पदेषु प्रयुज्यमानेषु समीपे प्रयुज्यमानेषु परस्मैपदानामात्मनेपदानां च त्रिभिर्भागैः [illegible] कृत्वा एते उक्ता वक्ष्यमाणाश्च प्रत्यया भवन्ति । तिप् तस् अन्ति इति परस्मैपदानि । ते आते अन्ते इत्यात्मनेपदानि एकवचनद्विवचनबहुवचनभेदेषु प्रथमपुरुषसंज्ञां लभन्ते । सिप् थस् थ । से आथे ध्वे । इति परस्मैपदात्मनेपदयोर्मध्यमपुरुषसंज्ञा । मिप् वस् मस् , इति परस्मैपदे ए वहे महे इत्यात्मनेपदे इत्युत्तमपुरुषसंज्ञा ॥ अथ नामादिषु प्रथमादिषु पुरुषप्रयोगनियमिमाह—नाम्नीति । नाम्नि नामपदलक्षणप्रयुज्यमाने उच्यमाने चशब्दादप्रयुज्यमाने अनुच्यमानेऽपि प्रथम इति प्रथमपुरुषो ज्ञेयः । प्रयुज्यमाने यथा चम्पूकथायाम् । 'जयति गिरिसुतायाः कामसन्तापवाहिन्युरसि रमनिरुकश्चान्दनश्चन्द्रमौलिः' इति । यदि वा—'तं सन्तः श्रोतुमर्हन्ति' । तथा अप्रयुज्यमाने यथा रत्नमालायाम्—'निर्गुण सगुणमुत्तरं चयन्नानुरहश्च वदाम्यहम्' इत्यत्र बुधा इत्यप्रयुज्यमानेऽपि नाम्नि शृण्वन्तीति प्रथमपुरुषप्रयोगः । तथा—युष्मदि प्रयुज्यमाने अप्रयुज्यमानेऽपि मध्यमः पुरुषः । यथा कुमारसंभवे—'त्वं पितॄणामपि पिता देवानामपि देवता । परतोऽपि परश्चासि विधाता वेधसामपि' । अप्रयुज्यमाने यथा—'अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् । भूतदयां विस्तारय तारय संसारसागरतः' ॥ इत्यत्र युष्मद्यप्रयुज्यमानेऽप्यपनयेत्यादिमध्यमपुरुषप्रयोगः । अस्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽप्युत्तमः पुरुषः । प्रयुज्य

माने यथा— तमहमिह निमित्तं विश्वमास्यपानामनुमितमभिन्नं भवेद् काङ्क्षमोऽन्यम् । अप्रयुज्यमाने यथा— मन्दः कविवत् प्रार्थी गमिष्याम्युपहास्यताम् इत्यादि ॥ ८ ॥

(प्र०) नाम्नि चेत्यादि । अत्राद्भुवि कम्मणि इत्यादि कम्मणाति कर्तरीति चानुवर्त्तते । पाच्छकादावनुवृत्तौ च सहम्या विपरिणम्यते । ननु भावी रित्युक्ते कथं त्वय पत्र भागा लभ्यन्त न चावार यत्र पति पत्, सत्यम् कविञ्जलालम्भनन्यायेनेति गृहाण । भवान् पचतीत्यत्र तु युष्मद्भवदर्थयोः समानाधिकरणाभावात् मध्यम । तथा हि कलिङ्गः सन्वो च विपरश्च युष्मदर्थः भवदर्थस्तु विङ्क्षान् न च तस्योपलब्धिविषय ॥ ८ ॥

कर्तरि प च ॥ प परस्मैपद कर्तरि भवति ॥ चकारादात्मनेपदमपि ॥ तत्र भू इत्येतस्मात्परस्मैपदिनोऽविकरणात्कर्तरि तिबादयो योज्यन्ते ॥ भू सत्तायाम् ॥ तत्रैकत्वविवक्षायां प्रथमपुरुषैकवचन तिप् । भू तिप् इति स्थित । पकार इत्कार्यार्थ ॥ ९ ॥

(च०) अथ परस्मैपदप्रयोगनिष्पत्तिमाह—'कर्तरि प च' ॥ कर्तरि सप्तम्येकवचनान्तम् । पं प्रथमैकवचनान्तम् । च प्रथमैकवचनान्तम् । त्रिपदमिदं सूत्रम् । पम् इति परस्मैपदं तिप् तस् अन्ति इत्यादिनवकवचनरूपं कर्तरि कर्तृवाच्ये भवति । न केवलं परस्मैपदं किन्तु आत्मनेपदमपि भवति । उभयपदिनो तु उभे अपि परस्मैपदात्मनेपदे लक्षण भवत । यथा भवन्ति सन्त इति परस्मैपदम् । तन्तु च विजयन्त इत्यात्मनेपदम् । सारस्वतासूत्रं कुर्वे इत्यत्र करोतेरात्मनेपदम् । 'प्रक्रियाकौमुदीं कुर्म' इति परस्मैपदम् । एवमन्यत्राप्यूह्यम् । कर्मणि तु आत्मनेपदमेव भवति ॥ अत्र प्रथमं वक्तव्य भ्वादि इति सूत्रेण भू इत्यादीनां धातुसंज्ञा प्रतिपादिता । तत्र भूधातोर्दशलकारेषु लकाराणां प्रथमं विहायतु प्रथमं वर्तमानार्थप्रयोगं दर्शयति—तत्रेति । ननु परस्मैपदात्मनेपद-भयपदिलक्षणेषु धातुषु । भू सत्तायाम् इत्यादिधातुपाठोक्तत्वात् परस्मैपदं कर्तरि अविकरण भवति । विकिरन्ति धात्वर्थान् भाजन्त धातवोऽनेनेति विकरणम् । अथवा प्रत्ययार्थाभिधाने सहायो विकरणम् । यद्वा प्रकृतिप्रत्ययोर्मध्ये आगत्य विभागकरणं प्रत्ययो विकरण । तत्र अथ कर्तरि इत्यादावुक्ता प्रत्ययास्तद्विकरणानुक्ताः । अविकरण यस्यासौ अविकरणस्तस्मादविकरणात् विकरणरहितात् परस्मैपदिनः अत्र प्रत्ययाः योज्यन्ते । इह हि धातवो दशधा । तत्राविकरणो भ्वादिः । लुग्विकरणो अदादिः । श्लुविकरणो अपि जुहोत्यादिः । यविकरणो दिवादिः । नुविकरणः स्वादिः । शविकरण तुदादिः । श्नम्विकरणो रुधादिः । उविकरणस्तनादिः । श्नाविकरणः क्र्यादिः । णिच्विकरणश्चुरादिः ॥ ततु भूधातोरविकरणत्वात् तिबादयः प्रयुज्यन्ते ॥ भू सत्तायां । भू धातु सत्तार्थो विद्यमानार्थो भवतीत्यर्थः । एकत्व-प्रथमपुरुषैकवचनम् तिप् । अत्र पकार इत्कार्यार्थः । अनित्यमिति इत्यादि तस्येत्संज्ञा पकार । भू इति स्थित ॥ ९ ॥

अप् कर्तरि ॥ धातोरप्प्रत्ययो भवति कर्तरि विहितेषु त्यादिषु चतुर्षु दिप्पर्यन्तेषु परतः ॥ पकारो विकरणभेदज्ञापनार्थो गुणार्थश्च ॥ प्रकृतिप्रत्ययमध्ये पतति यः प्रत्ययः स विकरणः ॥ १० ॥

(च०) सूत्रम्—'अप् कर्तरि' ॥ अप् प्रथमैकवचनान्तम् । कर्तरि सप्तम्येकवचनान्तम् । द्विपदं सूत्रम् । धातोरिति । भ्वादेर्धातोः प्रत्ययान्ताच्च धातोः कर्तरि अप्प्रत्ययो भवति । तिबादिषु दिबाद्यन्तेषु चतुर्षु विद्यमानार्थविधिसंभावनार्थाशीःप्रेरणार्थद्यतनार्थलक्षणेषु चतुर्षु प्रत्ययगणेषु परेषु सत्सु अप्प्रत्ययो भवतीत्यर्थः । अप् इत्यत्र पकारो विकरणाद्भेदज्ञापनार्थः । यतोऽत्र अप्प्रत्ययेऽप्यकारोऽवशिष्यते । 'तुदादेरः' इत्यकारो विधीयते । इत्थम् अप्प्रत्ययस्य अप्रत्ययस्यान्तरं न लभ्यते । अतः प्रत्ययभेदज्ञापनार्थमयं पकारः पित्कार्यार्थः । 'भू अति' इति स्थिते ॥ १० ॥

(प्र०) अप्कर्त्तरीति । अप पित्त्वमपित्तादिर्ङिदिति ङित्त्वाभावार्थम् । अन्यथा भवत इत्यादौ ङित्त्वाद्गुणो न स्यात् ॥ १० ॥

गुणः ॥ धातोरन्त्यभूतस्य नामिनो गुणो भवति ॥ अवादेशश्च भवति । द्व्यर्थविवक्षायां तस् ॥ ११ ॥

(च०) 'गुणः' ॥ गुण प्रथमैकवचनान्तम् । । 'धोर्वि०' ॥ धातोः धातुसंबन्धिनोऽन्त्यभूतस्य नामिनः इवर्णोवर्णऋवर्णानां च गुणः स्यात्संज्ञासंज्ञुक्तो भवति ॥ क्वचित् 'ञिति परे' इति दृश्यते तदशुद्धम् । ञितं विनापि बिभराञ्चकुरित्यादौ गुणस्य दर्शनत्वात् । 'भो अ ति' इति स्थितः । अवादेशश्चेति । 'ओ अव् 'स्वरहीनं०' । भवति इति सिद्धम् ॥ द्व्यर्थविवक्षायां द्वयोर्वाच्यमानयोः सतोः प्रथमपुरुषद्विवचने तस । भू तस् अप् कर्तरि भू अ तस् इति स्थिते 'गुण इति ॥ ११ ॥

(प्र०) गुण इति । इह धातो प्रेरणे इत्यतोऽनुवृत्तस्य धातोरित्यस्य षष्ठीनिर्दिष्टस्यान्तरस्य नामिनो गुणो भवति तस्स्थानिनामेवादेशो नामिन इत्यनेन गुणसंज्ञाविधानादित्यभिप्रेत्याह—धातोरित्यादि ॥ ११ ॥

अपित्तादिर्ङित् ॥ पकारेतं तादिकं च विहायान्यः प्रत्ययो ङित्संज्ञो भवति ॥ अन्य इति किम् । इडागमवर्जितो दशककारान्तः पाती ङित् । आदिशब्दात्सीसिग्रहणम् ॥ १२ ॥

(च०) ननु अप्प्रत्ययं विनापि गुण क्रियतां तदर्थं सूत्रमाह—"अपित्तादि०" । प इत् यस्यासौ पित् । त आदिर्यस्यासौ तादिः पिच्च तादिश्च पित्तादी ताभ्यामन्योऽपित्तादिः प्रथमैकवचनान्तम् । ङ इत् यस्यासौ ङित प्रथमैकवचनान्तम् । द्विपदमिदं सूत्रम् । पकारानुबन्धं तिप् अप् उप् प्रत्ययादिकं तादिकं ता तारौ तारः इत्यादिकं स्वार्थेऽन्यं विहाय स्वजन्या योऽन्य प्रत्ययः स ङकारानुबन्धं विनापि आकाते

रि स्यात् भवति । लकारस्तादिक इति आदिशब्दात्सिप्प्रत्ययार्थेहणं । तत्र भूतार्थे सिप् स्थाने परे आर्धधातुक आज्ञोः अन्तोतामिस्यादौ भविष्यन्त्यर्थे स्यपि प्रत्यये परे भविष्यति अभविष्यत् इत्यादौ च गुण ॥ ११ ॥

(प्र०) अपित्तादिरिति । अत्र पर्युदासबलात् पितोऽभिन्न प्रत्यय एव गृह्यते न धातु । यत्तु आदित्वाद्दापाऽपि गृह्यते तत्र गोपायतीत्यादिसिद्धिरिति तद्भ्रमात् ॥ ११ ॥

ङित्यद्वुसि ॥ किति ङिति च परे धातोर्गुणो न भवति द्व्युस वर्जयित्वा ॥ कृतद्विर्वचनादुसि परे तु गुणो भवति ॥ ततो ङित्वादासि गुणप्रतिषेधेऽप्यप्प्रत्ययनिमित्तो गुणो भवत्येव ॥ सोर्विसर्ग ॥ भवत ॥ बह्वर्थविवक्षायां भव अन्ति इति स्थिते ॥ १२ ॥

(च०) अथ ङित्वफलमाह-सूत्रम् ङिड्न्यद्वुसि ॥ क च ङ च कङौ तौ इतौ यस्य स ङित् तस्मिन् ङिति सप्तम्येकवचनान्तम् । द्विरिति द्विरुक्त धातु द्वे उस द्व्युस तस्मादन्यत्राद्व्युस तस्मिन् अद्व्युसि । सप्तम्येकवचनान्तम् । त्रिपदं सूत्रम् । किति पित्वा व्यतिरिक्ते णवादौ चक्प्रत्ययान्ते च, ङिति पितादिवर्जित प्रत्यये चक्प्रत्ययादौ च धातोर्नोमिना गुणो न भवति । तत्रापि विशेषमाह—द्व्युसमित्यादि । द्वे द्विरुक्तस्य धातो उस द्व्युस तं द्व्युसं वर्जयित्वा अन्यत्र गुणो न भवतीत्यर्थ । कृतद्विर्वचनात् इति अप्प्रत्यये लुकि कृते द्वाभ्यांतादिरुक्तात्कृतद्विरुक्तात्परस्य या अ उमागमा विहित तस्मिन् परे सति ङित्वेऽपि गुणो भवतीत्यर्थ । ततोऽत्र प्रस्तुते भूधातो ङित्वात्तसि परे गुणप्रतिषेधेऽपि अप् प्रत्यय निमित्तो गुणो भवत्येव । गुणे कृते । ओ अव स्वरहीनं भवत इति सिद्धम् ॥ बह्वर्थानां बहूनां वस्तूनामिच्छा यत्र क्रियते तत्र बहुवचनं भू अन्ति इति स्थित । 'अप् कर्तरि' भो अव 'स्वरहीनं०' भव अन्ति इति जातम् ॥ १२ ॥

(प्र०) संज्ञाफलमाह—ङित्यद्वुसीति । यत्तु नाकमनित्यमित्यनेन अनद्वुसि स्थाने न गुण इति कैश्चिदुक्तं तन्न युक्तम् आ' स्वरेऽपि नामिधाया गुण' इति सूत्रेणैवात्र गुणनिषेध सिद्धे तन्ये नाकमनित्यमित्याश्रयणस्य व्यर्थत्वात् ॥ १२ ॥

अदे ॥ अकारस्य लोपो भवति अकारे एकारे च परे ॥ भवन्ति । भवसि भवथ' भवथ ॥ १४ ॥

(च०) सूत्रम्— अदे ॥ अश्च एश्च अदे तस्मिन् सप्तम्येकवचनान्तं सांकेतिकम् ॥ अकारस्येत्यादि । प्रत्ययस्थ अकारे एकारे च परे लोपो भवति । अनेन च मध्यस्थितस्य अप्प्रत्ययसंबन्धिनाऽकारस्य लोप । स्वरहीनं । भवन्ति । इति प्रथमपुरुषस्य वचनत्रयसाधना ॥ एवं भवसि भवथ भवथ । इति मध्यमपुरुषे वचनत्रयसाधना ॥ उत्तमपुरुष वचनत्रयेऽपि अप्प्रत्यय नामिना गुणे च कृते । ओ अव 'स्वरहीनं भव मि भव वस् भव मस् इति स्थिते—॥ १४ ॥

(प्र) अदे इति । आख्यातप्रकरणे एवार्थ विधिस्तेन न स्यादावतिव्याप्ति

अप् कर्तरि ॥ धातोरप्प्रत्ययो भवति कर्तरि विहितेषु त्यादिषु चतुर्षु दिप्पर्यन्तेषु परतः ॥ पकारो विकरणभेदज्ञापनार्थो गुणार्थश्च ॥ प्रकृतिप्रत्यययोर्मध्ये पतति यः प्रत्ययः स विकरणः ॥ १० ॥

(च०) सूत्रम्—'अप् कर्तरि' ॥ अप् प्रथमैकवचनान्तम् । कर्तरि सप्तम्येकवचनान्तम् । द्विपदं सूत्रम् । धातोरिति । स्यादयो धातोः प्रत्ययास्तासु धातोः कर्तरि अप्प्रत्ययो भवति । तिबादिषु दिबन्तेषु चतुर्षु विधिमानार्थविधिनिर्माभावनायाना प्रेरणार्थानि यतनायलक्षणेषु चतुर्षु प्रत्ययगणेषु परेषु सत्सु अप्प्रत्ययो भवतीत्यर्थः । अप् इत्यत्र पकारो विकरणाद्भेदज्ञापनार्थः । पताञ्च अप्प्रत्ययस्य अकारोऽवशिष्यते । 'तुदादेः' इत्यत्र प्यकारो विधीयते । इत्यम् अप्प्रत्ययस्य अप्रत्ययस्यान्तरं न लभ्यते । अतः प्रत्ययभेदज्ञापनार्थमयं पकारः पित्कार्यार्थं । 'भू अति इति स्थिते ॥ १० ॥

(प्र०) अप्कर्त्तरीति । अप पित्त्वमपित्सार्दिङिदिति ङित्वाभावार्थम् । अन्यथा भवत इत्यादौ ङित्त्वाद्गुणो न स्यात् ॥ १० ॥

गुणः ॥ धातोरन्त्यभूतस्य नामिनो गुणो भवति ॥ अवादेशश्च भवति ॥ द्व्यर्थविवक्षायां तस् ॥ ११ ॥

(च०) 'गुणः' ॥ गुणः प्रथमैकवचनान्तम् । । सार्वि०' ॥ धातोः धातुसंबन्धिनोऽन्त्यभूतस्य नामिनः इवर्णोवर्णऋवर्णानां च गुणः स्यात्संज्ञासंयुक्तो भवति ॥ क्वचित् 'णिति परे' इति दृश्यते तदशुद्धम् । पितं विनापि विभाषाकृरित्यादौ गुणस्य दृश्यमानत्वात् । 'भो अ ति इति स्थिते । अवादेशश्चेति । ओ अव 'स्वरहीनं०' । भवति इति सिद्धम् ॥ द्व्यर्थविवक्षायां द्वयोर्वाच्यमानयोः सतोः प्रथमपुरुषद्विवचनं तस् । भू तस् । अप कर्तरि भू अ तस् इति स्थिते 'गुण' इति ॥ ११ ॥

(प्र०) गुण इति । इह धातो प्रेरणे इत्यतोऽनुवृत्तस्य धातोरित्यस्य षष्ठीनिर्दिष्टस्येत्यन्तरस्य नामिनो गुणो भवति तत्स्थानिनामेवादेशो नामिन इत्यनेन गुणसंज्ञाविधानादित्यभिप्रेत्याह—धातोरित्यादि ॥ ११ ॥

अपित्तादिर्ङित् ॥ पकारेतं तादिकं च विहायान्यः प्रत्ययो ङित्संज्ञो भवति ॥ अन्य इति किम् । इडागमवर्जितो दशलकारान्तः पातो ङित् । आदिशब्दात्सीसिग्रहणम् ॥ १२ ॥

(च०) ननु अप्प्रत्ययं विनापि गुणः क्रियतां तदर्थं सूत्रमाह—"अपित्तादि०" ॥ प इत् यस्यासौ पित् । त आदिर्यस्यासौ तादिः पिच्च तादिश्च पित्तादी ताभ्यामन्योऽपित्तादि प्रथमैकवचनान्तम् । ङ इत् यस्यासौ ङित् प्रथमैकवचनान्तम् । द्विपदमिदं सूत्रम् । पकारानुबन्धं तिप् अप् उप् प्रत्ययान्विहाय तादिकं वा तातौ तातम् इत्यादि स्वतनार्थप्रत्ययं विहाय स्वस्वस्था योग्यः प्रत्ययः स ङकारानुबन्धं विनापि आख्याते

ङित्संज्ञो भवति । पकारस्तु सार्वत्रिक चेति आदिशब्दात्सिप्प्रयोजनम् । तेन भूतार्थे सिप्रत्यये परे अभविष्ट अद्योतत् अभ्यौतामित्यादौ भविष्यदर्थे स्यपि प्रत्यये परे 'भविष्यति' 'अभविष्यत्' इत्यादौ च गुणः ॥ १२ ॥

(प्र०) अपित्सादिरिति । अत्र पर्युदासबलात् पित्सादिभिन्न प्रत्यय एव गृह्यते न धातुः । यत्तु आदिशब्दादायोऽपि गृह्यते तत्र गोपायतीत्यादिसिद्धिरिति तदप्रसक्तम् ॥ १२ ॥

ङ्कित्यद्व्युसि ॥ किति ङिति च परे धातोर्गुणो न भवति द्व्युस वर्जयित्वा ॥ कृताद्द्विर्वचनाद्उसि परे तु गुणो भवति ॥ ततो ङित्त्वात्तसि गुणप्रतिषेधेऽप्यप्प्रत्ययनिमित्तो गुणो भवत्येव ॥ सोर्विसर्गः ॥ भवतः ॥ बह्वर्थविवक्षायां भव अन्ति इति स्थिते ॥ १३ ॥

(च०) अथ क्ङित्प्रयोजनमाह—सूत्रम्- क्ङित्यद्व्युसि ॥ क् च ङ् च क्ङौ तौ इतौ यस्य स क्ङित् तस्मिन् क्ङिति सप्तम्येकवचनान्तम् । द्विरिति द्विरुक्तो धातुः द्वे उस द्व्युस तस्माद्न्याऽद्व्युस तस्मिन् अद्व्युसि । सप्तम्येकवचनान्तम् । द्विपदं सूत्रम् । किति चित्ता क्यनिति णवादौ यकप्रत्ययादौ च, ङिति पित्तादिवर्जिते प्रत्यये यक्प्रत्ययादौ च धातोर्नामिना गुणो न भवति । तत्रापि विशेषमाह—अद्व्युसमित्यादि । द्वे द्विरुक्तस्य धातोः उस द्व्युस् तं द्व्युसं वर्जयित्वा अन्यत्र गुणो न भवतीत्यर्थः । कृताद्द्विर्वचनात् इति अप्प्रत्यये लुकि कृते द्वादशानाद्विरुक्तात्कृताद्द्वित्वात्परस्य या अ उसादेशा विहित तस्मिन् परे सति ङित्त्वेऽपि गुणो भवतीत्यर्थः । ततोऽत्र प्रस्तुत भूधातोः ङित्त्वात्तसि परे गुणप्रतिषेधेऽपि अप्प्रत्यये निमित्ता गुणो भवत्येव । गुणे कृते । भो अव ध्वरादेशे भवतः इति सिद्धम् ॥ बह्वर्थानां बहुत्वे बहुमित्यादि यत्र क्रियते तत्र बहुवचने भू अन्ति इति स्थिते । अप् कर्तरि ओ अव ध्वरादेशे० भव अन्ति इति आगम् ॥ १३ ॥

(प्र०) संज्ञाफलमाह—ङ्कित्यद्व्युसीति । यत्तु नाम्यन्तमित्यमित्यनेन अत्र इति स्यादौ न गुण इति केचिदुक्तं, तन्न युक्तम्, आ० स्वरेऽपि धातोर्या गुणः इति सूत्रे चात्र गुणनिषेधं सिद्धे तदर्थे नाम्यन्तमित्यादिप्रयत्नस्य व्यर्थत्वात् ॥ १३ ॥

अदे ॥ अकारस्य लोपो भवति अकारे एकारे च परे ॥ भवन्ति । भवसि भवथः भवथ ॥ १४ ॥

(च०) सूत्रम्— अदे ॥ अ च ए च अदे तस्मिन् सप्तम्येकवचनान्तं संज्ञाविकम् ॥ अकारस्येत्यादि । प्रत्ययस्य अकारे एकारे च परे लोपो भवति । अनेन च मध्यस्थितस्य अप्प्रत्ययसंबन्धिनोऽकारस्य लोपः । 'स्वरहीनं' । भवन्ति । इति प्रथमपुरुषस्य बहुवचनसाधना ॥ एवं भवसि भवथः भवथ । इति मध्यमपुरुषे वचनत्रयसाधना ॥ उत्तमपुरुषे वचनत्रये मि अप्प्रत्यये नामिना गुणे च कृते । भो अव ध्वरादेशे भव मि भव वस् भव मस इति स्थिते—॥ १४ ॥

(प्र०) अदे इति । [illegible] ॥ १४ ॥

स्मोरा ॥ अकारस्य आत्वं भवति वकारे मकारे च परे । भवामि भवाव भवाम ॥ स राजा धार्मिको भवति । त्वं साधुर्भवसि । अहमात्मविद्भ वामीत्यादि प्रयोक्तव्यम् ॥ १५ ॥

(च०) सूत्रम्—'स्मोरा' ॥ व च म् च स्मौ तयास्मौ समासाद्विवचनान्तम् । आ प्रथमैकवचनं सांकेतिकम् । प्रत्ययसंबन्धिना कारस्य तिवादौ वकारे मकारे च परे आत्वं भवति । अनेन शपोऽकारस्य आकारे । भवामि सो 'भवाव भवाम ॥ अथ प्रत्यकार उक्तिप्रयोगमाह—'स राजा धार्मिको भवति अत्र राजनि कर्तृत्वम् । भवतीति क्रियापदम् । धातो कर्मनिरपेक्षत्वाद् अकर्मकत्वम् । धार्मिक इति विशेषणपदम् । एवं तौ राजानौ धार्मिकौ भवतः । ते राजानो धार्मिका भवन्ति । त्वं साधुर्भवसि । युवां साधू भवथ । यूयं साधवो भवथ । अहमात्मविद्भवामि । आवामात्मविदौ भवाव । वयमात्मविदो भवाम । इत्याद्युक्तवाक्यं प्रयोक्तव्यम् ॥ १० ॥

(प्र०) स्मोरेति । अत्रापि स्यात्त्ववपि नातिप्रसङ्ग उक्तयुक्त । तेन धनवानि स्यादौ नात्वम् । इत्यादि प्रयोक्तव्यमिति । इदमत्र बोध्यम्—युगपत्प्राप्तौ परः । स च त्वं च भवथ । अहं च त्वं च भवाव । अहं च त्वं च स च भवाम इति । उक्तं च—"एकदा वक्तृ क्रियाकालसम्बन्धप्रतिपादने धातोर्नामादिपूर्वेषु य पर स पुमान् भवेत्" । परत्वं चाभिधायकसूत्रापेक्षया न प्रयोगापेक्षया ग्राह्यम् । अस्मिन्नर्थस्यैक स्येऽपि समुदायाश्रिता संख्या ग्राह्या । तदुक्तम्—'द्वयोर्नाम्नोर्बहूनां वा यदि वाक्ये समुच्चय नामद्वयाश्रिता सङ्ख्या कृत्तिवाचोर्विशेषणम् । स च त्वं च अहं चाहमिति विव क्षायां स्वरूपो भवति ॥ १६ ॥

अव्यवधानाच्च पुरुषविशेष ॥ यस्य क्रियापदेन व्यवधान नास्ति तत पुरुषविशेष । अत्र व्यवधान सूत्रस्थ ग्राह्य न तु वाक्यस्थम् । सूत्रक्रमेण पुरुषप्रयोगो भवति ॥ साधू स च त्वं च भवथ ॥ अहं त्वं स च पण्डिता भवाम ॥ १६ ॥

(च०) अथ पुरुषभेदमाह—नामयुष्मदस्मदां द्वयोस्त्रयाणां वा युगपत्प्रयोगे कस्य पुरुषस्य क्रियापदं भवतीत्याह । सूत्रम्—'अव्यवधानाच्च०' ॥ अव्यवधानात्पुरुष विशेष । अव्यवधानाच्च पुरुषक्रियाभि सहाव्यवधानादन्तराहित्यात् प्रथममध्य मोत्तमानां क्रमेण पुरुषविशेष । चकारात्क्रियाभिर्व्यवधानादन्तराहित्यात् उत्तम व्युत्क्रमेण पुरुषविशेष मध्यमप्रथमयोर्मध्यम उत्तममध्यमयोर्मध्यम । एवं सर्वलकारेषु ज्ञेयम् । स च त्वं च भवथ । इति स च भवाव । अहं च त्वं च स च भवाम ॥

इति

अन्तररहितात् क्रियाया सामीप्यात् विशेष स्यात् । अयमर्थ ।

नामयुष्मदस्मदां पुरुषत्रयाणां मध्ये द्वयोस्त्रयाणां वा युगपत्प्रयोगे सति क्रियायाः समानत्वे सर्वं तस्यैव परस्य पुरुषो भवति । तस्यैव पुरुषस्य क्रियायां प्रयोगः । यथा साधु स च त्वं च भवथ इति । अत्र स च त्वं चान्यत्र युष्मद् क्रियासमीपवर्तित्वात् क्रियाया मध्यमपुरुषः । नामयुष्मदोः प्रयोगात् द्विवचनं च । स च त्वं च साधू भवतः । अत्र अस्मदः क्रियायाः समीपवर्तित्वादुत्तमपुरुषद्विवचनस्य प्रयोगः । एवं स च त्वं च अहं च साधवो भवाम इत्यादि ज्ञेयम् ॥ व्याकरणान्तरे तु 'युगपद्वचने परः पुरुषः' नामन्यत्र (नामयुष्मदस्मदां मध्ये) द्वयोस्त्रयाणां च प्रयोगे च परो भवति । वचनं तु क्रियायाः सामान्यत्वान्मिलितवचनम् । इति वर्तमाने साधना ॥ १६ ॥

भूङ् प्राप्तौ आत्मनेपदी । तस्मादेते प्रभृतीनि नव वचनानि प्रयोज्यानि । अप्गुणाव । भवते ॥*॥

(च) भूङ् प्राप्तौ इत्यात्मनेपदी तस्मादातो तेप्रभृतीनि नव वचनानि प्रयोज्यानि । अप् कर्तरि गुणः ओ अव भवते । भू आत इति स्थिते । अप् कर्तरि गुणः ओ अव स्वरहीनं नव आत इति स्थिते ॥*॥

(प्र०) भूङ् प्राप्ताविति । ननु भूङ् प्राप्ताविति आत्मनेपदिप्रकरणेऽनभिधाय कथं परस्मैपदिप्रकरणे उक्तः । उच्यते । सत्तार्थभिन्नप्राप्त्यर्थभूधातुरस्तीति ज्ञापनार्थं सत्तार्थभूधातुकथनानन्तरं भूङ् प्राप्ताविति कथनम् । अथवा तिबादिनववचनकार्येषु कृत्वा तप्रभृतिनववचनानां कार्यप्रदर्शनार्थं तत्कथनम् ॥ * ॥

आदाय ई ॥ अकारात्परस्य आत् आयुसम्बन्धिन आकारस्य ईकारो भवति ॥ भवेते भवन्ते । भवस भवेथे भवध्वे । अदे—भवे भवावहे भवामहे ॥ स प्रियं भवते ॥ १७ ॥

(च०) सूत्रम्— आदाय ई' ॥ आ लोपः । आत् च आय च आदाय तस्य आदाय । ई । सा । आदौ स्वः मध्ये आदेशलोपः । त्रिपदं सूत्रम् । अकारात्परस्य आत आथ आताम् आथाम् इति वर्तमाना आशीःप्रेरणाऽद्यतनप्रथमपुरुषमध्यमपुरुषद्विवचनस्याकारस्य इकारादेशो भवति । अनेन आत इत्यस्याकारस्य इकारः 'अ इ ए' भवते । भू आत इति स्थिते 'अप् कर्तरि गुणः' 'ओ अव्' आदाय ई' अनेन आकारस्य इकारः 'अ इ ए' भवथे भवध्वे । भू ए इति स्थिते । 'अप् कर्तरि' गुणः ओ अव अ' अव । 'अस्मदः' भवावहे भवामहे । स पुरुषः प्रियं लक्ष्मीं भवते इत्युदाहरणम् ॥ १७ ॥

(प्र०) आदाय ई । आ किम् अन्त्यस्य माभूत् । परः किम् आत । सन्तारूस्यादय सवर्णदीर्घे इसे पुन सवर्णे र्घे ॥ १७ ॥

विधिसम्भावनयो —यात् याताम् युस्, यास् यातं यात, याम् याव याम, ईत ईयाताम् ईरन् ईथास् ईयाथाम् ईध्वम् , ईय ईवहि ईमहि ॥ विधि कर्तव्या

र्थोपदेशः । संभावनं कल्पनमूहः । तत्र यादादयः प्रत्ययाः भवन्ति ॥ लिङिति चैषां संज्ञा पाणिनीयानाम् ॥ १८ ॥

(च०) अथ द्वितीयं लकारमाह—'विधिसंभावनयोः' ॥ विधिश्च संभावनं च विधिसंभावने तयोः विधिसंभावनयोः । अथाप्यत्रादशापि पदानि प्रथमैकवचनान्तानि । एवमकार्नविंशतिपदं सूत्रम् । अथ विधिसंभावनयोरिति पदं व्याचष्टे—विधिरित्यादि । कर्तव्यं कर्तुं योग्यो यः स कर्तव्यार्थस्तस्योपदेशः शिक्षा स कर्तव्यार्थोपदेशः ॥ अथवा अज्ञातस्य वस्तुनो ज्ञापनं विधिः । कर्तव्यार्थो यथा—'विप्रो वेदमधीयीत' अध्ययनं प्राप्त इत्यादि शिक्षारूपम् । सर्वोऽप्ययं विधिः ॥ तथा संभावनं कल्पनं विचारणमुच्यते । तस्य पर्यायान्तरमूह इति । वितर्क इत्यर्थः । ततो विधौ संभावने च यादादयोऽष्टादश प्रत्ययाः परस्मैपदात्मनेपदभेदेन भवन्ति । एषां यादादीनामष्टादशानां पाणिनीयव्याकरणपाठकानां मते लिङ् इति संज्ञा ॥ भू इति स्थिते सति प्रथमैकवचने भू यात् । 'अप् कर्तरि' 'गुणः' 'ओ अव्' । भव यात् इति स्थिते ॥ १८ ॥

(प्र०) विधीति । कर्तव्येऽर्थे उपदेशः आज्ञापनं भृत्यादेरित्यर्थः । एतेन निमन्त्रणाधीष्टानामप्यत्रान्तर्भावः सूचितः । अत्रापि प्रवर्तनमात्रस्य सद्भावात् । तत्र नियोगकरणं निमन्त्रणम् । इह भवान् भुञ्जीत । आमन्त्रणं कामचारकरणम् । इह भवानासीत । अधीष्टं सत्कारपूर्वको व्यापारः अधीष्वमौ माणवक भवानुपनयेत । संभावनस्यार्थमाह—कल्पनमिति । अस्यापि पर्याय ऊहः ॥ १८ ॥

या ई ॥ अकारात्परो या ई भवति ॥ अ इ ए । भवेत् भवेताम् ॥१९॥

युस इट् ॥ अकारात्परस्य युस इडागमो भवति ॥ भवेयुः । भवेः भवेतम् भवेत ॥ २० ॥

(च०) सूत्रम् । 'या ई' ॥ या प्रथमैकवचनान्तं सांकेतिकम् । ई प्रथमैकवचनान्तम् । अकारात्परो विधिर्विध्यादिप्रत्ययस्य या या इति वर्णः स ई इति भवति । इकारः 'अ इ ए' भवेत् भवेताम् । बहुवचने भव युस् इति स्थिते । 'युस इट्' युस षष्ठ्येकवचनान्तम् । इट् प्रथमैकवचनान्तम् । द्विपदम् । अकारात्परस्य युस इत्येतस्य वचनस्य इडागमो भवति । टित्वादादौ । 'अ इ ए' भवेयुः । भव भवेः भवेत । सर्वत्र 'या ई' इतीकारः । उत्तमपुरुषैकवचने भव याम् इति स्थिते ॥ १९-२० ॥

(प्र०) या ई इति । अनुकार्यानुकरणयोरभेदविवक्षयाऽविभक्तिको निर्देशः । 'आदाय इ' रित्यत इरित्यनुवर्तते । अकारादेरत्र श्रवणाभावात् ॥ १९ ॥

यामियम् ॥ अकारात्परो यामियं भवति ॥ भवेयम् भवेव भवेम । शिष्यो गुरुशुश्रूषको भवेदिति विधिः । भवेदसौ वेदपारगो ब्राह्मणत्वादिति संभावनम् ॥ भवेत भवेयाताम् भवेरन् । भवेथाः भवेयाथाम् भवेध्वम् । भवेय भवेवहि भवेमहि । 'अद इमिर्हि भवेय ॥' २१ ॥

(च०) सूत्रम्—'यामियम्' ॥ याम् चन्द्रः करणमान्तम्। इयम् प्रथमैकवचनान्तम्। अकारात्परस्य यामिति वचनस्य इयम् भवति। गुरुवासनवस्यादन। भवतम्। द्वित्वबहुत्वयो। 'या ई' इतीकार। भवव भवम। इति सिद्धम् ॥ अर्थोदाहरणम्। शिष्यो गुरुशुश्रूषको भवत्। विधि। अत्र शिष्यस्य गुरुशुश्रूषायाः कर्तव्यार्थे अस्याः पदशविधि शिष्यम गुरुशुश्रूषा कर्तव्यत्वमुपदिश्यते। ततोऽत्र विधौ यागादय। तथा असौ महाणस्यापाठ्यागतो भवत् इति सम्भावने सम्भव यगादय प्रत्यया स्युः। माहात्म्यत्व वद्यारगस्य सम्भाव्यते इत्यर्थः। एवमन्यान्यप्युदाहरणानि ज्ञेयानि ॥ २१ ॥

(प्र०) यामिति। भवयमिति इयमादेश एव भवत भवमति येविश्व एत्व निष्य इति शुध एव इति शुध एकागते शुध एक इति विधिरिति शुध एकत्वमागमस्य करणस्याधम्य अत्रापवादैर्व तौ तादृशौ भवेतां न तादृशा भवतु स्व तादृश भव शुर्वा साधु भवतः यूय सन्तो भवत। अह साधुर्भवेयम् आवां तादृशौ भवाव वयं सन्तो भवत्ति प्रयोज्यम्। इति स्फुभावनमिति भावनत्वेन छन्दोऽप्यगतत्वस्य सम्भवात् ॥ २१ ॥

आशीःप्रेरणयो—र्लुप् ताम् अन्तु, हि तम् त, आनिप् आवप् आमप्। ताम् आताम्, अन्ताम्, स्व आथाम् ध्वम्, ऐप् आवहैप् आमहैप्॥ अप्राप्तप्रार्थनमाशीः परस्यधर्मांशसन वा प्रेरण प्रवर्तनम्। तत्र तुबादय प्रत्यया भवन्ति ॥ एषां संज्ञा लोट् ॥ २२ ॥

(च०) सूत्रम्—'आशीः प्रेरणयोः' ॥ आशाश्च प्रेरणं च आशा प्रेरणे तदन्या। प्रेरणयोः। सप्तमीद्विवचनान्तम्। यथापि तुबादीन्यामहैप्पर्यन्तानि अष्टादश प्रत्यया प्रथमैकवचनान्तानि लोपतिकानि। एवमेकमर्थविंशतिरिदं सूत्रम्। आशिषं प्रेरणं च्यते हे—अप्राप्तस्य वस्तुन स्वयं प्रार्थनं मे इदं वस्तु भवतु इत्याशी। परस्याप्यवक्रमस्य इदानीमर्थं काम्यितार्थकथनं वा आज्ञापयन। तथा हे शिष्य इदं कार्यं कुरु इति वाक्य तस्य तद्व प्रेरणम्। तत्र आशिषि प्रेरणे च तुबादय आमहैप्पर्यन्ता अष्टादश प्रत्ययाः परस्मैपदात्मनेपदभेदेन भवन्ति। एषां च तुबादीनां पाणिनीयानां मते लोट् इति संज्ञाकरणम्। भू। तुबादय। सर्वधातु। 'कर्तरि शप्' भू अ आदि 'स्वरादावेः' एकारविकारार्थे। भव तु। भू तुप इति स्थित ॥ २२ ॥

(प्र०) आशीरित्यादि—अप्राप्तेति। प्रार्थना इच्छा। परस्येति। तस्य निष्ठस्य प्रतिपादनमादीनमर्थं वा। एतस्मात् प्रेरणमिति। तेन विधिप्रेरणादिभिरन्यैरपि पर्यायैर्न अर्थं भवति। प्रवर्तमानस्यापि तस्यापि सत्त्वात्। तत्र विधि प्राप्तवतीत्यादि। प्रेरणं प्रवर्तनं यथा प्रेरितोऽप्रतिहतः भाषकाकस्य कार्य अस्मिन्न कर्मकारकं तुम् लोटीति। आशीः प्रेरणार्थविधिनियोगेषु लोडिति विस्तरः ॥ २२ ॥

तुह्योस्तातङाशिषि वा वक्तव्यः ॥ भवतु—भवतात् भव ताम् भवन्तु ॥ २३ ॥

(च०) 'तुह्योस्तातङ्ङाशिषि वा' ॥ तुश्च हिश्च तुही तयोः तुहो आशी प्रेरणे तुप् हि इत्येतयोर्वचनयोराशिष्यर्थे वाच्यमाने तातङित्यादेशो वा भवति । ङकारो ङित्कार्यार्थ । गुणनिषेधार्थमनुनासिकत्वात् । अत्र तु आत्प्रत्ययनिमित्तो गुणो भवत्येव । अकार उच्चारणार्थ । गुरुत्वात्सर्वस्य तान् इति । तेन प्रथमपुरुषैकवचने स्याद् यम् । भवतु भवतात् । भवताम् । भव अन्तु इति स्थिते 'अदे' इत्यकारलोप । 'स्वरहीनं०' भवन्तु । मध्यमपुरुषैकवचने भव हि इति स्थिते ॥ २३ ॥

(प्र०) तुह्योरित्यादि । अत्र तातङो ङित्त्वं गुणप्रतिषेधस्य प्रसारणाद्यभावतया सम्भवत्प्रयोजनमतो नान्त्यादेशं प्रयोजयति । अनन्यप्रयोजनमेव ङित्त्वमन्त्यादेशं प्रयोजयति ॥ २३ ॥

अतः ॥ अकारात्परस्य हेर्लुग्भवति न तु तातङि ॥ तातङिति ङित्करण गुणवृद्धिप्रतिषेधार्थं न त्वन्त्यादेशार्थम् । भव-भवतात् भवतम् भवत । भवानि भवाव भवाम । आयुष्मान् भवतु भवान् । अध्ययनायोद्यतो भव सौम्य ! ॥ भवताम् भवेताम् भवन्ताम् । भवस्व भवेयाम् भवध्वम् । भवै भवावहै भवामहे । हरिं भवस्व त्वम् ॥ २४ ॥

(च०) 'अतः' ॥ पञ्चम्येकवचनान्तम् । अकारादुत्तरस्य हि इति वचनस्य लुग्भवति । अनेन हेर्लुग्भवति । भव इति सिद्धम् । द्वितीयरूपे । 'तुह्योस्ताद०' इति तातङादेशः । भवतात् भवत भवत । उत्तमपुरुषैकवचनत्रयेऽपि सवर्णे दीर्घे०' भवानि भवाव भवाम । अथोदाहरणम्—भवानायुष्मान् भवतु । इत्याशा । एवं भवन्तावायुष्मन्तौ भवताम् । भवन्त आयुष्मन्तो भवन्तु । अत्र यद्यपि भवच्छब्दो युष्मच्छब्दवाची तथापि सामान्येन नामरूपत्वात् प्रथमपुरुषप्रयोग । हे सौम्य ! त्वमध्ययनाय पठनाय उद्यत सावधानो भव । अत्र प्रेरणे मध्यमपुरुषैकवचनप्रयोग । एवमन्यदप्युदाहरणं ज्ञेयम् ॥२४॥

(प्र०) अत इति । स्थानिवद्भावेन तातङो हित्वेऽपि लोपो न । 'ओवा इ'रित्यनेत्यनुवृत्तस्य व्यवस्थितत्वेन स्वीकारात् । अत किम् । युहि । तपर किम् । याहि । हे किम् । भवत । ननु अत इति सूत्रे वाग्रहणं कर्तव्यम् । ओर्वा हे रिति सूत्रे इतस्तदनुवृत्तिकरणेनास्य योगपूर्वादिति लाभ, वैपरीत्यकल्पनायां विधानगौरवप्रसङ्ग इति चेन्न ओर्वाहेरिति सूत्रे वापदोपादानेन कार्यद्वयप्राप्तिसत्त्वाद्ग्रहणमत्र तु कार्यैकत्वात्तदग्रहार कर्तव्य ॥ २४ ॥

अनद्यतनेऽतीते-दिप् ताम् अन्, सिप् तम् त, अमिप् व म। तन् आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ॥

अतीताया रात्रेर्यामद्वयादर्वाग्यावदागामिन्या प्रथमयामद्वय सोऽद्यतनस्ततो योऽनद्यतनस्तस्मिन्ननद्यतनेऽतीते काले दिबादय प्रत्यया भवन्ति ॥

परो संज्ञा लङ् ॥ दिसिमि इत्येतेषामिकार उच्चारणार्थ । ततो मकार 'इष्ण यकठौरि' इति विशेषणाद । 'वावसाने' इति दकारस्य तकार ॥ २५ ॥

(च०) 'अनद्यतनेऽतीते' । न विद्यतेऽद्यतनो यस्मिन् सोऽनद्यतनस्तस्मिन् अनद्यतने सप्तम्येकवचनान्तम् । अतीते सप्तम्येकवचनान्तम् । अर्थे दिवादीन्यष्टादशादीनि प्रथमैकवचनान्तानि लौकिकानि । एवं त्रिपदमिदं सूत्रम् । अथ वृत्तिकारोऽनद्यतनेऽतीते इति पद व्याचष्टे अतीतायां इति । वर्तमानदिनात्प्राक् अतीतायां गतायां रात्रौ अन्त्ययाम इत्यतोऽर्वाक् वर्तमानदिनं संधाय यावत् आगामिन्यां आसन्नवर्तिन्यां रात्रौ प्रथमप्रहरद्वयं सोऽद्यतनप्रमाणः कालोऽद्यतन इत्युच्यते । ततोऽन्यतन कालोऽन्यः । स च अनद्यतनो द्विधा । अतीतानागतभेदात् । तत्रातीतेऽनद्यतने काले वर्तमाने सति दिवादयो यदि वर्तन्ते परस्मैपदात्मनेपदेष्वाद्यन्ता प्रत्यया भवन्ति । एषां चाद्यान्तानां पाणिनीय मत लङ् इति संज्ञा—'अनद्यतने लङ्' इति ॥ दिसिमीत्यादि । तत्र दिप सिप् अमिप् इत्यत्र पकार पित्कार्यार्थं । इकार उच्चारणार्थं । तत द् स् अम् इत्यवशिष्यते । आ इत्यत्र लङ् इति वचनस्य वकारः 'इष्ण सम्यकठौरि' इति सूत्रार्थं । भू । दिवादीनि नव परस्मैपदवचनानि । सर्वत्र 'नामिनोरि' गुणः 'आ अव' प्रथमपुरुषैकवचने । 'वावसाने' इत्य तः ॥ २५ ॥

(प्र०) अनद्यतने इति । अस्मिन्नद्यतनान्यत्र । तच आदित्यादिदिनप्रत्यय आद्यान्तार्थे निरस्यते । तद्विशेषणत्वात्सप्तमी । अद्यतनशब्दस्य कियान् काल इत्याह—अतीतायां इत्यादि । अतीता गता या रात्रिश्चतुर्यामात्मिका तस्या यथामुख्यं तदर्वाक् आगामिन्या रात्रेः प्रथमयामद्वयं यावद्भवति तावानष्टयामात्मकः कालोऽद्यतन उच्यते । अहरादयारभ्य अहरादिपर्यन्तः काल इति केचित् । सूर्योदयादारभ्य सूर्योदयपर्यन्तमित्यन्ये । लौकिकानां द्वावेव इति तत्रैव व्यवहारदर्शनात् । अथ भवादयः 'स्वकालविषि' तनः । अद्यतनस्य कालत्रितयेन अतीतवर्तमानानागतभेदात् । अतीते सि । वर्तमाने तिबादि । अनागते स्यप् । नास्त्यद्यतनो यस्मिन्निति बहुव्रीहिः तस्मिन् ह्यस्तने काले दिवादिरित्यर्थःपरार्थ । नन्वर्थे ह्यस्तन इत्यपकारस्तु अनागतकालाद्यापि भवति चास्य सत्यम् । न चात्मनित्यमित्यद्यतनेऽपि परोक्षेऽपरोक्षे चादिविषयमिदम् । तत्र 'बहुजग' पुरस्तादस्य मता किलाहं चकार न किल चात्र मौद्यादिवृत्तस्य' इत्याद्भिप्रयोगा मिद्धाः । बहुमाविषयेऽद्यतनेऽद्यतनाभावादद्यतने दिवादिप्रसङ्गाशङ्का तु न । अद्यतने अद्यापवाद्यतनस्य व्याप्यस्य सत्त्वात् ॥ २५ ॥

दिवादावट् ॥ दिवादौ परे धातोरडागमो भवति ॥ अभवत् अभवताम् अभवन् । अभवः अभवतम् अभवत । अभवम् अभवाव अभवाम । ओऽ भवस्त्वसुरः ॥ २६ ॥

(च०) सूत्रम्—'दिवादावट्' । दिप आदिर्येषामसौ दिवादिस्तस्मिन् दिवादौ सप्तम्येकवचनान्तम् । अट् प्रथमैकवचनान्तम् । अव्य । 'आ अव' द्विपदमिदं सूत्रम् ।

दिवादौ प्रत्यये परे सति धातोः अट् इत्यागमो भवति । दिवादावट् । अभवत् अभवताम् । बहुवचने—'अदे' इत्यकारलोपः । 'स्वर०' अभवन् । मध्यमपुरुषैकवचने—'सोर्वि०' अभवः अभवतम् अभवत । उत्तमपुरुषैकवचने—'अदे' इत्यकारलोपः 'स्वर०' अभवम् । द्वित्व बहुत्वयोः—'आमा' अभवाव अभवाम । अथोदाहरणं कल्पे—अतीतदिने पूर्वेद्युः तव पुत्रः अभवत् । एवं ह्यः तव पुत्रौ अभवताम् । तव पुत्रा अभवन् । ह्यस्त्वमभवः । ह्यः युवामभवतम् । ह्यो यूयमभवत । ह्योऽहमभवम् । ह्यः आवामभवाव । ह्यः वयमभवाम इत्या द्युदाहरणानि योज्यानि । एवं भवतिवत्कर्तरि विभक्तिचतुष्टये परस्मैपदिनां धातूनामुदाहरणानि योज्यानि ॥ २६ ॥

अभवत अभवेताम् अभवन्त । अभवथाः अभवेथाम् अभवध्वम् । अभवे अभवावहि अभवामहि । स राज्यमभवत ॥

(च०) अथात्मनेपदिनो भूधातोस्तनादयो नव प्रत्यया भवन्ति । भू तन् इति स्थिते 'अप कर्तरि' 'गुण' 'ओ अव्' 'दिवादावट्' ततो नकार इत् । अभवत । 'आताम्' 'अइए' अभवेताम् अभवन्त । अभवथाः अभवेथाम् अभवध्वम् । 'अइए' अभवे अभवावहि । अभवामहि । स पुरुषो राज्यमभवत । इत्युदाहरणम् ॥

अथ णबादि कर्तरि प्रणीयते—परोक्षे णप् अतुस् उस्, थप् अथुस् अ, णप् व म । ए आते इरे, से आथे ध्वे, ए वहे महे ॥

धातोः परोक्षेऽतीते काले णबादयः प्रत्यया भवन्ति ॥ एषां संज्ञा लिट् ॥२७॥

(च०) अथ णबादि विभक्तिपट्कं कर्तरि कथ्यते प्रणीयते प्रदर्श्यते इत्यर्थः ॥ सूत्रम्—'परोक्षे' ॥ अक्ष्णः परागोचरः पराक्षस्तस्मिन् परोक्षे । 'कचिदपवादस्य परत्वम्' इति पराक्षस्यादौ प्रयोगः अक्षशब्दस्य परत्वम् । पराशब्दोऽत्र साक्षादिन्द्रियार्थ गृह्यते । परार्थवाचको न पराशब्दः यथा 'अलुक् क्वचित्' ॥ प्रक्षिप्यमानस्तु पारस्करादित्वात् सुडागमः । णबादीन्यष्टादशापि पदानि लौकिकप्रथमैकवचनान्तानि । एवमेकार्थविंशति पदं सूत्रम् । धातोः इन्द्रियागोचरे अतीते गते काले णबादयोऽष्टादश प्रत्यया परस्मैपदात्मनेपदयोर्भवन्ति । एषां पाणिनीयमते लिट् इति संज्ञा ॥ २७ ॥

(प्र०) परोक्षे इति । अक्ष्णः पर इति परोक्षं, टाबन्तः इत्यनेनाकारान्तस्य समासान्तः । अव्ययीभावः । अक्षादिन्द्रियात् पर इति कचिदमाप्तस्य परत्वमिति पाक्षि अक्षादिस्थानं परस्यौकारः । अनद्यतन इत्यनुवर्तते । अनद्यतनेऽतीते परोक्षे धात्वर्थे वाच्ये वा धातोर्णबादयः प्रत्यया स्युरित्यर्थः । अनद्यतने किम् । ह्यस्तनवत् । अत्र च अद्य परोक्षार्थे न विकल्पनम् । अतीते किम् । भविष्यति मा भूत् । अत्र पुनर्भविष्यत् अनद्यतनपरोक्षाभावः । इह विषयविदिनगारिविशेषा भवन्तीत्याह । अथाद्य नार्थे अनद्यतनत्वात् । परोक्षे अतीतेऽपि भवति । परोक्षं किं ह्यस्तनीविषय इति इत्युदाहरणम् । अथ परोक्षेऽत्र किञ्चित्परतः व्यापारकलापविषयकत्व प्रत्यक्षत्वं विषयत्वज्ञानस्य उच्चारणस्य अनुपपत्ति गुणानुगुणत्वम् इति।

अपित्वादिति' रित्यतोऽपिदित्यनुवृत्तम् । कित् किद्वत् । कार्यातिदेशोऽयम् । ईज्जु । ऊदुवतु ॥ २७ ॥

णादि॰ कित् ॥ अपित् णादि किद्भवति ॥ २८ ॥ द्विश्च ॥ णबादिसंयोगे धातोर्द्विवचनम् ॥ २९ ॥ सस्वरादिर्द्विरद्विः ॥ सस्वरो धोऽवयवोऽद्विरुक्तो द्विर्भवति ॥ ३० ॥ भू भू णप् इति स्थिते । णकारो वृद्धयर्थं । पकार पित्कार्यार्थं ॥

(च०) सूत्रम्— णादिः कित्' ॥ अपित् णादि किद्भवति । कित्त्वाद्गुणाभाव । अथ भूधातो परस्मैपदप्रक्रिया प्रदर्श्यते । भू णप् इति स्थिते णो वृद्धयर्थः । पकार पित्कार्यार्थं । भू अ इति स्थिते । सूत्रम् 'द्विश्च' ॥ द्वि द्विवारम् इति विग्रहे "द्वित्रिचतुर्भ्यः सुच्" इति सुच् द्विस प्रथमैकवचन सि अव्यया०' 'खोर्वि०' । च अव्ययं ॥ द्विश्च' ॥ णवादिसंयोगे सति धातोर्द्विवचनं द्वित्वं भवति ॥ सूत्रम्—'सस्वरादिर्द्विरद्विः' ॥ स्वरेण सहित सस्वर स्वरसहित इत्यर्थ । सस्वरश्चासौ आदिश्च सस्वरादि प्रथमैकवचनान्तम् । द्वि अव्ययम् । न द्वि अद्वि त्रिपदं सूत्रम् । सस्वर अद्विरुक्त आद्यावयवो द्विर्भवति । भू भू अ इति स्थिते ॥ २८-२९-३० ॥

(प्र०) द्विश्चेति । अत्र द्विर्वचने द्वि प्रयोग एव न स्यादेवं । तत्र सुनोतेः स्यादौ कृतस्य सत्याभावात् यत्वं न अनन्तरस्येति न्यायात् सुषुप्सतीत्यादिरेव गृह्यते न तु विशेषणान्तमित्यादिविहितोऽपि तत्र वस्त्यादौ द्वित्वं न ॥ ३० ॥

आभ्वोर्णादौ ॥ [आ, अश्च भूश्च अभ्वौ तयो] पूर्वस्याकारस्य भूशब्दस्य च आकारो भवति णादौ सति ॥ ३१ ॥ ह्रस्वः ॥ पूर्वसम्बन्धिनो दीर्घस्य ह्रस्वो भवति ॥ ३२ ॥

(च०) सूत्रम्—'आभ्वोर्णादौ' ॥ अश्च भूश्च अभ्वौ तयो अभ्वोः । ण आदिर्यस्यासौ णादि तस्मिन् णादौ । आदौ सवर्णे दीर्घ सह' द्विपदे 'आभिना' द्विपदं सूत्रम् ॥ णादौ पर द्वित्वे कृते सति पूर्वस्य द्विरुक्तस्य अकारस्य तथा भूधातुसम्बन्धिन उकारस्य च आकारान्तो भवति । यद्यप्यासेऽभ्यासे आकारकरणं विनैव सिद्धिस्तथापि व्यापकत्वे आनन्तर्यं इत्यादिसिद्धयर्थमकारग्रहणम् । इति पूर्वस्य भूशब्दस्य आ । आ भू अ इति जाते ॥ सूत्रम्— ह्रस्वः' ॥ एकपदम् । पूर्वसम्बन्धिदीर्घस्य ह्रस्वो भवति । अनेन पूर्वस्य ह्रस्व ॥ अ भू अ इति स्थिते ॥ ३१-३२ ॥

(प्र०) आभ्वोर्णादाविति । ननु वा वस्तुना वस्त्यनुवृत्ते व्यवस्थया भावकर्मणोर्बभूवे नास्य तत्र बुभूवे सुषुवे इति । तथा बभूव अनुबभूव इति रूपमेव स्यात् । यद्यपि भूधातोः दीर्घोकारकरणमनर्थकं तथाप्याचार्येणाकारदर्शनम् ॥ ३२ ॥

ह्रपानां जबगडदाः ॥ पूर्वसम्बन्धिनां झपानां जबगडदाश्च भवन्ति

॥ ३३ ॥ झढघधभानां जडदगबा भवन्ति । खफछठथानां चटतकपा भवन्ति इति पूर्वभकारस्य बकारः ॥ भुवो वुक् ॥ भुवो वुगागमो भवति णादौ स्वरे परे ॥ बभूव बभूवतुः बभूवुः ॥ ३४ ॥

(३३) सूत्रम्—'झबानां जबचपाः' ॥ झबानां जबाश्च चपाश्च जबचपाः । ... झढघधभानां जडदगबा भवन्ति खफछठथानां चटतकपा भवन्ति ॥ इत्यनेन सूत्रेण भकारस्य बकारो जातः । पुनरत्र ... (३४) सूत्रम्—'भुवो वुक्' ॥ भूधातोर्णकारादौ स्वरे परे वुगागमो भवति ॥ ... 'स्वाद्यौ' । बभूव बभूवतुः बभूवुः । बभूव इति सिध्यते ॥ ३३-३४ ॥

ऋदिर्णादेः ॥ डुकृञ् करणे । सृ गतौ । भृञ् धारणपोषणयोः । वृञ् वरणे । द्रु गतौ । श्रु श्रवणे । स्तु स्तुतौ । द्रुम् ... इत्येतस्मात् ... णादेर्णादेर्गणस्येड् न भवति ... 'यद्यागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति ... बभूविव बभूवथुः बभूव । बभूव बभूविम । बभूविवान् बभूव ॥ ३५ ॥

(३५) सूत्रम्—'ऋदिर्णादेः' ॥ [illegible]

[illegible]

(३६) [illegible] ॥ ३६ ॥

[illegible] ॥

(३७) [illegible]

नामिनोऽष्चतुर्णां षो ढ॰ ॥ नाम्यन्ताद्धातोरुत्तरस्य तिवादिचतुष्कस्यातिरिक्तस्य लिटो हृद्‌लिटोश्च धस्य ढो भवति ॥ ३६ ॥ अत्र सेटो हसाद्वेति वक्तव्यम् ॥ बभूविध्वे बभूविढ्वे । बभूवे बभूविवहे बभूविमहे । रामो राज्य बभूवे ॥

(च०) सूत्रम्—'नामिनोऽष्चतुर्णां०' नाम अस्यास्तीति नामी तस्य नामिन । अचतुर्णां च ढ॰ । नामी अन्त यस्य स नाम्यन्त तस्मान्नाम्यन्तात् धातोरुत्तरस्य तिवादिचतुष्कस्यातिरिक्तस्य लिटो हृद्‌लिटो धस्य ढकारा भवति । अनेन सूत्रेण धकारस्य ढकारा जात । अत्र अस्मिन्सूत्रे (सेटो हसाद्वेति वक्तव्यम्) अस्यार्थ—इटा सह वर्तमान सट् तस्मात् सटः हकारात् वा भवति इति विकल्पन धस्य ढो भवति । अतो बभूविध्व बभूविढ्व इति रूपद्वयं जातम् । बभूव बभूविवह बभूविमह । रामो राज्य बभूव । भूधातोर्लिट्प्रकारा समाप्तिमगमन् । एवं षष्ठ लकारा उक्त ॥ ३६ ॥

आशिषि—यात् यास्ताम् यासुस्, यास् यास्तम् यास्त, यासम् यास्व यास्म । सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ॥ धातोराशिषि यादादयो भवन्ति ॥ एषां संज्ञा लिङ् ॥ ३७ ॥

(च०) अथ सप्तमो लकार प्रारभ्यते । सूत्रम्—'आशिषि०' ॥ आशिषि इत्यस्यैकवचनान्तम् । अथै यादादीन्यष्टादशानि प्रथमैकवचनान्तानि सांकेतिकानि । एकानर्हितमिदं सूत्रम् । धातो कत्रुआशामाशिषि अप्राप्तप्रापणात्मकार्थो परस्मैपदार्थेऽनैसनस्य आर्थो वाक्यमाभावो यादादयोऽष्टादशप्रत्ययाः परस्मैपदात्मनेपदभेदेन भवन्ति । यादि आदौ अत्र एषां संज्ञा लिङ् । भूधातोः परस्मैपदित्वात् अत्र यादीन्येव प्रत्यया भवन्ति ॥ ३७ ॥

(प्र) आशिषीति । स्वस्य परस्य वाऽर्थस्याऽऽशंसनमाशी । तस्यां वाच्यायां यादादय । अत्र प्रायशःक्रिया पूर्वोक्तानुसारेण ॥ ३७ ॥

आशीर्वादे च किदिति वक्तव्यम् ॥ तेन गुणाभाव । भूयात् भूयास्ताम् भूयासु । भूया भूयास्तम् भूयास्त । भूयासम् भूयास्व भूयास्म । स श्रीमान् भूयात् ॥ ३८ ॥

(च०) 'आशीर्वादे' ॥ यं परस्मैपदं किद् भवति इति वक्तव्यम् । किस्वात् गुणाभाव । भूयात् भूयासु । भूयाः [illegible]स्त । भूयासं भूयास्व भूयास्म । स पुरुष श्रीमान् लक्ष्मीवान् भूयात् । [illegible] एवं तौ श्रीमन्तौ भूयास्ताम् । ते श्रीमन्तो भूयासु ॥ ३८ ॥

([illegible]) [illegible] ॥ १८ ॥

[illegible] इति [illegible] ॥ [illegible] ॥ [illegible] भवति ॥ १९ ॥ [illegible] ।

[illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible]

[illegible] । इति [illegible] ॥

[illegible]

[illegible]

[illegible]

ता भवितारौ भवितार । भवितासि भवितास्थ भवितास्थ । भवितास्मि भवितास्व भवितास्म । त्व प्रातःकाले तत्र हरि प्रत्यक्षो भविता ॥ ४० ॥

भविता भवितारौ भवितार । भवितासे भवितासाथे भविताध्वे । भविताहे भवितास्वहे भवितास्महे । द्वयो हरि भवितासे ॥

(म०) अथात्मनेपदिना भूद् धातो रूपाणि पूर्वोक्तेनैव सूत्रेण साधितव्यानि । भविता भवितारौ भवितार । भवितासे भवितासाथे भविताध्वे–[भविताद्ध्व] भविताहे भवितास्वहे भवितास्महे । इति रूपाणि । त्वा हरि भविता इत्युदाहरणम् । एते चात्मनेपदस्योदाहरणानि विस्तरभयान्न लिखितानि । लुट्लकार समाप्त । समाप्तोऽयं सप्तमो लकार ॥

स्यादौ भविष्यति स्यप् ॥ धातोर्भविष्यति काले स्यप् प्रत्ययो भवति तिबादिष्वष्टादशसु परेषु । अस्य सज्ञा लृट् ॥ भविष्यति भविष्यत भविष्यन्ति । भविष्यसि भविष्यथ भविष्यथ । भविष्यामि भविष्याव भविष्याम । कल्किधर्मप्रवर्तको भविष्यति ॥ ४१ ॥

(म०) सूत्रम्– स्यादौ भविष्यति स्यप् ॥ स्यादौ भविष्यति, स्यप् । त्रिपदं सूत्रम् । भविष्यतीति भविष्यत् तस्मिन् भविष्यति काले धातो तिबाद्यष्टादशसु परस्मैपदात्मनेपदवचनेषु परेषु स्यप् प्रत्ययो भवति । पकार पित्कार्यार्थ । पाणिनीयाना मते अस्य लृट् इति संज्ञा । भू तिप् इति स्थिते स्यादौ भविष्यति स्यप' अनेन सूत्रेण स्यप प्रत्यय । सिमतामास्परां अनेन सूत्रेणेट् । 'गुण इति गुण । 'ओ अव् इति अव । क्विनाद० इति षकारः पूर्वोक्तेन सूत्रेण भविष्यति इति रूपं सिद्धम् । अत्र न्यानि सूत्राणि पूर्वोक्तानि ज्ञेयानि । भविष्यति भविष्यत भविष्यन्ति । भविष्यसि भविष्यथ भविष्यथ । भविष्यामि भविष्याव भविष्याम । कल्किनामेश्वरस्यावतारो धर्मप्रवर्तको भविष्यति इत्युदाहरणम् । इति परस्मैपदिनो रूपाणि कथितानि ॥ ४१ ॥

भविष्यते भविष्येते भविष्यन्ते । भविष्यसे भविष्येथे भविष्यध्वे । भविष्ये भविष्यावहे भविष्यामहे ॥ सावर्णी राज्य भविष्यते ॥

(म०) अथात्मनेपदिना रूपाणि कथ्यन्त । पूर्वोक्तेनैव सूत्रेणात्मनेपदिनोपि रूपाणि सिध्यन्ति । भविष्यते भविष्येते भविष्यन्ते । भविष्यसे भविष्येथे भविष्यध्वे । भविष्ये भविष्यावहे भविष्यामहे । सावर्णिर्मनु राज्यं भविष्यते इत्युदाहरणम् । इत्यात्मनेपदिना रूपाणि । समाप्तोऽयं लृट्लकार । अष्टमो लकार समाप्त ॥

स्यप् क्रियातिक्रमे ॥ धातो क्रियाया अतिक्रमे कुतश्चिद्वैगुण्याद निष्पत्तौ सत्यां दिवादिपर स्यप् प्रत्ययो भवति भविष्यतेऽर्थे क्वचिद्भूतेऽपि ॥ अस्य सज्ञा लृङ् ॥ अडागम । अभविष्यत् अभविष्यद् अभविष्यताम् अभ

विष्यन् । अभविष्य अभविष्याव अभविष्याम । अभविष्यः अभविष्यतम् अभविष्यत । अभविष्यम् अभविष्याव अभविष्याम । यदि सुवृष्टि सुराज्यं चाभविष्यत्तदा सुभिक्षमभविष्यत् ॥ ४१ ॥

(च०) सूत्रम्—'स्यत् क्रियातिक्रमे' ॥ अत्र क्रियातिक्रमे । क्रियां सूत्र क्रियाया अतिक्रमः समाप्तिः क्रियातिक्रमस्तस्मिन् क्रियातिक्रमे क्रियायाः करणात्पादनकाले यात्स्यर्थन्यूनतया कारणेन बाधितस्य कृत्स्नकारणासम्प्रतिपत्तौ अभिधेये सति धातोः दिवादिषु विभक्तिषु परेषु स्यदागमो भवति । पाणिनीयानां मते एषां लृङ् इति संज्ञा । भू दिप् इति स्थिते अनेन सूत्रेण स्यत् प्रत्ययः । सिंहनामाऽः अनेनागमः । गुण अन सूत्रेण गुणः । 'स्य भव' इति सूत्रेणाव् । 'हिस्वात्' इति तकारः । 'धातमाने' अनेन तस्य इकारो भवति । दिवादावट् इति सूत्रेणाडागमो भवति अभविष्यत् अभविष्यताम् । 'अन्' इति सूत्रेणाकारस्य लोपः कार्यः । प्रथमपुरुषस्य बहुवचने अभविष्यन् । अभविष्य अभविष्यतम् अभविष्यत । 'मम्' अभविष्यम् । अभविष्याव अभविष्याम । अपादाहरणम् । यदि सुवृष्टि सुराज्यं च अभविष्यत् तदा सुभिक्षं अभविष्यत् । इति दशसौ वरिष्ठो भूधातो रूपाणि ॥ ४१ ॥

(प्र०) स्यत् क्रियातिक्रम इति क्रियाया अतिक्रमोऽनिष्पत्तिरसिद्धिरिति यावत् । भूतार्थं भविष्यदर्थं चानुसृत्य परिनिष्पाद्यम् । यदि सुवृष्टिरिति । सुवृष्ट्याद्यभावेन तयोरनुकूला भूता भविष्यन्ती वा या क्रिया तदभावप्रयुक्ता सुभिक्षाद्यपादनधारणानुकूला या क्रियाया असिद्धिः । क्रियातिक्रमे किं सुवृष्टिरभूत्, सुवृष्टिर्भविष्यति । सुभिक्षमभूत् सुभिक्षं भविष्यति । दिवादिषु किं कृष्णं नमेदेवं हरं यायात् । कर्त्रादिष्वात्मनेपदेऽवश्यम् । कालस्तु धात्वर्थस्योपादानस्य कार्य । स्यवन्तु विकरणत्वाद्नव्यवधायक ॥ ४१ ॥

अभविष्यत अभविष्येताम् अभविष्यन्त । अभविष्यथा अभविष्येथाम् अभविष्यध्वम् । अभविष्ये अभविष्यावहि अभविष्यामहि । यद्यभविष्यत द्रव्यं भवांस्तदा रम्यमभविष्यत् ॥

(च०) अथात्मनेपदिनो भूधातो रूपाणि कथ्यन्ते तेषामनेनैव सूत्रेण सिद्धिः । अभविष्यत अभविष्येताम् अभविष्यन्त । अभविष्यथा अभविष्येथाम् अभविष्यध्वम् । अभविष्ये अभविष्यावहि अभविष्यामहि । यद्यभविष्यत द्रव्यं भवांस्तदा रम्यमभविष्यत् । समाप्तिं गतो नवमोऽयं लृङ्लकारः । अन्यतराण्युदाहरणानि न दर्शितानि विस्तरभयात् ॥ ४२ ॥

भूते सिः ॥ धातोर्भूतमात्रे काले सि प्रत्ययो भवति दिवादिपर ॥ ४३ ॥ अस्य संज्ञा लुङ् ॥ इकार सेरिति विशेषणार्थं । अभू स इति स्थिते ॥ दादे पे ॥ परस्मैपदे परे अपित् दाधास्थेण्भूपिबतिभ्य परस्य सेर्लोपो भवति ॥ ४४ ॥

(च०) सूत्रम्—"भूते सिः" ॥ धातोर्भूतमात्रे तत्कालोत्पन्नमात्रे अतीत कालस्य सिप्रत्ययो भवति दिवादौ परे । इकार 'स' इति विशेषणाय । अस्य पाणिनीयानां मते लुङ् इति संज्ञा । भू दिप् इति स्थिते 'भूते सि' अनेन सूत्रेण सि प्रत्ययः । इकारः 'से' इति विशेषणाय इत्संज्ञकत्वाल्लुप्यते दिवादावट् अनेनाडागमः । 'धातमाने' अनेन

दकारस्य लकार । दूर्गोक्तसूत्रे अभू म व इति जातम् ॥ सूत्रम् 'न' प ॥ अपिन् न या क्या इण भू पा धाने इत्यतस्य परस्य भूतापत्य सलोपो भवति परस्मैपदविषय ॥ ४३-४४ ॥

(प्र०) भूत सिरिति । भूतसामान्य मिरित्याह—भूतमात्रे इति । तथा च सिवि सिद्धिर्भूतसामान्यार्थे । अद्यतनविशिष्टस्य तु भूतविशेषानद्यतनाऽपरोक्ष भूतानद्यतन दिवस नयादि ॥ ४४ ॥

शाच्छासाघ्राधेटो धेति वक्तव्यम् ॥४५॥ भुवः सिलोपो लुग्वाच्यः ॥ ४६ ॥ लुकि न तन्निमित्तम् । तेन गुणवृद्धयो न । अभूत् अभूताम् ॥ भुवः सिलोपे स्वरे वुग्वक्तव्य ॥४७॥ अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम । अभूद्वृष्टि ॥

(व) शाच्छासा० ॥ शाच्छासाघ्राधेट एभ्यो धातुभ्यः सिलोपो वा भवतीति वक्तव्यम् । भुव [इदं सूत्रमस्ति] भूधातोः सिलोपो लुग्वाच्य । लुकि न तन्निमित्तम् । तत गुणवृद्धयो न भवन्ति । अभूत् अभूताम् । बहुवचने अभू अन् इति स्थिते भुवः भूधातोः सिलोपे कृते सति स्वरे परे अनि अनि च वुगागमो भवति । ककारो गुणप्रतिषेधाय स्थाननियमार्थश्च । उकार उच्चारणार्थ । इति अनि वकारागम । 'स्वर इति० अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम । इति परस्मैपदिना भूधातो रूपाणि । अभूत् इत्यादिरित्युदाहरणम् । ४५-४६-४७॥

आत्मनेपदे सि इट् गुणावौ परत्व प्लुत्व मट् । अभविष्ट अभविषाताम् ॥

(व) अथात्मनेपदिना भूधातो रूपाणि कथ्यन्त । आत्मनेप० सिः इट गुणावौ पत्वम् प्लुत्वं अट् एत भवन्ति । अभविष्ट अभविषाताम् ॥ अभविष अन्त इति स्थिते ॥

आतोऽन्तोऽदनत ॥ आत आत्मनेपदस्यान्त इत्येतस्याद्भवति अकारादुत्तरस्य तु न ॥ अभविषत । अभविष्ठा अभविषाथाम् ॥४८॥ ध्वे च सेर्लोपः ॥ ध्वे परे सेर्लोपो भवति ॥ सस्य वा द इति केचित् । अभविढ्वम् । अभविषि अभविष्वहि अभविष्महि । देवदत्तो राज्यमभविष्ट ॥४९॥

(ब०) सूत्रम्—'आतोऽन्तोऽदनत' ॥ आत अन्त अत्, अत अकार न अत् अनत् तस्मात् अनत । आतो पञ्चम्य अतास्तु 'उआ' 'एदा' तृतीय स्वरा अत्र वतुर्थं सूत्रम् । आत्मनेपदसंबन्धिन. प्रथमपुरुषबहुवचनस्य अन्त इत्यस्यात्भवति । अन्त इत्यस्य अत इति भवति अन्तो इत्यस्य अनाम्' अन्त इत्यस्यातो भवतीति भाव । परं अकारादुत्तरस्य न भवति । अनेनान्त इत्यस्यात कृते 'स्वरहीनं' अभविषत । अभविष्ठा अभविषाथाम् ॥ अभविष् ध्वम् इति स्थिते । सूत्रम्—'ध्वे च सेर्लोप' ॥ ध्वे च अव्ययम् स लोप ॥ ध्वे परे सति सेर्लोपो भवति । अभविध्वम् ॥ [इति आत ‹ामिनोऽनुर्गाम् 'सटोढकाढ्ढा' इति ढत्वविकल्प अभविढ्वम् अभविध्वम्] वा सस्य

इकारो भवति इति केचित्। केचित्तु इकारस्य ... इकारो भवति। ... अभविष्यताम्। अभविष्यन्। इत्यादयो ... उदाहरणम् ॥ ४८-४९ ॥

माङि लुङ् ॥ ५० ॥ सर्वलकारापवादः ॥ मेट ॥ माङ्के प्रयुज्यमाने भाटे लोपो भवति ॥ ५१ ॥ मा इर्भवको भवान् भूत् स्मयोगे भूतार्थता वक्तव्या ॥ ५२ ॥

(च०) [सूत्रम्— । माङि० । माङि प्रयुज्यमाने लुङ्लकार एव स्यात्। ... भवति ॥ सूत्रम्—मा ॥ [इदं सूत्रमस्ति ।] न भ० । तिल्। ... प्रयुज्यमाने ... लकारस्य भावो भवति । अत्र सूत्रेणाऽऽ ... भवति । मा इर्भवको भवान् भूत् । इत्यादिप्रयोगसिद्धिः । सूत्रम्-... याग । ... सूत्रम् ॥ ५१ ॥

(प्र०) मा इति । ... याग । ... अव्ययमित्यर्थ याग । तत मा इत्यत्र भवान् भूत् इत्यादिप्रयोगः सिध्यति । कश्चित् माङ् याग ति ... न स्यात्, तत मा निषेधे प्रतिषेधार्थकमव्ययम् ... इत्या दिसिद्धमित्याह । ... मासिद्धावपि ... इति विमर्शः ॥ ५२ ॥

मास्मयोगे लङ् च ॥ मा स्म भवत् । मा स्म भूत् ॥ ५३ ॥

(च०) द्वितीयं सूत्रम्—"मास्मयोगे लङ् च ॥ स्पष्टम् । च पुनः मास्म इत्य तया द्वयोर्योग लङ् लकारो भवतीत्यर्थः । मा स्म भवत् इत्युदाहरणम् द्वितीयसूत्रस्य । मा स्म भूत् इत्युदाहरणं प्रथमसूत्रस्यास्ति इति । भू सत्तायाम् इत्यस्य भूङ् प्राप्तौ इत्य स्य च रूपाणि दर्शितानि । तत्र भूधातुः परस्मैपदी ज्ञातव्यः 'परतोऽन्यत्' इति सूत्रात्। भूङ्धातुरात्मनेपदी ज्ञातव्यः ङित्वात् । परस्मैपदिनः परस्मैपदानि भवन्ति आत्मनेपदिन आत्मनेपदानि भवन्तीति ज्ञातव्यम् । अत्र बहुस्थले सन्धिन कृत बालानां सुखेन बोध करत्वात् । समाप्तार्थं दानमा एकारो लुङ् । इति द्वयोधात्वा रूपाणि ॥ ५३ ॥

चिती सञ्ज्ञाने । इकार इदित्कार्यार्थं । पूर्ववाचिवादय । अप् कर्तरि ॥ उपधाया लघोः ॥ धातोरुपधाया लघोर्नामिनो गुणो भवति ॥५४॥ चेतति चेततः चेतन्ति १ ॥ चेतेत् चेतेताम् चेतेयुः २ ॥ चेततु चेततात् चेतताम् चेतन्तु ३ ॥ अचेतत् अचेतताम् अचेतन् ४ ॥ द्वित्वम् । चिचेत । कित्वाद्गु णाभाव । चिचितत चिचितु । चिचेतिथ चिचितथु चिचित । चिचेत चि चितिव चिचितिम ॥ कित्वाद्गुणाभाव ।।चित्यात् चित्यास्तां चित्यासु ६ ॥ चेतिता चेतितारौ चेतितार ७ ॥ चेतिष्यति चेतिष्यतः चेतिष्यन्ति ८ ॥ अचेतिष्यत्

अचेतिष्यताम् अचेतिष्यन् ९ ॥ चित् सित् इति स्थिते । 'सिसता इतीट् ॥

(च०) अथ भ्वादयः प्रारभ्यन्ते । तत्रादौ परस्मैपदप्रक्रिया निरूप्यते । चिती संज्ञाने । ईकार ईदित्कार्यार्थः । पूर्ववत् तिबादयो भवन्ति । शप् कर्तरि शबनात् । चित् शप् तिप् इति जाते ॥ सूत्रम्—'उपधायाः लघोः' ॥ उपधाया लघोः । द्वितीयं सूत्रम् । धातोरुपधाभूतस्य लघोरिकः क्ङिद्भिन्ने प्रत्यये परे गुणो भवति । पकारः पित्कार्यार्थं स्व०' लट्—चेतति चेततः चेतन्ति । चेतसि चेतथः चेतथ । चेतामि चेतावः चेतामः ॥ लिङ्—चेतेत् चेतेताम् चेतेयुः । चेतेः चेतेतम् चेतेत । चेतेयम् चेतेव चेतेम ॥ लोट्—चेततु चेततात् चेतताम् चेतन्तु । चेत चेततात् चेततम् चेतत । चेतानि चेताव चेताम ॥ लङ्—अचेतत् अचेतताम् अचेतन् । अचेतः अचेततम् अचेतत । अचेतम् अचेताव अचेताम ॥ लिट्—'द्विः' सस्वरादिरिडादिः चि चित् णप् इति स्थिते अकारलकाराविति पुगन्तस्वरादिः चिचेत । किंत्वाद्गुणाभावः । चिचिततुः चिचितुः । चिचेतिथ चिचितथुः चिचित । चिचेत चिचितिव चिचितिम । लिङ्—चित्यात् चित्यास्ताम् चित्यासुः । चित्याः चित्यास्तम् चित्यास्त । चित्यासम् चित्यास्व चित्यास्म ॥ लुट्—चेतिता चेतितारौ चेतितारः । चेतितासि चेतितास्थः चेतितास्थ । चेतितास्मि चेतितास्वः चेतितास्मः ॥ लृट्—चेतिष्यति चेतिष्यतः चेतिष्यन्ति । चेतिष्यसि चेतिष्यथः चेतिष्यथ । चेतिष्यामि चेतिष्यावः चेतिष्यामः ॥ लृङ्—अचेतिष्यत् अचेतिष्यताम् अचेतिष्यन् । अचेतिष्यः अचेतिष्यतम् अचेतिष्यत । अचेतिष्यम् अचेतिष्याव अचेतिष्याम । लुङ्—चित् सि दिप् इति स्थिते सिसता अनेन इट् । चित् सि दिप् इति जाते ॥ १४ ॥

(प्र०) चिती संज्ञाने । सम्यग् ज्ञाने चेतनमित्यर्थः ॥

सेः ॥ सिजन्तात्परयोर्दिस्योरीडागमो भवति ॥ ५५ ॥ इट ईटि ॥ इट उत्तरस्य सेर्लोपो भवति इटि परे ॥ अचेतीत् अचेतिष्टाम् ॥ ५६ ॥

(च०) सूत्रम्—'सेः' सिजन्तात्परयोर्दिस्योरीडागमो भवति । अनेन तदा चित् इट् सि ईट् दिप् इति जाते । अथ सूत्रं 'इट ईटि' ॥ इट ईटि । इट उत्तरस्य सेरीटि लोपो भवति । इति सिचः स्थानिवद्भावनिषेधः । अनेन सूत्रेण सिलोपः कार्यः । तदा चित् इट् ईट् त् इति जाते इकारः इत्संज्ञार्थः दि सि मि पकारः पित्कार्यार्थः । तत्र चित् इ ई त् इति स्थिते गुणः अचः स्वरादौ 'निषेधाभावः' 'आगमाभावे' एभिः पूर्वोक्तैः सूत्रैः अचेतीत् इति रूपं सिद्धं भवति । अचेतीत् अचेतिष्टाम् । अचेति सि अन् इति स्थिते ॥ ५५ ५६ ॥

स्यादिदः ॥ सेराकारादिदिदोरस्य उस् भवति ॥ अचेतिषुः । अचेतीः अचेतिष्टम् अचेतिष्ट । अचेतिषम् अचेतिष्व अचेतिष्म ॥ ५७ ॥

(च०) सूत्रम्—'स्यादिदः' ॥ एकवर्णं सूत्रम् । के पूर्वोक्तमाकारान्तादाकारात्परस्य झिः इत्यादेः स्थाने उस् भवति । अनेन उस् आदेशः ।

'स्वरहीनं०' 'सार्वि०' अचेतिषु । अचेतीः अचेतिष्टम् अचेतिष्ट । अचेतिषम् अचेतिष्व अचेतिष्म । समासोऽयं धातुः ॥ ५७ ॥

(प्र०) स्यादिट् इति । अत्र वाक्यत्रयम् । सेरित्याद्यम् । तत्र प्रत्ययाप्रत्ययन्या न प्रत्यय एव गृह्यते, विकरणव्यवधानेन धातो परस्यानोऽसम्भवात् । तत्रान्यस्तारित्यनुवृ विद्यमानात् सेरिति व्याख्येयम् । तनाभूवन्नित्यत्र प्रत्ययलक्षणेन से परस्याप्यनोऽविद्यमा त्वान्नो सादश । आ इति द्वितीयं वाक्यम् । अत्र सिग्रहणं नानुवर्त्तते । यद्यनुवर्त्तेत त प्रत्ययलक्षणेन आदन्तादेव सतः उस् स्यात्, नान्यस्मात् । तथा च अनद्यतने न स्यात् तन विकल्प फलित । आयुः आयान् । विद इति तृतीयम् । अत्राप्यद्यतने विन्यन भूतमात्रे तु सिरित्यननैव सिद्धम् । केचित्तु—अत्र सिविद इति सूत्रणीयम्, तत आत इ सूत्रणीयम्, ततो णव्नाविति, इत्थं चाकारग्रहणं न कर्तव्यमिति लाघवम् । एव कृता कृतमिति चिन्त्यमित्याहु । तन्न समीचीनम्, एकमात्रालाघवाय योगविभागस्यानिष्टप्र पत्त्या उपेक्षणीयत्वात् ॥ ५७ ॥

च्युतिर् आसेचने । इर् अनुबन्ध 'इरितो वे'ति विशेषणार्थं । उच्चारित प्रध्वंसो ह्यनुबन्ध । च्योतति । च्योतेत् च्योततु । अच्योतत् । च्युत् णप् द्वित्वम् ॥

(च०) च्युतिर् आसेचने ॥ इर् अनुबन्धोऽस्ति 'इरितो वा' इति सूत्रस्य विशेष णार्थं । उच्चारितप्रध्वंसो ह्यनुबन्धा भवति । पूर्ववत्तिवादय 'उपधाया लघो' अने गुण । लट्—च्योतति च्योतत च्योतन्ति । लिङ्—च्योतेत् च्योतेताम् च्योतेयु । लोट । च्योततु च्योततात् च्योतताम् च्योतन्तु । लङ्—अच्योतत् अच्योतताम् अच्यो तन् । सुगमत्वादेतेषा विवरणं न कृतम् । लिट्—च्युत् णप् इति स्थिते । 'द्विश्च' च्युत् च्युत् णप् इति जाते ॥

पूर्वस्य हसादिः शेषः ॥ पूर्वस्यादिर्हस् शिष्यते अन्यो लुप्यते । चुच्योत चुच्युततु चुच्युतु । चुच्योतिथ चुच्युतथु चुच्युत । चुच्योत चुच्युतिव चुच्युतिम । च्युत्यात् । च्योतिता । च्योतिष्यति । अच्योतिष्यत् । अच्योतीत् अच्योतिष्टाम् अच्योतिषु । अच्योतीः अच्योतिष्टम् अच्योतिष्ट । अच्योतिषम् अच्योतिष्व अच्योतिष्म ॥ ५८ ॥

(च०) सूत्रम्—'पूर्वस्य हसादिः शेषः' ॥ पूर्वस्य हसयोर्हसानां वा संयुक्ता नामादि हसादि एव । अथवा हस इति पृथक्पदं सांकेतिकं प्रथमैकवचनम् । द्विर्वचने कृते सति पूर्वरूपस्य संयोगे सति आदिमो हस् शिष्यतेऽन्यो द्वितीयो लुप्यते । अनेन यकारतकारयोर्लोप कार्यः । तदा चुच्युत् णप् इति जाते । गुणः । 'उपधाया लघोः' 'स्वर हीनं०' मकारतकारावियोगी । चुच्योत चुच्युततु चुच्युतु । चुच्योतिथ चुच्युतथु चुच्युत । चुच्योत चुच्युतिव चुच्युतिम । लिङ्—च्युत्यात् च्युत्यास्ताम् च्युत्यासु । लुट्—च्यो

तिता श्च्योतितारौ श्च्योतितारः । लृट्-श्च्योतिष्यति श्च्योतिष्यतः श्च्योतिष्यन्ति । लृङ्—अश्च्योतिष्यत् अश्च्योतिष्यताम् अश्च्योतिष्यन् । लुङ्-अश्च्योतीत् अश्च्योतिष्टाम् अश्च्योतिषुः ॥ ५८ ॥

(प्र०) पूर्वस्येति । हसेति लुप्तविभक्तिकं पृथक् पदं । शिष्यत इति शेषः । कर्मणि घञ् । यद्यप्यादेरसत्त्वार्थं स्वत एव सिद्धं तथापि शेष इत्यस्य नियमार्थत्वेन तच्छेषनिमित्तत्वादिक्षेपाऽनेन विशेषणे । पूर्वरूपापेक्षोऽयमादिशब्दः । पूर्वस्यादिहसः शिष्यते अन्या हसो लुप्यन्ते । लुप्येत । ननु हसानामादिरिति षष्ठीतत्पुरुषो हसश्चासावादिश्चेति कर्मधारयो वा पुंसो न स्यात् इति चेन्न, आद्ये मानभेदस्यादौ स्वरादिष्वपि प्रसङ्गात् हसादित्वस्य हसान्तरापेक्षत्वात् । द्वितीये नाकोत्पन्नविशेषणत्वनादिशब्दस्य पूर्वनिपातप्रसङ्गात् । तथाचं पदमञ्जर्याम्—"कर्मधारयपक्षे स्यादादिशब्दस्य पूर्वता । षष्ठीसमासे हसानभेदस्यादौ घत प्रयुज्यत इति । न चात्तुरित्यादावादिहसशेषासम्भवनादेस्तकारादर्लोपो न स्यादिति वाच्यमीयं आदिरक्षाङ्गीकारेण पूर्वरूपमानादावादेः षष्ठी विवक्षितो न प्रतिऽवकाशात् सिद्धत्वात् । आदिश्चासौ हसश्चेति विग्रहमस्याप्यनेन परनिपातो ज्ञाप्यते इति सदानन्दः ॥ ५८ ॥

इरितो वा ॥ इरितो धातोर्वा ङ प्रत्ययो भवति दिवादिपर परस्मैपदे ॥ सेरपवादः । ङकारो गुणप्रतिषेधार्थः । अच्युतत् अच्युतताम् अच्युतन् । अच्युतः अच्युततम् अच्युतत । अच्युतम् अच्युताव अच्युताम ॥ ५९ ॥

(च०) अस्य धातोर्लुङ्लकारे सेरपवादः ङप्रत्ययो विकल्पेन भवति तद्विधायकं सूत्रम्-'इरितो वा' ॥ इर् इत् यस्य स इरित् तस्मात् इरितः । द्विपदं सूत्रम् । च्युतिर् रुधिर् भिदिर् छिदिर् दृशिर् दृषिर् स्कन्दिर् इत्यादेरिरनुबन्धाद्धातोर्लुङि दिवादौ परे वा ङप्रत्ययो भवति । ङकारो गुणप्रतिषेधार्थः । ङप्रत्ययाऽयं परस्मैपदे भवेन्नतु उक्तं स्यात् । यस्मिन्पक्षे ङप्रत्ययस्तस्मिन्पक्षे सेरभावः । अतएव ङप्रत्ययः । दिवादयः स्य ह्यान० अच्युतत् अच्युतताम् अच्युतन् । अच्युतः अच्युततम् अच्युतत । अच्युतम् अच्युताव अच्युताम । समानार्थे धातु ॥ ५९ ॥

(प्र०) सेरपवाद इति । भूतमात्रार्थे दिवादौ वे इत्यपि वाच्यम् । तेन अरुचेर् भूतार्थेऽप्यपि न रमणेऽत्र दिवादित्वाभावात् । न चात्र भूतार्थनाभावात्साक्षादिति वाच्यम्, असमानसमीप इत्यनेन भूतेऽपि दिवादिविधानात्, अरुचेरत्र विवक्षितत्वाभावात् ॥

श्च्युतिर् क्षरणे । श्च्योतति । श्च्योतेत् । श्च्योततु । अश्च्योतत् । द्वित्वम् ॥

(च) 'श्च्युतिर् क्षरणे' ॥ पूर्ववत्तिवादयो भवन्ति । लट्—श्च्योतति श्च्योततः श्च्योतन्ति । लिङ्—श्च्योतेत् श्च्योतेताम् श्च्योतेयुः । लोट्-श्च्योततु श्च्योतताद् श्च्योतताम् श्च्योतन्तु । लङ्—अश्च्योतत् अश्च्योतताम् । अश्च्योतन् । लिट् द्वित्व—श्च्युत् श्च्युत् अत् इति स्थित ॥

-'स्वरहीनं०' 'सोऽविं०' अचेतिषु । अचेती अचेतिष्टम् अचेतिष्ट । अचेतिषम् अचेतिष्व अचेतिष्म । समासोऽयं धातु ॥ ५७ ॥

(प्र०) स्यादिद् इति । अत्र वाक्यत्रयम् । सेरित्याद्यम् । तत्र प्रत्ययाप्रत्ययन्याये न प्रत्यय एव गृह्यते, विकरणव्यवधानेन धातोः परस्यानोऽसम्भवात् । तत्राप्यन्तरित्यनुवर्त्य विद्यमानात् सेरिति व्याख्येयम् । तेनाभूवन्नित्यत्र प्रत्ययलक्षणेन से परस्याप्यनोऽविद्यमानत्वान्नो सादेश । आ इति द्वितीयं वाक्यम् । अत्र मिग्रहणं नानुवर्त्तते । यद्यनुवर्त्तेत तर्हि प्रत्ययलक्षणेन आद् तादव सेरन उस् स्यात्, नान्यस्मात् । तथा च अनद्यतने न स्यात् । तेन विकल्प फलित । आयु आयान् । विद् इति तृतीयम् । अत्राप्यद्यतने विकल्प । भूतमात्रे तु सिरित्यनेनैव सिद्धम् । केचित्तु—अत्र सिविद् इति सूत्रणीयम्, तत आत इति सूत्रणीयम्, ततो जक्षादिविति, इत्थं चाकारग्रहण न कर्तव्यमिति लाघवम् । एव कृत्वा न कृतमिति चिन्त्यमित्याहु । तत्र समाधानम्, एकमात्रालाघवाय योगविभागस्यातिभ्रमात्वेन उपेक्षणीयत्वात् ॥ ५७ ॥

च्युतिर् आसेचने । इर् अनुबन्ध 'इरितो वे'ति विशेषणार्थं । उच्चारितप्रध्वसो ह्यनुबन्ध । च्योतति । च्योतेत् च्योततु । अच्योतत् । च्युत् णप् द्वित्वम् ॥

(च०) च्युतिर आसेचने ॥ इर् अनुबन्धोऽस्ति 'इरितो वा' इति सूत्रस्य विशेषणार्थं । उच्चारितप्रध्वस्तो ह्यनुबन्धो भवति । पूर्ववत्तिबादय 'उपधाया लघो' अनेन गुण । लट्—च्योतति च्योतत च्योतन्ति । लिङ्—च्योतेत् च्योतताम् च्योतेयु । लोट । च्योततु च्योततात् च्योतताम् च्योतन्तु । लङ—अच्योतत् अच्योतताम् अच्योतन् । सुगमत्वादेतेषां विवरणं न कृतम् । लिट—च्युत् णप् इति स्थिते । 'द्विश्च' च्युत् च्युत् णप् इति जाते ॥

पूर्वस्य हसादिः शेष ॥ पूर्वस्यादिर्हस् शिष्यते अन्यो लुप्यते । चुच्योत चुच्युततु चुच्युतु । चुच्योतिथ चुच्युतथु चुच्युत । चुच्योत चुच्युतिव चुच्युतिम । च्युत्यात् । च्योतिता । च्योतिष्यति । अच्योतिष्यत् । अच्योतीत् अच्योतिष्टाम् अच्योतिषु । अच्योती अच्योतिष्टम् अच्योतिष्ट । अच्योतिषम् अच्योतिष्व अच्योतिष्म ॥ ५८ ॥

(च०) सूत्रम्—'पूर्वस्य हसादिः शेष' ॥ पूर्वस्य हसयोर्हसानां वा संयुक्तानामादि हसादिः शेष । अथवा हस इति पृथक्पदं सौत्रोऽयं प्रथमैकवचनम् । द्विर्वचने कृते सति पूर्वस्यास्य संयोगे सति आदिमो हस शिष्यतेऽन्यो द्वितीयो लुप्यते । अनेन यकारतकारयोर्लोप कार्यं । तदा चुच्युत् णप् इति जाते । गुण । 'उपधाया लघो' 'स्वरहीनं०' चकारस्वकारावितौ । चुच्योत चुच्युततु चुच्युतुः । चुच्योतिथ चुच्युतथु चुच्युत । चुच्योत चुच्युतिव चुच्युतिम । लिङ—च्युत्यात् च्युत्यास्ताम् च्युत्यासु । लुट्-च्यो

तिता श्च्योतितासे श्च्योतितास । [illegible]
अश्च्योतिष्यन् अश्च्योतिष्यताम् [illegible]

अश्च्योतिषुः ॥ ६८ ॥

(प्र०) पूर्वस्येति । [illegible]
कर्मणि घञ् । [illegible]
[illegible] विशेषणं । [illegible]
अन्यो ह्रस्वो लुप्यते । [illegible] । ननु [illegible]
[illegible] इति चेन्न, [illegible]
[illegible] । [illegible]
[illegible] इति । [illegible]
[illegible] इति [illegible]
स्यात् । [illegible] इति [illegible]

हृरितो वा ॥ हृरितो धातोर्वा ङः [illegible] भवति [illegible]
परे ॥ सेटपवादः । ङकारो गुणप्रतिषेधार्थः । अच्युतत् अच्युतताम् अच्युतन् ।
अच्युत: अच्युततम् अच्युतत । अच्युतम् अच्युताव अच्युताम ॥ ६९ ॥

(च०) [illegible] भवति [illegible]
सूत्रम्—'हृरितो वा' ॥ [illegible] इति । [illegible]
[illegible] इत्यादिरितुबन्धा धातवः [illegible]
वा [illegible] भवति । ङकारो गुणप्रतिषेधार्थः । [illegible]
स्यात् । [illegible] । [illegible] । [illegible]
[illegible] अच्युतत् अच्युतताम् अच्युतन् । अच्युतः अच्युततम् अच्युतत । [illegible]
अच्युताव अच्युताम । [illegible] ॥ ६९ ॥

(प्र०) [illegible] इति । [illegible] इति [illegible] । [illegible]
[illegible] । [illegible]
[illegible]
[illegible] ॥

श्च्युतिर् क्षरणे । [illegible] । श्च्योतेत् । श्च्योततु । अश्च्योतत् ।
[illegible] ॥

(च०) 'श्च्युतिर् [illegible]' [illegible] भवति । लट्—श्च्योतति [illegible]
[illegible] । लिङ्—[illegible] श्च्योतेताम् [illegible] । लोट्—श्च्योततु श्च्योतताम्
[illegible] । लङ्—अश्च्योतत् अश्च्योतताम् । [illegible] । लिट्
[illegible] इति स्थितं ॥

(च०) तत्रेदं सूत्रम्—'प्रादेश्च तथा तौ सुनमाम्' ॥ प्र आदिर्यस्य स प्रादि स्तस्य प्रा° च तथा, तौ सुनमाम् पञ्चदं सूत्रम् । प्रादयस्सर्गास्तेषां षुञ् अभिषव पाऽक्तकर्मणि ष्टुञ स्तुतौ, ष्टुभ स्तम्भे षिञ् बन्धने षञ्ज सङ्गे ष्वञ्ज परिष्वङ्गे इत्या दीनां नमादीनां च अम् प्रह्वीभाव, णीञ् प्रापणे टुनदि समृद्धौ, णिदि कुत्सायाम्, इत्या दीनां धन्त्यौ यौ सकारणकारौ तयोः क्रमेण तौ पूर्वभाविनौ एव पूर्वावस्थायां वर्तमानौ षकारणकारावेव भवत । तथा तेष्वपरस्यादि । तथेति सूत्रार्थं पदं तस्यार्थे तेष्वेव निमि त्तेष्विति । अत्रायं भाव —सकारस्य षकारनिमित्तानि कवर्गादिलक्षणानि । नकारस्य णत्व निमित्तानि षकाररेफऋवर्णाः । अट्प्रत्याहारकवर्गपवर्गव्यवधानानि च । ततो यद्युपसर्गान्त कवर्गस्येत्प्रत्याहारस्य च योगो भवति तदा तत्परस्य सकारस्य षकारो भवति । यत्र चोपसर्गे षकाररेफवर्णानामन्यतमो भवति नकारस्य वा प्रत्याहारकवर्गपवर्गान्तरं च भवति तत्र नकारस्य णकारो भवति । अत्रोपसर्गे इण्प्रत्याहारोऽस्ति तेन षेधते सकारस्य षकारो भवति । निषेधति । लिङ् सधत । लोट्-सधतु । लङ् । अड्व्यवधानेपि षत्वं भवति स्थेयात् इति प्रमाणान्नात् । यत्र निपूर्वस्तत्र न्यषधत् । तद्भावे असधत् । लिट्— द्वित्वव्यवधानेपि षत्वम् । नास्ति व्याख्यानेन प्रयोजनम् तद्भावेपि प्रयोगसिद्धेः । लिङिच निवृत्ते सति । तद्भावे सिषेध । लिङ्-सिध्यात् । लुट्-सेधिता । लृट्-सेधि ष्यति । लृङ्-असेधिष्यत् । लुङ्-असेधीत् । समाप्तोऽयं धातुः ॥ ६९ ॥

(प्र०) प्रादेश्च तथा तौ सुनमाम् । यद्यपि क्विबादिर्यैवान्तरस्येति न्यायेना वृत्तिस्तथापि षकारेण पूर्वोक्त इत्यनुवर्तते । तदेवानुवृत्तौ किं षकारेण । तथा तावित्य स्य तत्र प्रकारेण तौ स्त । तस्यैव निमित्ते सत्य इति । षत्वनिमित्तं किम् । णत्वनि मित्तं षकाररेफऋवर्णाः । तत्र स्यादय । सप्रत्ययस्वप्रत्ययान्तेषु । षुञ अभिषव । ष्टुञ स्तुतौ । पाऽक्तकर्मणि । पूभरणे इगतिनिवृत्तौ व्यस्तमोनानाङ्क । षञ्ज सङ्गे । ष्वञ्ज परिष्वङ्गे । षिधुगत्याम् । अतिप्रतिपूर्वे षद्लृ विशरणगत्या । अपदन्त षिच क्षरणे । अवपूर्वे इकर्मनिरोधे । अवपूर्वका भोजनार्थे । स्वनशब्दे । परिनिविपूर्वक । षेवृ से वने । तद्ग्रन्थय । अङ्वर्जित षितु तन्तु सन्ताने ॥ ६९ ॥

षिधू शास्त्रे माङ्गल्ये च । ऊकार इड्विकल्पार्थः । सेधति । सेधेत् । सेधतु । असेधत् । सिषेध । सिध्यात् ॥ ऊदितो वा ॥ ऊदितो धातो परस्य वसादेरिड्वा भवति ॥ ७० ॥ स्वरतिसूतिसूयतिधूञूदितादीनां मिङ्वा वक्तव्यः ॥ ७१ ॥ स्वृ शब्दे । षूङ् प्राणिगर्भविमोचने । षूङ् प्रसवे । धूञ् कम्पने । रध् हिंसायाम् । नश् अदर्शने । तृप् प्रीणने । दृप् हर्षविमोचनयो । द्रुह जिघांसायाम् । मुह वैचित्ये । ष्णुह उद्गिरणे । ष्णिह प्रीतौ । एते रधादय । सेधिता ।

(च०) षिधू शास्त्रे माङ्गल्ये च । ऊकार इड्विकल्पार्थः । 'आ' ष्य इन । पूर्व वत्सिद्धाद्य । सधति । सधेत् । सधतु । असधत् । लिट्-सिषेध । सिध्यात् । लुट्-सिध

(च०) ।षधु गत्याम् । उकार उच्चारणार्थः ॥ सूत्रम्—'आदेः ष्णः स्न' ॥ आदेः ष्णः स्न । त्रिपदं । ष उपदेशे यस्य स षोपदेशः । ण उपदेशे यस्य स णोपदेशः । षोपदेशस्य णोपदेशस्य च धातोरादौ वर्तमानयोः षकारणकारयोः सकारनकारौ भवतः यथासंख्यम् । षोपदेशस्य णोपदेशस्य च धातोर्लक्षणं(१) प्रक्रियोक्तमेव ज्ञेयम् । अस्यां विस्तरभयान्न लिखितम् ॥ तथाच षस्य सत्वनिषेधकं सूत्रं (१) 'नामधातु०' नामधातुष्ठीव्वष्वष्किरीणां षकारस्य सकारो न भवतीति भाष्यम् । गुणः । छप् । सेधति ॥ यदा निरुपसर्गो धातुः स्यात् तदा काऽर्थ्यः स्यात् कामम् ॥ ६७–६८ ॥

(प्र०) आदेः ष्णः स्न इति । षोपदेशानाह—सेकृ सृप् सृ स्तृ सृज् स्तृ स्त्यास्तौ दन्त्याऽजन्तमाद्यः । एकाच्च षोपदेशाः ष्वष्क् स्विदिस्वदिस्वञ्जिस्वपिस्मिङ ॥ सेकृ गतौ । सृप्लृ गतौ । सृ गतौ । स्तृञ् आच्छादने । सृज विसर्गे । स्तृ छादने । स्त्यै ष्ट्यै शब्दसंघातयोः । एभ्योऽन्ये दन्त्याजन्तमाद्यः एकाचः षोपदेशाः । दन्ते भवो दन्त्यः दन्त्यश्च अच् दन्त्याचौ तौ अन्तौ यस्य स दन्त्याजन्तः स चासौ सश्च दन्त्याजन्तसः स आदिर्येषां ते दन्त्याजन्तमाद्यः । दन्त्यग्रहणादन्त्य न तु दन्तोष्ठ्योऽपि ष्वष्कादीनां पृथग्ग्रहणात् । ष्वष्क गतौ । ञिष्विदा गात्रप्रक्षरणे । स्वद आस्वादने । स्वञ्ज परिष्वङ्गे । ञिष्वप् शये । स्मिङ् ईषद्धसने । इति । णोपदेशानाह—अनर्द् नाटि नाथ नाध् नन्द् नक्क नॄ नृत । नर्द शब्दे । नट नर्तने । नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु । टुनदि समृद्धौ । नक्क नाशने । नॄ नये । नृती गात्रविक्षेपे । एभ्योऽन्ये णोपदेशाः ॥ नकारमात्रतुल्यत्वरूपश्चासौ इति धातुः । सकारः णकारश्च धातुवर्णस्तवर्गेण । इति ॥ ६७ ॥

प्रादेश्च तथा तौ स्तुनमाम् ॥ प्रादेरुपसर्गात्परेषां स्वादीनां नमादीनां च धातूनां सकारनकारयोस्तौ पूर्वभाविनावेव षकारणकारौ भवतः तथा त्वेषेव निमित्ते सत्तु ॥ निषेधति । सेधेत् । सेधतु । अडव्यवधानेऽपि षत्वम् । न्यषेधत् । द्वित्वव्यवधानेऽपि षत्वम् । निषिषेध । सिषिधतुः । सिषिधुः । सिषेधिथ । सिध्यात् । सेधिता । सेधिष्यति । असेधिष्यत् । असेधीत् असेधिष्टाम् असेधिषुः ॥ ६९ ॥

---

१) (प्र०) [illegible] दन्त्याजन्तमाद्यः । एकाच षोपदेशाः [illegible] ॥ [illegible] गतौ । [illegible] गतौ । सृ गतौ । [illegible] आच्छादने । सृज् विसर्गे । स्तृ छादने । [illegible] । [illegible] दन्त्याजन्तमाद्यः [illegible] । [illegible] स आदिर्येषां ते [illegible] । [illegible] गतौ । ञिष्विदा [illegible] । [illegible] परिष्वङ्गे । [illegible] शये । [illegible] । [illegible] ॥ [illegible] गतौ । [illegible] । [illegible] । टुनदि समृद्धौ । [illegible] । [illegible] ॥ [illegible] इति [illegible] । [illegible] ॥

(च०) तदर्थं सूत्रम्—'प्रादेश्च तथा तौ ष्टुनमाम्' ॥ प्र आदिर्यस्य स प्रादि तस्य प्रा' च तथा, तौ ष्टुनमाम् पञ्चप' सूत्रम् । प्रान्तरस्मर्गात्परेषां षुञ् अभिषव याऽन्तकर्मणि, ष्टुभ स्तुतौ, ष्टुम स्ताभ षिद् बन्धने षञ्ज सङ्गे ष्वञ्ज परिष्वङ्गे इत्या दानां समानीनां च षस् प्रादोभाव, षीम प्रापणे द्रुनरि समद्धौ, षिरि कुत्सायाम्, इत्या दानां धन्पूर्वं यौ सकारनकारौ तयोः क्रमेण तौ पूर्वभाविनौ एव पूर्वावस्थायां वर्तमानौ षकारणकारावेव भवत । तदा तस्वेवत्यादि । तथेति सूत्रार्थं पदं तस्यार्थं तेष्वेव निमि त्तेष्विति । अत्रायं भावः—सकारस्य षकारनिमित्तानि कवर्गेहुल्षणानि । नकारस्य णत्व निमित्तानि षकाररेफऋवर्णा । अटप्रत्याहारकवर्गपवर्गव्यवधानानि च । तत्रो यदुपसर्गान्त वर्णस्येटप्रत्याहारस्य च योगो भवति तदा तस्मात्परस्य सकारस्य षकारो भवति । यत्र चोपसर्गे षकाररेफवर्णानामन्यतमो भवति नकारस्य वा प्रत्याहारकवर्गपवर्गान्तरं च भवति तत्र नकारस्य णकारो भवति । अत्रोपसर्गे इण्प्रत्याहारोऽस्ति तेन सेधने सकारस्य षकारो भवति । निषधनि । निष सधन । न्येट्-सेधतु । छट । अड्व्यवधानेपि षत्वं भवति न्यषधत् इति प्रयोगान्तनात् । यत्र निपूर्वस्तत्र न्यषधत् । अभ्यासे असधत् । ङिट्— द्वित्वव्यवधानेपि षत्वम् । नास्ति व्याख्यानेन प्रयोजनम् तदभावपि प्रयोगसिद्धेः । निषिषेध निपूर्वे सति । अभ्यासे सिषेध । लिङ्—सिध्यात् । लुट्—सधिता । लृट्—सधि ष्यति । लृङ्—असधिष्यत् । लुङ्—असधात् । समाप्तोयं धातुः ॥ ६९ ॥

(प्र०) प्रादेश्च तथा तौ ष्टुनमाम् । यद्यपि किल्गादिस्त्वैवान्तरस्थति न्यायेन वृत्तिस्तथापि षकारेण 'षनोस' इत्यनुवर्त्तते । तत्रानुवृत्तौ किं षकारस्य । तथा तावित्य स्य तत्र प्रकारम तौ स्त । तेष्वेव निमित्ते सत्स्व इति । षत्वनिमित्तं किल्गम् । णत्वनि मित्तं षकाररेफऋवर्णा । तत्र स्वाग्य । सप्रत्ययस्यप्रत्यान्तेषु । षुञ अभिषव । ष्टुभ स्तुतौ । षाऽन्तकर्मणि । षूधेरणे हागतिनिवृत्तौ स्पस्तसेनाताक्ष । षञ्ज सगे । ष्वञ्ज रिष्वङ्गे । षिधुगत्याम् । अतिप्रतिपूर्वे षग्लविशरणगत्यो । अषद्रन्त षिच क्षरणे । अवपूर्वे हम्भनिताथे । व्यवपूर्वका भोजनार्थे । स्वनाद् । परनिविपूर्वक । षेवृ से वने । सन्प्रत्यय । अडवधित षितु तन्तुसन्तान ॥ ६९ ॥

षिधू शास्त्रे माङ्गल्ये च । ऊकार इड्विकल्पार्थः । सेधति । सेधेत् । सेधतु । असेधत् । सिषेध । सिध्यात् ॥ ऊदितो वा ॥ ऊदितो धातो परस्य वलादेरिड्वा भवति ॥ ७० ॥ स्वृसूतिसूयतिधूञूदितादीना मिड्वा वक्तव्य ॥ ७१ ॥ स्वृ शब्दे । षूङ् प्राणिगर्भविमोचने । षूङ् प्रसवे । धूञ् कम्पने । रध् हिंसायाम् । नश् अदर्शने । तृप् प्रीणने । दृप् हर्षविमोचनयो । द्रुह जिघांसायाम् । मुह वैचित्ये । ष्णुह उद्गिरणे । ष्णिह प्रीतौ । एते रधादय । सेधिता ।

(च) षिधू शास्त्रे माङ्गल्ये च । ऊकार इड्विकल्पार्थ । भाद ष्ण स्न । एव वक्तिवादय । सधति । सधेत् । सधतु । असधत् । लिट्-सिषध । सिध्यात् । लुट्-सेध

ता इति स्थिते ॥ सूत्रम्—'ऊदितो वा' ॥ ऊत् इत् यस्य स ऊदित् तस्माद् ऊदितो वा । ऊदितो धातोः परस्य वसादेः प्रत्ययस्य वा इडागमो भवति । द्वितीयं सूत्रम्-'स्मृसुवि०' ॥ स्मृसुविसूयतिधूञ्इत्यादीनां धातूनां वा इडागमो वक्तव्य । वसादेः प्रत्ययस्यैवेति नेष । धातवस्तु मूले वर्णिता । अनेन सूत्रेण वा इट् । सेधिता ॥७०-७१

पक्षे—'तथोर्धः' ॥ दधातिं विना झमान्ताद्धातोः परयोस्तकारथकारयोर्धकारादेशो भवति ॥ झबे जबा । सेद्धा । सेधिष्यति सेत्स्यति । असेधिष्यत्-असेत्स्यत् । असेधीत् असेधिष्टाम्, असेधिषुः ॥

(च०) सिध् ता इति स्थिते ॥ सूत्रम्-'तथोर्ध' ॥ तश्च थ् च तथौ तयोः त॰ । द्विपदं सूत्रम् । दधातिं वर्जयित्वा झमान्ताद्धातोः परयोस्तकारथकारयोर्धकारादेशो भवति । सुगममिदं सूत्रम् । अस्याधिकं व्याख्यानं नास्ति । अनेन तकारस्य धकारः । झबे जबा प्रथमधकारस्य दकारः स्वाहीनं॰ 'गुण । सद्धा सेद्धारौ सद्धार । सद्धासि सद्धास्थ सद्धास्य । सद्धास्मि सेद्धास्व सद्धास्म ॥ लृट्-सेधिष्यति सेत्स्यति । 'स्म॰' ॥ लृङ् । असेधिष्यत् असेत्स्यत् ॥ लुङ् । असेधीत् । असेधिष्टाम् असेधिषुः ॥

इडभावे ॥ अनिटो नामिवतः ॥ नामिवतोऽनिटो धातोः परस्मैपदे परे सिप्रत्यये वृद्धिर्भवति ॥७२॥ चपत्वम् । से ॥ असैत्सीत् ॥

(च०) इडभावे असिध् सि ई दिप् इति स्थिते ॥ सूत्रम्- अनिटो नामिवतः' । अनिट् नामिवत । नास्ति इट् यस्य स॰ अनिट् तस्यानिटः । नामी अस्यास्ति इति नामिवान् तस्य नामिवत । द्विपदं सूत्रम् । नामिवतो नाम्युपधस्य 'नैकस्वरादुत्रतत्' इति सूत्रगोचरात् अनिटो धातोः सम्बन्धिनो नामिनः परस्मैपदविषये सिप्रत्यये परे वृद्धिर्भवति । अनेन वृद्धि । परं पूर्ववत् । 'स्तम॰' असैत्साम् । असैध सि ताम् इति स्थिते ॥ ७२ ॥

(प्र०)अनिटो नामियत इति । प इत्यनुवर्तते । सिरित्यनुवर्तमाने सिरित्यागम सावित्ति व्याख्येयम् । अनामिवत इतिच्छेदः । इयमिच्छकपस्य धातोर्विशेषणम् । यदपि वा तुल्यासाम्यस्यानिट्त्वमत्र तस्यवृद्धिविधानाऽभावात्तथापि नद् , यस्माद्धातो परस्य वाविन्त यस्यति व्याख्यानं कर्तव्यम् । अथ नामी यानामिनौ तावस्याऽस्ताऽऽमिवान् तस्मा ऽनामिवत । कश्चिद्मान्तोऽपधाऽपि वस्तिनौ भवत इत्यनेन ज्ञापितम् । मन्यपीथा भवत नि च । भवतो नामिवतश्चानिटो धातो वृद्धि स्यात् प सौ परत । अवश्यं चानुस्वारा नुपपत्त्यम् । तत्याकारस्य पूर्वेण विहितत्वात् । अत एवानुस्वारमूलस्याकारस्याप्यभ्रू स्व नानिनश्च पूर्वेण न सिद्धत्वादारम्भणम् । अन्यत्र एकस्य वता मत्त्वात् अयमपरा-मपि इतअेपि व्याख्यानमिनिश्च इत्यत्र धूयमानस्य वता प्रत्येकमन्वयात् ॥ ७२ ॥

झसात् ॥ झसादुत्तरस्य सेर्लोपो भवति झसे परे ॥ ७३ ॥ प्रत्यय लोपे प्रत्ययलक्षणं कार्यं भवति ॥ ७४ ॥ असैद्धाम् असैत्सुः । असैत्सीः असैद्धम् असैद्ध । असैत्सम् असैत्स्व असैत्स्म ॥

(च०) सूत्रम्—'भसात्' ॥ एकपदं सूत्रम् । भसादुत्तरस्य सलोपो भवति भस परे । अनेन सेर्लोपः कार्यः । 'प्रत्ययलोपे प्रत्ययलक्षणं कार्यं भवती'ति न्यायात् वृद्धिर्भवति । 'तयोर्वे' भसे अदा । 'स्वरहीनं अमैदार्म् असैस्तु । असैस्तौ असैदम् असैद । असैस्तम् असैस्त्व असैस्म ॥ ७३-७४ ॥

खद् स्थैर्ये हिंसायां च । खदति खदेत् खदतु अखदत् ॥ अत उपधायाः ॥ धातोरुपधाया अकारस्य वृद्धिर्भवति ञिति णिति च परे ॥ ७५ ॥ चुरवम् । चखाद चखदतु चखदु । चखादिथ चखदथु चखद ॥ णदुत्तमो वा णिद्वक्तव्यः ॥ ७६ ॥ चखाद-चखद चखदिव चखदिम । खद्यात् । खदिता । खदिष्यति । अखादिष्यत् ॥ जिस्पे ॥ परस्मैपदे परे सिर्जिद्भवति ॥ ७७ ॥ 'अत उपधायाः' इति वृद्धिः । अखा दीत् अखादिष्टाम् अखादिषु ॥ हसादेर्लघ्वकारोपधस्य वा वृद्धिर्सेटि सौ वाच्या ॥ ७८ ॥ अखदीत ॥

(च०) खद् स्थैर्ये हिंसायां च । पूर्ववत्सिद्धादयः । खदति खदन् खदन्तु अखदत् । खद् खद् णप् इति स्थिते पूर्वस्य हसादिः शेषः । चखद् णविति जाते ॥ सूत्रम्— अत उपधायाः ॥ अत उपधायाः । धातोरुपधाया अकारस्य वृद्धिर्भवति ञिति णिति च परे । इत्यादि । चखाद चखदतुः चखदुः । चखदिथ चखदथु चखद । णदुत्तमो वा उत्तमो णे वा णिद्वक्तव्यः । तत्र वृद्धेर्विकल्पो भवति । चखाद-चखद चखदिव चखदिम । खद्यात् खदिता खदिष्यति अखदिष्यत् । अखदीत् इति स्थिते । सूत्रम्— जिस्पे ॥ न इदं यस्य स जित् प द्विपदं सूत्रम् । परस्मैपदे परे सिर्जिद्भवति । अनेन सर्जित्त्वात् अत उपधायाः इति वृद्धिः । अखादीत् अखादिष्टाम् अखादिषु ॥ वृद्धिविकल्पार्थं सूत्रम्-'हसा०' ॥ हस आदिर्यस्य स हसादिस्तस्य हसादेः । लघुश्चासौ अकारश्च लघ्वकारः उपधायां यस्य स लघ्वकारोपधस्तस्य लघ्वकारोपधस्य हसादेर्लघ्वकारोपधस्य च धातोर्वा वृद्धिः सेटि सौ वाच्या । अनेन वृद्धिविकल्पो भवति । अखदीत् अखदिष्टाम् अखदिषु । सुगमार्थं अत्र समासः ॥ ७५-७८ ॥

गद् व्यक्तायां वाचि । गदति ॥ उपसर्गस्थनिमित्तात्परो गदादौ णत्वं वाच्यम् ॥ ७९ ॥ 'गद् नद् पत् पद् घु मा स्यति हन् या वा द्रा प्सा वप् वह् चि शम् दिह्' एते गदादयः । गद् व्यक्तायां वाचि । नद् अव्यक्ते शब्दे । पत्लृ पतने । पद् गतौ । घु संज्ञकाः । माङ् माने । षोऽन्तकर्मणि । हन् हिंसागत्योः । या प्रापणे । वा गतिगन्धनयोः । द्रा कुत्सायां गतौ च । प्सा भक्षणे । डुवप् बीजतन्तुसन्ताने । वह प्रापणे । चिञ् चयने । शम् उपशमे ।

ङिह् उपचये । प्रणिगदति । गदेत् । गदतु । अगदत् । कुहोश्चु जगाद जगदतु जगदु । जगदिथ जगदथु जगद । गद्यात् । गदिता । गदिष्यति । अगदिष्यत् । अगादीत्-अगदीत् ॥

(७९) गद् व्यक्तायां वाचि । गदति । 'उपसर्गान्न्यनिमित्तात्०' इत्यादि [illegible] नकारस्य णत्वं [illegible] । गदादयस्तु सूत्रे उक्ताः सन्ति, त एव ग्राह्याः । अन [illegible] सूत्रेण नकारस्य णकारो भवति । प्रणिगदति । गदेत् । गदतु । अगदत् । 'कुहोश्चुः' । अनेन गकारस्य जकारः । 'अत उपधायाः' । जगाद जगदतुः जगदुः । गद्यात् गदि° गदिष्यति अगदिष्यत् अगादीत् 'हसादेः' । अगदीत् ॥ ७९ ॥

रद् विलेखने । रदति । रदेत् । रदतु । अरदत् । रराद ॥ लोपः पचां किस्येचास्य ॥ पचादीनामनादेशादीनां किति णवि सति पूर्वस्य लोपः । असंयुक्तमध्यस्थस्याकारस्यैकार ॥ ८० ॥ रेदतुः रेदुः ॥ सेटि थलि च ॥ ८१ ॥ रेदिथ रेदथु रेद । रराद-ररद रेदिव रेदिम । रद्यात् । रदिता । रदिष्यति । अरदिष्यत् । अरादीत् अरादिष्टाम् अरादिषुः । अरदीत् ॥

(८०) रद् विलेखने । रदति । रदेत् । रदतु । अरदत् । रराद । [illegible]

(८१) [illegible]

वमिथ सेरे । अन्य किम्, रिरिषतु ॥ रेरतु, रेरु । लोपाऽयं पूर्वान्त्यस्य न भवति नाकर्तकस्थात्स्वविधिरिति न्यायात् । अनर्थकम पूर्वरूपमवयवत्वात् । मवयवा हि अन र्थकाः ॥ ८१ ॥

णद् अव्यक्ते शब्दे । णादेः नः स्यात् । नदति । नदेत् । नदतु । अनदत् । मपूर्वे । णादेश इति । णत्वम् । प्रणदति । गदादित्वात् प्रणिन दति । ननाद नेदतु नेदुः । नेदिथ नेदथुः नेद । ननाद-ननद नेदिव नेदिम । नद्यात् । नदिता । नदिष्यति । अनदिष्यत् । अनादीत् अनादिष्टाम् अनादिषुः । अनदीत् अनदिष्टाम् ।

(प्र०) णद् अव्यक्ते शब्दे । पूर्ववत् तिबादयः । णादेः नः स्यात् नदति । अन्यानि रूपाणि सुगमत्वान्न लिखितानि । लिटि लकार ण्लादेशः एत्वा० अनेनैत्वपूर्वलोपौ कार्यौ । ननन्द ननन्दुः । अत्र प्रपूर्वोऽयं धातुस्तत्र 'उपसर्गा अनेन सूत्रेण नकारस्य णकारः । प्रण न्दति इति रूपं भवति प्रपूर्वत्वे सति । अत्र नियुः स्यात् तदा गदादित्वात् णत्वं भवति । प्रणिनन्दति इति रूपं सिद्धं भवति । नद्यात् नन्दिता नन्दिष्यति अनन्दिष्यत् अनादीत् । इत्यादि अनदीत् । सोऽयमादाय इत्युदाहरणम् ॥

अर्द गतौ याचने च । अर्दति । अर्देत् । अर्दतु आर्दत् । द्वित्वे कृते । अतआदेः । आ अर्द इति स्थिते ॥ नुगशाम् ॥ अश्नोतेर्ऋकारादेर्धा तूनां संयोगान्ताकारादिधातूनां च पूर्वस्य नुमागमो भवति णादौ सति ॥८२॥ आनर्द आनर्दतुः आनर्दुः । आनर्दिथ आनर्दथुः आनर्द । आनर्द आनर्दिव आनर्दिम । अर्द्यात् । अर्दिता । अर्दिष्यति । आर्दिष्यत् । आर्दीत् आर्दिष्टाम् आर्दिषुः ॥

(प्र०) अर्द गतौ याचने च । अर्दति अर्देत् अर्दतु आर्दत् । लङ्लकारस्य रूप स्व राणि अतत आदेर्मावेन सूत्रेण द्वितीयाऽऽगमो भवति । अर्द अर् इति स्थिते द्वित्वम् । द्वित्वे कृते सति अत्रादेर्नो इति सूत्रेण पूर्वस्याकारस्याकारो भवति तत्र आ अर्द अर् इति जाते ॥ सूत्रम्—'नुगशाम्' ॥ नुक् आगमः । अश्नोतेः व्याप्तौ अश् अर्थे ऋद् ऋकार इत्यादीनां धातूनां द्विर्भावे कृते सति णादौ परे पूर्वस्य द्वित्वस्य नुमागमो भवति । ककारः स्थानानुरूपार्थे कित्वात्तस्य । ककार उच्चारणार्थः । अनेन सूत्रेण द्वयामध्ये नुमागमो भवति । स्वरहानि आनर्द आनर्दतुः आनर्दुः । सर्वाणि रूपाणि मूल सन्ति । अर्द्यात् अर्दिता अर्दिष्यति स्वरान्ते आर्दिष्यत् आर्दीत् ॥ ८२ ॥

(प्र०) नुगशामिति । आशादिस्वनुवर्त्ते पूर्वस्येति च । अत्राऽनन्तरं परिभाषा ऽऽगमातेर्बहुत्वमापद्येत तदाऽस्य परिग्रहः । अनेनात् ऋकारान्तसंयोगान्ताकाराश्च पूर्वस्य नुमागमः स्यात् णादावित्यर्थः । पूर्वस्येति किम् परस्य माभूत् । णादौ किम्, अशिशिष- त । अर्दिधिषति । अंजिजिषति । विपरीतनिर्देशान्नुगिति विभज्य तत्र को वाक्यतो वक्तु

वृत्त्या क्वचिद्वा नुगागमः स्यादिति व्याख्येयम् । तनाऽऽनञ्छ आनञ्छेति, निवृत् । अथेद ममवधेयम्–आम्वादित्यत्र अकाराऽनुवृत्तिः स बाधेत सन्नन्तस्तोऽक्षम । तथ न पूर्वस्या स्वेकृते नुगिति व्याख्यानात् नुगात्वं न बाधेत ॥ ८२ ॥

इदि परमैश्वर्ये । इन्दति । इन्देत् । इन्दतु ॥ **स्वरादेः** ॥ स्वरादेर्धातोर्द्वितीयोऽडागमो भवति दिवादौ परे ॥ ८३ ॥ अ इ ए । ए ऐ ऐ । ऐन्दत् । इन्द् अप् इति स्थिते ॥ **कासादिप्रत्ययादाम्कृस्भूपरः** ॥ (१)कास् आस् दय् अय् नाम्यादिगुरुमदात्मनेकस्वरधातुभ्यः प्रत्ययान्ताच्च परादौ परे आम् प्रत्ययो भवति स च कृ अस् भूपरः प्रयोक्तव्यः ॥ ८४ ॥ कासृ दीप्तौ । आस् उपवेशने । दय दानगतिहिंसादानेषु । अय् गतौ । एते कासादयः ॥

(८०) इदि परमैश्वर्ये । पूर्ववत्सिद्धम् । 'इदितो नुम्' इत्यनेन नुम् । इन्दति इन्दत् इन्दतु एन्दत् इति जाते । 'स्वरादेः' स्वर आदिर्यस्य स स्वरादिस्तस्य स्वरादेः । स्वरादेर्धातोर्द्वितीयोऽडागमो भवति । अनेन द्वितीयोऽडागमः । 'ए ए ऐ' । एन्दत् ऐन्दता ऐन्दन् । ऐन्दः ऐन्दतं ऐन्दत । ऐन्दं ऐन्दाव ऐन्दाम । अस्य धातोर्लिट्प्रकारं वियते दर्शयति । इन्द् अप् इति स्थिते ॥ सूत्रम्–'कासादिप्रत्ययात्०' ॥ कास आदिर्येषां ते कासादयः [illegible] प्रत्ययान्तो धातुः प्रत्ययशब्देनोच्यते । कासादिश्च प्रत्ययश्च कासादिप्रत्ययं तस्मात् कासादिप्रत्ययात् आम् । कृ च अस् च भूश्च कृअस्भुवः कृअस्भुवः परे यस्मात्स कृअस्भूपरः । [illegible] सूत्रम् । कास् आस् दय् अय् नाम्यादि गुरुमदात्मनेकस्वरधातुभ्यः प्रत्ययान्ताद्धातोश्च परादौ परे आम् प्रत्ययो भवति स च आम् कृअस्भूपरः प्रयोक्तव्यः । सूत्रस्य [illegible] [illegible] तथापि सूत्रस्यास्य [illegible] व्याख्यानं [illegible] कास् आस् चकास् जागृ दरिद्रा दय अय [illegible] [illegible] [illegible] [illegible] [illegible] विषये कास् प्रत्ययो भवति स च [illegible] [illegible] [illegible] प्रयोक्तव्यः । कासाद [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] ॥ ८३-८४ ॥

(८०) स्वरादेरिति । [illegible]

---

(१) [illegible]

और तत्र इत्याद्यप्रसङ्गात् । कारणमामर्थ्यविवेकात् धातुकार्यानन्तरं द्वितीयेन का र्यमित्याह —एवं ॥ ८३ ॥ कास्यादिभ्यः प्रत्ययादाम्भित्यादि । प्रत्ययग्रहणमनेकच्प्रत्ययार्थम् । तत्र च इत्यादयः प्रत्ययान्तानां चि अनेकच्त्वाभावात् । कथं नहि प्रत्ययप्रथमवचनात् धातुः प्रत्ययसमे प्रत्ययानां वर्तन्ते इति सूत्रं व्यर्थं स्यात् । एतद्धि प्रकृत्यर्थस्य प्रत्ययार्थे विशेषणतया प्रत्ययविशेषणाः प्रमाणं इति यत् सूत्रम् । अनुभवे क्रियाणामानन्त्यविवक्षा तत्प्रकृत्यर्थे क्रियायाः विवक्षितत्वात् तत्प्रत्ययार्थेऽनन्यथा भवति । सामान्यविशेषयोरभेदा न्वयः प्रकृत्यर्थविशेषः । एवमेवेन्द्रांचकारेत्यादौ एककर्तृका भूतानद्यतनपरोक्षा यत्र कर्ता विवक्षितः तुल्यतान्वयेन । ननु कतति सकर्मकं भवति कथं कर्मवत्कर्तुरिति चेदस्तु —यत्र हि कातिविश्वासार्थे न प्रयोगे प्रयुज्यते तत्र तस्य नियमेन सकर्मकत्वं भवति यदि कदाचित् तस्यैव कारस्याहे । यत्र तु क्रियान्तर समानाधिकरणं कतति प्रयुज्यते तत्र तत्समानाधिकरणं कातिस्तत्सकर्मकत्वाकर्मक- त्वाभ्यां कृत्वा स्वयमपि तथा सकर्मकाकर्मकभावौ भजते । सुदर्शनं चकारेति । एवं भावनायास्तु । प्रकृतिसमानाधिकरणत्वेन कश्चित् सकर्मकत्वं बोध्यम् । तथा च—'त स्यामलं विमलांशुकं तपःपुञ्जोपि महर्षीः श्रिया विभावताभिर्विभर्ति बभूविरे' इत्यत्र क्रियान्तरसमानाधिकरणात् भवतः सकर्मकत्वात् कर्मणि लिट् । एवञ्चाम्प्रकृत्यर्थगत कारककोट्यभिन्नविभावनाभिमतैकमुपपादितं कर्मणीति ॥ ८४ ॥

विदुदरिद्राकाशकाशृजागृउष् एभ्यो वाम् ॥ ८५ ॥ 'विद् ज्ञाने । दरिद्रा दुर्गतौ । काशृ विकसने । जागृ निद्राक्षये । उष् दाहे' । एते विदादयः । इन्दां कृ-णप् इति स्थिते । कृ इत्येतस्य द्वित्वम् ॥ २३ ॥ पूर्वस्य वर्णस्य ऋकारस्याकारो भवति ॥ सुखम् ॥ ८६ ॥

(म०) सूत्रम्—विदु दरिद्रा० ॥ विद् दरिद्रा कास् काश जागृ उष् एभ्यो वाम् प्रत्ययो भवति । इद् आम् कृ णप् इति जाते 'स्वरहीन०' इन्दां कृ णप् इति जाते णि कृ इत्यस्यास्य द्वित्वम् । इन्दां कृ कृ णप् इति जाते । सूत्रम्—२ ॥ कर साहि तिकम् अ द्वित्वं सूत्रम् । द्वित्वे कृते सति पूर्वसंबन्धिन ऋकारस्य आकारादेशो भवति । अनेन ऋकारस्याकारे सति इन्दां क कृ णप् इति जाते कुहाद्यु अनेन सूत्रेण ककारस्य चकारः । इन्दां च कृ णप् इति स्थिते ॥ ८५-८६ ॥

(प्र०) वर्णितः अन्यथा वातुमतेनाह —विदुदरिद्रेत्यादि । दरिद्राजागर्त्योरने कस्वरत्वाभित्यप्राप्तौ वस्यादस्यामप्राप्तौ विकल्प ॥ ८५ ॥

धातोर्नामिन ॥ धातोरन्त्यभूतस्य नामिनो वृद्धिर्भवति ञिति णिति च परे ॥८७॥ इन्दांचकार इन्दांचक्रतु इन्दांचक्रुः । मादिस्वामिट् । इन्दांचकर्थ इन्दांचक्रथुः इन्दांचक । इन्दांचकार इन्दांचकर इन्दांचकृव इन्दांचकृम । इन्दामास इन्दामासतु इन्दामासु । इन्दामासिथ । इन्दांबभूव । इन्द्यात् ।

इन्दिता । इन्दिष्यति ॥ स्वरादेः । ऐन्दिष्यत् । ऐन्दीत् ऐन्दिष्टाम् ऐन्दिषुः । ऐन्दीः ऐन्दिष्टम् ऐन्दिष्ट । ऐन्दिषम् ऐन्दिष्व ऐन्दिष्म ॥

(च०) सूत्रम्—'धातोर्नामिन ०' ॥ धातोर्नामिन इत्यादि सूत्रम् । धातोः अन्त्यभूतस्य नामिनः ञिति णिति च प्रत्यये परे वृद्धिर्भवति । अनेन वृद्धिस्तदा इन्द् अ कृ आर् णप् इति जाते 'नश्चापदान्ते०' 'स्वरहीनं' इन्दाञ्चकार इति रूपं सिद्धं भवति । एवमन्यान्यपि रूपाणि सेत्स्यन्ति । किति णादौ गुणवृद्धी न भवतः किन्तु 'ऋरम्' इत्यस्य सूत्रस्य प्राप्तिः । इन्दाञ्चक्रतुः इन्दाञ्चक्रुः । 'क्रादर्गादि' इति सूत्रे कृधातोरिण्निषेधात् इडागमो न भवति किन्तु गुणो भवति । इन्दाञ्चकर्थ इन्दाञ्चक्रथुः इन्दाञ्चक्र । इन्दाञ्चकार 'णदुत्तम' इति सूत्रेण वा णित् तेन वा वृद्धिर्भवति । इन्दाञ्चकर इत्यत्र गुणो भवत्येव वा । इन्दाञ्चकृव इन्दाञ्चकृम । यदा असधातोरनुप्रयोगस्तदा इन्दा अस णप् इति स्थिते द्वित्वसूत्रेण अकारस्य द्विर्भावे 'आस्योगादौ सवर्णे दीर्घः' 'स्वरहीनं' इन्दामास इन्दामासतुः इन्दामासुः । इन्दामासिथ । यदा भूधातोरनुप्रयोगस्तदा इन्दां भू णप् इति जाते 'नश्चापदा०' पुनश्च बभूव इति रूपं यथा सिद्धं भवति तथैव रूपं कार्यम् । इन्दाम्बभूव इन्द्यात् इन्दिता इन्दिष्यति । स्वरादेः । ऐन्दिष्यत् ऐन्दीत् ॥ ८७ ॥

वस निवासे । वसति । वसेत् । वसतु । अवसत् । वस् णप् इति स्थिते द्वित्वम् ॥ **णयादौ पूर्वस्य** ॥ णबादौ परे यजादीनां ग्रहादीनां च पूर्वस्य सम्प्रसारणं भवति । यकारवकाररेफाणामिकारोकारऋकारा भवन्ति ॥ १४७ ॥ सस्वरस्य सम्प्रसारणं दीर्घस्य दीर्घो ह्रस्वस्य ह्रस्वः ।

ग्रहिज्यावयिव्यधिर्वष्टिविचतिवृश्चतिस्तथा ।

पृच्छतिभृज्जतिश्चैव नैवैते तु ग्रहादयः ॥

पूर्ववकारस्योत्वे । 'अत उपधायाः' उवाम । ऊचतुः ऊचुः इति सिद्धे ॥ ग्रहां यवराणां स्मृतः सम्प्रसारणं क्किति ॥ ग्रहादीनां सम्प्रसारणं भवति क्किति परे ॥ १४८ ॥

यजिवपिर्वहिश्चैव वेञ्व्येञौ ह्वयति स्वपि ।

वद्वसी श्वयतिश्चैव किरेकादश यजादयः ॥

'सवर्णे दीर्घः सह' ॥ घसादेः षः ॥ घसिशासिवसीनां सस्य षो भवति घत्वनिमित्ते सति ॥ १४९ ॥ ऊषतुः ऊषुः । उवसिथ–उवस्थ । अव [illegible] । [illegible] । उष्यात् । वस्ता ॥ सस्तोऽनपि ॥ सकारस्य तकारो भवति अनपि सकारे परे ॥ १५० ॥ वत्स्यति । अवत्स्यत् । वृद्धिः । अवात्सीत् । 'असात्' 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति न्यायात् । अवात्ताम् । अवात्सुः ॥

(च०) वस निवासे । वसति । वस् वस् इति स्थिते । 'द्विश्च धातुः' [illegible]

[illegible]

सिद्धौ वस निवासे इत्येतेषां धातूनां सकारस्य षकारो भवति । अत्र 'किङात्' इति सूत्रस्य प्राप्तिरेव नास्ति तस्मात्सूत्रं कृतम् । अनेन सस्य षः 'स्वरहोर्द्वे' ऊषतुः ऊषुः । अस्वत । उवसिथ उवस्थ । 'यजाम्' । 'घसादे' । उष्यात् । वस्ता । वस स्यप् तिप इति स्थिते ॥ सूत्रम्—'सस्तोऽनपि ॥' स त, अनपि त्रिपदं सूत्रम् । धातोः सकारस्यानपि विषये णकाभिविभक्तिपदूकविषये सकारे परे तकारो भवति । अनेन सकारस्य तकारो भवति । वत्स्यति । अवत्स्यत् । सत्वनिगे भिस्यम् अनेन वृद्धि । अवात्सात् । 'ससात्' । 'सस्तोऽनपि' 'प्रत्ययलोपे' इति न्यायात् वृद्धिः । अवात्ताम् । अवात्सुः ॥ १५० ॥

(प्र०) णवाद्याविति । यद्यपि यजिवृधिग्रहिज्यावसिभृज्जप्रभृतीनां पूर्वस्य सम्प्रसारणे कृते विशेषो नास्ति तथापि पर्जन्यवल्लक्षणप्रवृत्तेः ॥ १४७ ॥

यजामिति । अनुवर्तनान्यान् गृह्णाति । पूर्वं ये यकारवकाररेफास्तयोः सम्प्रसारणमित्यर्थः । यवयोश्च तद्विधौ प्रयोजनाभावात् ऋकृत इति इकारोकारयोर्ग्रहणम् । सम्प्रसारणमिति संज्ञानिर्देशेन ऋकृत इत्येव सिद्धे संज्ञाविधानं पाणिनीयमतानुसरणार्थम् ॥ १४८ ॥

अवात्तामिति । सिद्धेऽपमत्वसिद्धत्वात् एव धातोः स्तस्य तकारे जाते वर्णे समाम्नाय एतदर्थमेवाकृतिपठनस्य भाष्ये सिद्धान्तितत्वात् द्वयोरपि तयोस्तकारयोर्लोपः स्यात् हसादिति सिद्धोप ॥

वद व्यक्तायां वाचि । वदति । वदेत् । वदतु । अवदत् । उवाद ऊदतुः ऊदुः । उवदिथ । उवाद । वदिता । वदिष्यति । अवदिष्यत् । अवादीत् ॥

(च०) वद व्यक्तायां वाचि । वदति । लिट्प्रकारे 'ज्यादौ' अनेन सम्प्रसारणम् 'अत उपधायाः' अनेन वृद्धि । उवाद । 'यजाम्' । ऊदतुः ऊदुः । उवदिथ । सम्प्रसारणम् । उद्यात् । वदिता । लुङ् प्रकारे 'वदिव्रज्यो' सौ नित्यम् अवादीत् ॥

टुओश्वि इर् गतिवृद्ध्योः । टुकारोकारौ कार्यार्थौ । इर् इरसञ्ज्ञक । श्वयति । श्वयेत् । श्वयतु । अश्वयत् ॥ श्वयतेर्णादौ प्रथमं सम्प्रसारणं वा वक्तव्यम् ॥१५१॥ ततो द्वित्वम् । शुशाव शुशुवतुः शुशुवुः । शुशविथ । सम्प्रसारणाभावपक्षे । शिश्वाय शिश्वियतुः शिश्वियुः । शिश्वयिथ । सम्प्रसारणम् । 'ये' शूयात् । श्वयिता । श्वयिष्यति । अश्वयिष्यत् ॥ श्वयतेः सौ वृद्ध्यभावो वाच्यः ॥ १५२ ॥ अश्वयीत् अश्वयिष्टाम् अश्वयिषुः । इरितो वा ॥ श्वयतेरिलोपो ङे वक्तव्यः ॥१५३॥ अश्वत् ॥ श्वयतेर्ङे द्वित्वं वा ॥ १५४ ॥ अशिश्वियत् इत्यादि ॥

इति भ्वादिषु परस्मैपदिनः ॥ १ ॥

(च०) टुओश्वि इर् गतिवृद्ध्योः । टुकारोकारौ कार्यार्थौ । इर् इत्संज्ञकः । पूर्ववत् तिबादय । गुण 'ए अय्' श्वयति । लिट्लकार ॥ सूत्रम्—'श्वयते'० ॥ श्वयतेर्धातोर्णादौ परे प्रथमं सम्प्रसारणं वा वाच्यम् । अनेनास्य पूर्वं सम्प्रसारणं ततो द्वित्वम् । शु शु णप् इति जाते । 'धातोर्नामिन' अनेन वृद्धिः । शुशाव । शुशु अतुस् इति जाते 'शु धातो' अनेन यकारे प्राप्ते । 'नानस्योव' अनेन वक्ष्यमाणेन सूत्रेण तन्निषेध किं तु इय एव भवति । शुशुवतु शुशाविथ । संप्रसारणाभावपक्षे 'धातोर्नामिन' शिश्वाय । शुधातो' शिश्वियतु । 'गुण' । शिश्वयिथ । संप्रसारणम् । 'ये' । शूयात् । श्वयिता । श्वयिष्यति । अश्वयिष्यत् । अश्वि इ सि ईट दिप् इति जाते 'णित्वे' अनेन णित्त्वात् वृद्धे प्राप्तौ ॥ सूत्रम्—'श्वयते ०' श्वयतेर्धातोः सौ परे वृद्ध्यभावो वाच्य । अनेन तन्निषेध । गुण । 'इट ईटि' इत्यादिसूत्रैः अश्वयीत् इत्यादिरूपं सिद्धं भवति । अस्य 'इरितो वा' अनेन वा ङप्रत्ययो भवति । तदा अश्वि ङ दिप् इति जाते ॥ सूत्रम्-'श्वयतेः०' ॥ श्वयतेर्धातोर्ङप्रत्यये परे इकारस्य लोपो वक्तव्य । अनेनेकारस्य लोपो भवति । अश्वत् अश्वताम् अश्वन् ॥ सूत्र-'श्वयतेर्धातो ङ प्रत्यये परे द्वित्वं वा भवति पूर्वस्य । 'शुधातो' अशिश्वियत् । अशिश्वियताम् । अशिश्वियन् इत्यादीनि रूपाणि ज्ञातव्यानि ॥ इति भ्वादिगणस्य परस्मैपदिन कथिता ॥ १ ॥ ११४ ॥

(प्र०) अश्वयीदिति । नन्वत्र परस्मैपदसिनिमित्तकस्येन वृद्धेर्विरहत्वात् सिमा [illegible] गुणे कृते इकारा [illegible] त्वाभावात् वृद्धप्राप्त्याऽप्राप्त्या [illegible] इत्या दिलक्षणाया वृद्धेर्निषेधे सिद्धे किं 'हम्यन्त' इत्यत्र विकल्पनेनेति चेत्, सौ वृद्धेर्वा प्राप्तिर्यावता वरहत्वादिति ॥ इति प्रसादनाम्न्यां भ्वादिपरस्मैपदप्रक्रिया ॥ १ ॥

॥ भ्वादिष्वात्मनेपदिनः ॥ २ ॥

अथ भ्वादिष्वात्मनेपदिप्रक्रिया ॥ एध वृद्धौ । अकार आत्मनेपदार्थः । तत्र परागि तिबादिवचनानि । तप् कर्तरि । एधते । 'आदाय ई' । अकारान्तात्परस्य आतआयसबधिन आकारस्येकारो भवति । अ इ ए एधेते । धर्मादिषितेऽदो राज्यम् ॥ विधिसमावनयोरीतेरयादीनि नव वचनानि । एधेत । एधताम् । ऐधत । कासादिप्रत्ययादाम् । एधाञ्चक्रे ॥ आम्प्रत्ययो यस्माद्विहितः स चेदात्मनेपदी तर्हि अनुप्रयुक्तकृञ आत्मनेपद श्वसोर्नात्मनेपदम् ॥ १ ॥ एधामास-एधाम्बभूव । विभाषा सध्यं ढस्तेर्मूर्धवो न । इट् । एधिषीष्ट । एधिता । एधिष्यते । ऐधिष्ट । ऐधिषाताम् ॥

(च०) [illegible] प्रकारान्तरं—एध वृद्धौ । एधृ [illegible] वृद्ध्यर्थे । [illegible] आत्मनेपदा । [illegible] आह—अकार [illegible] । [illegible] इति [illegible] ।

इधाताम् ईरन् । ताम्, आताम् अन्ताम् । तत्र आताम् अन्त इत्यादीनि नव वचनानि बोध्यानि ॥ तत्र वर्तमानात्मनेपद प्रक्रिया लिख्यते । भ्वादिप्रयोग अप्कर्त रि इति कार्यं पूर्ववत् । सर्वत्र अप् कर्तरि 'स्वादीर्भ०' एधते । द्विवचने एध आते इति स्थित सूत्रम्—'आदाय ई' ॥ आ पर वचनान्त सांकतिकम् । आत आत च आदाय आन्त आदाय परश्चैकवचनान्तम् । ई प्रथमैकवचनान्तम् । 'ङ्योर्ङि०' 'आने सवर्णे०' अन्त । ष्कान्त इत्यन्त विपर्ययमिदं सूत्रम् । अ अकारान्तस्य आते आथे आताम्, आ थाम् इति वर्तमानागीप्रेरणाबलानीयप्रथममपुरुषमध्यमपुरुषद्विवचनस्याकारस्य इकारादेशा भवति । अनन्त भाव इत्याकारस्य इकारादेशा भवति । अइए एधे । बहुवचने—'अन्' इत्याकारस्य । 'स्वादीर्भ०' एधन्ते । एधसे । द्विवचने—'आदाय ई' इतीकार । 'अ इ ए' एधथे । एधध्वे । उत्तमपुरुषैकवचने—'अे' एधे । द्वित्वे बहुत्वे च–'म्मोरा' एधा वहे एधामहे । भ्वादिदारम्भम्—'धर्मे' रिति । अन्' समीपवर्ति रात्रौ धर्मात् एधत—र्घते इति वस्मान्नक्रिया । विभिन्नभावकत्वा ईत्यादि नव वचनानि बोध्यानि । सर्वत्र अप् कर्तरि स्वादीर्भ० अइए एधत एधेताम् एधेरन् इत्यादि नव रूपाणि । माधुरनो मनुरचा धनश पर्रन् एधत वर्तेत इति विधि । 'आनीप्रेरणयो' ताम् आताम् अन्ताम् इत्यादीनि नव प्रत्यया । 'अपकर्तरि' आताम् आथाम् इत्यत्र 'आदाय ई' 'अ इ ए' । अन्तामित्यत्र । अन्' स्वादीर्भ० ॥ मध्यमपुरुष द्वित्वे । आदाय ई 'अइए' । एक स्ववहुत्वबाधितत्व । उत्तमपुरुषैकवचने । 'एपरे' एधै । द्विबहुत्वयो 'सवर्णे०' एधताम् एधतामित्यादीन्युदाहरणानि ज्ञेयानि । तथाऽपुरधवाम् ॥ अथानद्यतन—एध । तनादि नव वचनानि बोध्यानि । तत्र 'अप् कर्तरि' 'न्यादाकद्' इति प्राग्बागम । सूत्रम्—'श्य वाद्' ॥ वहुवचनान्तम् । स्वर मार्गिन्यासौ स्वरादिकस्य धातो अडागमानन्त रमनेन द्वितीयोऽवागम । 'सवर्णे०' ऐधत । अथवा द्विवारमपि । 'ऐधत' साधना प्रा रवत । केवलद्रुत्तमपुरुषैकवचने । 'अइए' ऐधत । ऐधताम् आताम ई । ऐधन्त अइ इत्यादिनिरूपणानि रूपाणि । अत्र यद्यपि द्वितीयमडागमं विनापि रूपसिद्धिर्भवति तथापि ऐधत इत्यादौ रूपसिद्ध्यर्थं सूत्रस्यास्य प्रणाम ॥ १ ॥

(प्र०) एध वृद्धाविति । अकाराऽनुदात्त आत्मनेपदार्थं । ऐधत इति । अत्र यद्य पि द्वितीयमडागमं विनापि रूपसिद्धिर्भवति तथापि ऐक्षत इत्यादौ रूपसिद्ध्यर्थं सूत्रस्या स्य प्रणाम ।

ईक्ष दर्शनाङ्कनयो । ईक्षते । ईक्षेत । ईक्षताम् । ऐक्षत । ईक्षाञ्चक्रे । ईक्षिषीष्ट । ईक्षिता । ईक्षिष्यते । ऐक्षिष्यत । ऐक्षिष्ट ॥

(च०) एवम् ईक्ष दर्शनाङ्कनयो । ईक्षधातु दर्शनाङ्कनार्थे । अङ्कनं परीक्षणम् । अकाराऽनुदात्त आत्मनेपदार्थं । तत्र विभक्तिचतुष्टयस्यात्मनेपदानि बोध्यानि । ण्यन्तस्य क्रिया । ईक्ष त आत अन्त । 'अप् कर्तरि' ईक्षते 'आदायद' ईक्षेत । अन्' ईक्षन्ते । ईक्षसे ईक्षेथे ईक्षध्वे । ईक्षे ईक्षावहे ईक्षामहे 'स्मातो' ॥ विधिनिमन्त्रणयो । ईक्ष ईत इत्यादिमित्यादि । 'अप् कर्तरि' 'स्वादीर्भ०' सर्वत्र । 'अइए' ॥ 'आशीप्रेरणयो' । ईक्ष

शाम् आताम् अन्तामित्यादय । 'अप् कर्तरि' 'स्वराद्दीनां०' इत्यनाम् । 'आदाय इ' 'अ इण्' ईशेताम् । ईशन्ध्व । 'आदाय इ' इशयाम् इशध्वम् । इशै 'एएए । ईशावै' इत्यादि सवर्णे०' ॥ अनद्यतने लनादय । 'अप कर्तरि' 'दिवादावट्' 'स्वरादे' इत्यनागमद्वयं विधाय अप्रेतनाडागमेन सह 'अइण' द्वितायन तु 'एएए' ऐशत इत्यादीनि रूपाणि ॥

दद दाने । ददते । ददेत । ददताम् । अददत । 'शसददवा' इति नैत्वपूर्वलोपौ । ददे ददाते ददिरे । ददिषीष्ट । ददिता । ददिष्यते । अददिष्यत । अददिष्ट ॥

(च०) दद दाने । अत्राप्यकार आत्मनेपदार्थ । ददते । ददेत । ददताम् । अददन्त । 'लिप' अननैत्वपूर्वलोप प्राप्त । 'नामददवादि०' अनेन तन्निषेध । ददद । ददिषीष्ट । ददिता । लुङ् । अददिष्ट अददिषाताम् अददिषत । सुगमोऽयं धातु ॥

(प्र०) दददृ इति । अत्र लोपपचामित्यनेनैत्वपूर्वलोप प्राप्ते 'ना दद वा०' अनेन तन्निषेध ।

ष्वष्क गतौ । 'नामधातु' अनेन सत्वाभाव । ष्वष्कते । ष्वष्केत । ष्वष्कताम् । अष्वष्कत । पष्वष्के । ष्वष्किषीष्ट । ष्वष्किता । ष्वष्किष्यते । अष्वष्किष्यत । अष्वष्किष्ट अष्वष्किषाताम् ॥

(च०) ष्वष्क गतौ । नामधातु०' अनेन सत्वाभाव । ष्वष्कते । 'पूर्वस्य हसादि । पष्वष्के । पष्वष्काते । पष्वष्किरे । ष्वष्किषीष्ट । ष्वष्किता । लुङ्कार । अष्वष्किष्ट । अष्वष्किषाताम् । अष्वष्किषत ॥

(प्र०) ष्वष्कत इति । 'नामधातु ष्वष्कष्टिवाम्' इति सत्वनिषेध ।

ऋज गतौ स्थैर्ये स्पर्द्धे च । 'उपधाया लघो' अर्जते । अर्जेत । अर्जताम् । आर्जत । 'नुगशाम्' 'अस्वोर्णादौ' आनृजे । अर्जिषीष्ट । अर्जिता । अर्जिष्यते । आर्जिष्यत । आर्जिष्ट ॥

(च०) ऋज् गतौ स्थैर्ये स्पर्द्धे च । अकार आत्मनेपदार्थ । पूर्ववद् विवादय । 'उपधाया' अनेन गुण । अर्जते । अर्जेत । अर्जताम् । 'स्वरादे' । आर्जत । ऋज मण इति स्थिते । 'द्विश्च' । 'र' । 'नुगशाम्' अनेन पूर्वस्य नुगागमो भवति । 'अस्वोर्णादौ' । स्वराद्दीनां०' । आनृजे आनृजाते आनृजिरे । अर्जिषीष्ट । अर्जिता । स्वरादे । आर्जिष्ट आर्जिषाताम् आर्जिषत ।

ष्वञ्ज परिष्वञ्जने । सत्वम् । 'अपिरञ्जदशषञ्जष्वञ्जाम्' स्वजते । स्वजेत । स्वजताम् । अस्वजत । सस्वञ्जे सस्वञ्जाते सस्वञ्जिरे ॥ स्वजतेर्णादौ वा किच्चम् ॥ २ ॥ सस्वजे सस्वजाते सस्वजिरे । 'चो कु' 'खसे चपा' चत्वम् । 'कषसयोगे क्ष' स्वङ्क्षीष्ट । स्वङ्क्ता । स्वङ्क्ष्यते । अस्वङ्क्ष्यत । 'हस्वात्' अस्वङ्क्त अस्वङ्क्षाताम् अस्वङ्क्षत । अस्वङ्क्थाः ॥

(च०) ष्वञ्ज परिष्वङ्गे। 'आदेशप्रत्यययोः' अनेन षत्वम्। 'अनिदिताम्' अनेन नानुस्वारस्य लोपः। स्वजते। स्वजेत। स्वजताम्। अस्वजत। 'द्विः'। सस्वञ्जे सस्वञ्जाते सस्वञ्जिरे॥ सूत्रम्—'श्रन्थिग्रन्थि०' ॥ स्वञ्जतधातोर्लिटो वा कित्त्वं वाच्यम्। कित्त्वात् 'नो लोपः' अनेनैवानुस्वारस्य लोपो भवति। सस्वजे सस्वजाते सस्वजिरे। स्वङ्क्षीष्ट इति सिध्यति। 'चोः कुः'। अनेन जकारस्य गकारः। 'खरि च' अनेन गस्य कः। 'षढोः०' अनेन सस्य षः 'क्रषस्य० स्वङ्क्षीष्ट। 'न्यो कु' 'लम०' अनेन गस्य क स्वाङ्क्षीनम्' स्वङ्क्ता। स्वङ्क्ष्यते। अस्वङ्क्ष्यत। 'झलो झलि' अनेन सलोपः। अस्वङ्क्त॥१॥

(प्र०) सस्वजे इति। सस्वञ्जारिति षत्वनिषेधः। झलाम्जिति सिच्य अस्वङ्क्त।

त्रपूष् लज्जायाम्। उकारषकारौ कार्यार्थौ। त्रपते। त्रपेत। त्रपताम्। अत्रपत। 'तृफलभजत्रपाम्' इत्येत्वाभ्यासलोपौ। त्रेपे त्रेपाते। त्रेपिरे। 'ऊदितो वा' त्रपिषीष्ट–त्रप्सीष्ट। त्रपिता—त्रप्ता। त्रपिष्यते त्रप्स्यते। अत्रपिष्यत अत्रप्स्यत। अत्रपिष्ट अत्रपिषाताम् अत्रपिषत। अत्रप्त॥

(च०) त्रपूष लज्जायाम्। उकारषकारौ कार्यार्थौ। पूर्ववत् साध्यम्। त्रपत। लिट् लकारे त्रप् ए इति स्थिते 'तृफलभजत्रपाम्' अनेनैत्वाभ्यासलोपौ भवतः। त्रे त्रेपाते त्रेपिरे। अस्य धातोः 'ऊदितो वा' अनेनेड्विकल्पो भवति। त्रपिषीष्ट त्रप्सीष्ट। इडभावे अत्रप्त। इडभावे 'झलो झलि' अनेन सलोपो भवति तेन अत्रप अत्रप्साताम् अत्रप्सत॥

(प्र०) त्रपूष लज्जायाम्। षकारः 'षिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययार्थः। ऊकार 'ऊदितो वा' इतीड्विकल्पार्थः। झलि 'झलो झलि' इति सिलोपः। अत्रप्त।

तिज् निशाने क्षमायां च॥ 'गुप्तिज्०' तितिक्षते। तितिक्षेत। तितिक्षताम्। अतितिक्षत। तितिक्षाञ्चक्रे। तितिक्षाम्बभूव। तितिक्षामास। तितिक्षिषीष्ट। तितिक्षिता। तितिक्षिष्यते। अतितिक्षिष्यत। अतितिक्षिष्ट॥

(च०) तिज् निशाने क्षमायां च। निशानं तीक्ष्णीकरणम्। 'गुप्तिज्किद्भ्यः सन्' अनेन क्षमार्थे सन्प्रत्ययो भवति धातोर्द्वित्वं च। तितिज् स अ ते इति जाते। 'चोः कुः' अनेन जस्य गः। 'खरि च०' अनेन गस्य कः। 'आदेशप्र०' 'षत्वम्०'। 'अतो लोपः' अनेनाकारस्य लोपो भवति। 'स्वरादौ'। तितिक्षते। तितिक्षेत। तितिक्षताम्। अतितिक्षत। लिट्लकारे 'कास्प्रत्ययादाम्' अनेनाम्प्रत्ययो भवति। तितिक्षाञ्चक्रे। आम्प्रत्ययो यस्मात् तस्य व्याख्यानेन 'कृञ्चानुप्रयुज्यते' इति आत्मनेपदं च भवति। तेन तितिक्षाम्बभूव। तितिक्षामास। अन्यानि सूत्र सर्वाणि तानि पूर्ववत्साध्यानि। लुङ्लकारे अतितिक्षिष्ट॥

(प्र०) तिज निशाने इति निशानं तीक्ष्णीकरणम्। 'गुप्तिज्' इति तिज क्षमायां सन्। तितिक्षते क्षमां करोतीत्यर्थः।

गुप गोपनकुत्सनयोः ॥ जुगुप्सते । जुगुप्सेत । जुगुप्सताम् । अजुगुप्सत । जुगुप्साञ्चक्रे जुगुप्साम्बभूव जुगुप्सामास । जुगुप्सिषीष्ट । जुगुप्सिष्यते । अजुगुप्सिष्यत । अजुगुप्सिष्ट ॥

(च०) गुप गोपनकुत्सनयोः । 'गुप्स्य' । अनेनास्य धातोरपि सप्रत्ययो भवति धातोर्द्वित्वं च । तेन गुगुप स इति जातं 'कुहोश्चुः' । अनेन गस्य जः । जुगुप् स इति जातं । 'स धातुः' अनेन धातुत्वात् तआदयः प्रत्यया भवन्ति । तदा जुगुप्सते इति जातं । 'अप् कर्तरि' । अट् जुगुप्सत । लिट्लकारे । जुगुप्साञ्चक्रे । जुगुप्सामास । जुगुप्साम्बभूव । लुङ्लकारे अजुगुप्सिष्ट अजुगुप्सिषाताम् अजुगुप्सिषत । अन्यथा लकाराणां रूपाणि मूले सन्ति तस्मात् न लिखितानि ॥

(प्र०) गुप गोपनकुत्सनयोरिति । गोपनं रक्षणं । गुप्तनिन्दायां सः । जुगुप्सते निन्दां करोति ।

मान विचारणे । द्वित्वम् । ह्रस्वः ॥ **यः से ॥** पूर्वस्याकारस्येकारो भवति से परे ॥ ३ ॥ **मानादीनां पूर्वस्य दीर्घो वक्तव्यः ॥ ४ ॥** मीमांसते । मीमांसेत । मीमांसताम् । अमीमांसत । मीमांसांचक्रे मीमांसामास मीमांसांबभूव । मीमांसिषीष्ट । मीमांसिता । मीमांसिष्यते । अमीमांसिष्यत । अमीमांसिष्ट ॥

(च०) मान विचारणे । अकार इत् आत्मनेपदार्थः । 'गुप्स्य' अनेन सद्वित्वं भवति । ह्रस्वः । 'म मान् स इति जातं ॥ सूत्रम्—'यः से' ॥ धातोः पूर्वस्य अकारस्य इकारो भवति सप्रत्यये परे । अनेनाकारस्य इकारः । तदा मि मान् स इति जातं ॥ सूत्रम्—'मानादीनाम्०' ॥ मान् बध दान् शान् इत्येतेषां धातूनां पूर्वस्य सप्रत्यये परे दीर्घो वक्तव्यः । अनेन पूर्वस्येकारस्य दीर्घः । स धातुः' 'अप्कर्तरि' न्यायादाते' मीमांसते लिट्लकारे । मीमांसांचक्रे । लुङ्लकारे । अमीमांसिष्ट इत्यादीनि रूपाणि पूर्वोक्तैः सूत्रैः सिध्यन्ति पिष्टपेषणे किं प्रयोजनम् ॥ ३—४ ॥

(प्र०) मानादीनामिति । एषां पूर्वस्येकारस्य दीर्घः स्यात् । मानविचारणे । बध निन्दायाम् । दान आर्जवे । शान तेजने । इत्यादि ॥ ३—४ ॥

बध निन्दायाम् । आदिजबानाम् । बीभत्सते । बीभत्सेत । बीभत्सताम् । अबीभत्सत । बीभत्सांचक्रे । बीभत्सिषीष्ट । बीभत्सिता । बीभत्सिष्यते अबीभत्सिष्यत । अबीभत्सिष्ट ॥

(च०) बध निन्दायाम् । अकार उभयपदार्थः । 'गुप्स्य' । 'आदिजबानाम्' । 'यः से' । 'मानादीनाम्' 'स धातुः' । 'अप्कर्तरि' 'अट् धस्य चतुर्था०' बीभत्सते । लिट्लकारे । बीभत्सांचक्रे । अन्यानि मूले सन्ति । लुङ्लकारे । अबीभत्सिष्ट ॥

पण व्यवहारे स्तुतौ च । पन च । आय । पणायते । पणायेत । पणायताम् । अपणायत । पणायांचक्रे । आयाभावपक्षे । पेणे पेणाते पेणिरे । पणायिषीष्ट-पणिषीष्ट । पणायिता-पणिता । पणायिष्यते पणिष्यते । अपणायिष्यत अपणिष्यत । अपणायिष्ट-अपणिष्ट । एवं पन च ॥

(च०) पण व्यवहारे स्तुतौ च । 'आयः' अनेनास्य आय. प्रत्ययो भवति । 'स नाद्यन्ताः धातवः' 'अतो लोपः' 'सवर्णे दीर्घः सह' पणायते । पणायेत । पणायताम् । अपणायत । पणायांचक्रे । आयप्रत्ययोऽपि वा भवति सूत्रोक्तत्वात् । आयाभावपक्षे—'आय पणाम् अनन्त्यैकस्वरपूर्वकारी । पेणे पणाते पेणिरे । पणाय इट् सीष्ट इति जाते । 'अतः' 'स्वर इ०' 'किश्चाइ' पणायिषीष्ट । आयाभावपक्षे—पणिषीष्ट । पणायिता—पणिता । लुङ् प्रकार—अपणायिष्ट । अपणिष्ट । एवं पनधातोरपि रूपाणि ज्ञातानि ॥

(प्र०) पणव्यवहारे स्तुतौ चेति । व्यवहारः क्रयविक्रयादि । 'विनायार्थञ्च सन्देह इति हार उच्यते नानासन्देहहरणात् व्यवहार इति स्मृतः' इति कात्यायनः । पनचेति । यद्यपि पृथङ्निर्देशात् अयमर्थव्यवहितस्यैवेति सुवचं तथापि सम्प्रदायानुरोधात् पनेति स्तुत्यर्थस्यैव सम्बन्धे पृथङ्निर्देशाच्च । स्तुत्यर्थानुबन्धस्य केवल चरितार्थत्वादाय प्रत्ययान्तात्परस्मैपदं न भवति । अद्रिस्तु—'न चोरस्ये पणिना पणायाम्' इत्यत्र व्यवहारेऽप्यायमन्यं कृतवान् ॥

कमु कान्तौ ॥ कमेः स्वार्थे ञिः प्रत्ययो वक्तव्यः ॥ ५ ॥ भवति तु वा । वृद्धि । सधातु । अय्गुणौ । अयादेश । कामयते । कामयेत । कामयताम् । अकामयत । कामयांचक्रे चकमे । कामयिषीष्ट कमिषीष्ट । कामयिता कमिता । कामयिष्यते-कमिष्यते । अकामयिष्यत अकमिष्यत । अकामि त इति स्थिते ॥ ञेरङ्द्विश्च ॥ ण्यन्तादादोर्मुक्तेऽर्थे अङ् प्रत्ययो भवति दिवादौ परत ॥६॥ सेरपवाद । धातोश्च द्वित्वम् ॥ ञे ॥ इडा गमर्वाजिते अनवि विषये ञेर्लोपो भवति ॥७॥ ह्रस्व । कुहोश्चु ॥ अङि स्वघो ह्रस्व उपधायाः ॥ अङि सत्युपधाया ह्रस्वो भवति पूर्वसम्बन्धिनो टकारस्येकारो भवति लघुनि धात्वक्षरे परे ॥८॥ स्वघोर्दीर्घ ॥ अङि सति टसादेर्लघो पूर्वस्य दीर्घो भवति लघुनि धात्वक्षरे परे ॥ ९ ॥ अचीकमत अचीकमेताम् अचीकमन्त ॥ ञेरभावपक्षे-॥ कमेरङ्द्विस्त्वे वाच्ये ॥ ञ्यन्तत्वाभावान्न दीर्घकारौ ॥१०॥ अचकमत ॥

(च०) कमु कान्तौ । कान्तिरत्र इच्छा । उकार इत आत्मनेपदार्थः । 'कमेः कमर्थोता स्वार्थे ञिः प्रत्ययो वक्तव्यः' । भवति तु वा वक्तव्यः । कम् ञि इति जाते ।

'अत उपधायाः' अनेन वृद्धिः । 'स धातुः' अकारो णित्कार्यार्थः । 'अप्कर्तरि' पुन- 'पुजन्' कामयते । कामयेत । कामयताम् । अकामयत । कामयांचक्रे । णेरभावपक्षे- चकमे । कामयिषीष्ट-कमिषीष्ट । कामयिता कमिता । अन्यानि सुगमानि सन्ति । लुङ्युत्तमैक- अकामि तन् इति स्थिते । सूत्रम्—'णेरङ् द्विश्च' ॥ इह णेः अङ् द्विः च कः प' सूत्रम् । णिप्रत्ययान्ताद्धातोर्भूतमात्रेऽद्यतने काले सिविषये द्विवाद्यौ परे अङ्प्रत्ययो भवति । तत्सन्नियोगेन धातोः द्वित्वं भवति । चकारात् श्रिद्रुस्रुभ्यो णिप्रत्ययाभावेऽपि अङ् द्वित्वं च ॥ 'णे' णे इडागमवर्जिते अनपि विषये णिप्रत्ययस्य लोपो भवति । तदा अ का काम् इति स्थिते । 'ह्रस्व' । 'कुहोश्चुः' तदा अचकाम् अन् इति जाते सूत्रम्—'अङि लघौ ह्रस्व उपधायाः' ॥ अङि लघौ ह्रस्व उपधायाः षष्ठ्यन्तम् । अङि प्रत्यये सति धातोः लघौ परे पूर्वसम्बन्धिनोऽकारस्य इकारो भवति । दीर्घदीर्घोपधाया ह्रस्वोऽपि भवति । अनेन अकारस्य इकारः । उपधाया ह्रस्वः । तदा अचिकम् अ अ तन् इति जाते सूत्रम्— 'लघोर्दीर्घः' ॥ लघोः दीर्घः । अङि सति हसादलघोः पूर्वस्य दीर्घो भवति लघुनि धातोः स्वरे परे सति । अनेनेकारस्य दीर्घः अङ्वत्तोऽकारलोपः । 'स्वराद्धोनः' अचीकमत अचीकमेताम् अचीकमन्त । णेरभावपक्षे । सूत्रम्—'कमेः' ॥ कमेर्धातोरङ्प्रत्ययश्चि- वाच्य । अनेनाङ्प्रत्ययः द्वित्वं च भवति । ण्यन्तत्वाभावात् न दीर्घेकारौ । अचकमत । अचकमेताम् । अचकमन्त । इत्यादीनि रूपाणि ज्ञेयानि ॥ ९—१० ॥

(प्र०) कमुकान्ताविति । कान्तिरिच्छा । णिङभाव उदित्वात् क्त्वायामिड्- विकल्पः । कमित्वा-कान्त्वा ।

णेरङ्द्विश्चेति । अस्य प्रत्ययपरत्वात्तन्तलाभ । अप् कर्तरीत्यतो अनुवृत्त्या कर्तर्यपुनरर्थावगम् । तत्किम् । अकारोपधायाः षष्ठी कुत्रापि ॥ ६ ॥

भवतीति । णिश्रिन्नो सामान्यत ग्रहणम् । अन्यत्र णेर्लोपो न स्त्रिकामसमासवाच्येऽपि [illegible] । इति व्याख्येयम् । तत्र इटि-कामयिता । आमि-कामयामास । औणादिके अल- [illegible] । आलुप्रत्यये-स्पृहयालुः । इष्णुप्रत्यये औणादिके-स्तनयित्नुः । इष्णुप्रत्यये [illegible] ॥ ७ ॥

अङिलघाविति । [illegible] ॥ ८ ॥

[illegible] इति । [illegible] ॥ ९ ॥

अय गतौ । अयते । अयेत । अयताम् । आयत ॥ परापूर्वोऽयतिः [illegible] वाच्यम् ॥ ११ ॥ पलायते । पलायेत । [illegible]

ताम् । अयलायत । अयाचक्रे-अयामास-अयांबभूव । अयिषीष्ट । अयिता । अयिष्यते । आयिष्यत । आयिष्ट आयिषाताम् आयिषत । आयिढ्वम्-आयिध्वम् ॥

(च०) अय गतौ। पूर्ववत् तआदयः प्रत्यया भवन्ति। अयते। पलायते धातुः परायुत्र स्थाने वर्ण्यमानेन सूत्रेण लत्वं भवति ॥ सूत्रम्—'परापूर्वेऽयतौ०' ॥ अयतौ धातौ पर उपसर्गरेफस्य लत्वं वाच्यम्। अनेन रकारस्य लकारः। तत्र पलायते इति रूपं सिद्धम्। लिट्लकारे। 'कासादिप्रत्ययादाम्' अनेनाम् प्रत्ययो भवति। अयांचक्रे। इ मू स्त। अयिषीष्ट। लुङ्लकारे। आयिष्ट ॥ ११ ॥

(प्र०) अय गतौ। अयते इति। अथ कथं 'उद्यति वितयाभ्योरतिमरश्मि' इति माघ। तथा चात्र शानप्रत्ययेन भाव्यमिति चाक्रिपुराणाः। शब्दाः। अनुपपन्नमेवाभाति धातुसन्नयनमिदं यदिदं लिस्कारणात्परस्मिन्। वस्तु—इट् किट् कटी गत्यर्थाः इ इ इति प्रश्लिष्य इणादेरयतीति रूपं जात तत्र शतरि तद्रूपं सिद्धम्।—इत्यलम् ।

दय दानगतिहिंसादानेषु । दयते । अयादिवत्प्रक्रिया ॥

(च०) दय दानगतिहिंसादानेषु । अन्यानि धातोरयनिवत् रूपाणि भवन्ति ॥

घट चेष्टायाम् । घटते । घटेत । घटताम् । अघटत । जुघटे । अघटे । घटिषीष्ट । घटिता । घटिष्यते । अघटिष्यत-अघटिष्ट ॥

(च०) घट चेष्टायाम् । पूर्ववत् तआदयः । घटते । लिट्लकारे । 'जुघटेऽपि' अनन्यत्र । जघट अघगात अघटिरे । घटिषीष्ट । लुङ्लकारे । अघटिष्ट ॥

ईह चेष्टायाम् । ईहते । ईहेत । ईहताम् । ऐहत । ईहांचक्रे । ईहिषीष्ट । ईहिता । ईहिष्यते । ऐहिष्यत । ऐहिष्ट ॥

(च०) ईह चेष्टायाम् । दीर्घोपधत्वात् न गुणः । ईहते लङ्लकारे । ऐकारात् ऐहत । लिट्लकारे । 'कासादि० अनेनाम्प्रत्ययः । ईहांचक्रे । ईहिषीष्ट । लुङ्लकारे ऐहिष्ट ॥

काशृङ् दीप्तौ । काशते । काशेत । काशताम् । अकाशत ॥

(च०) काशृङ् दीप्तौ । ऋकारङकारौ इतौ । काशते । लिट्लकारे । 'विद्गुर्विद्' अनयास्य आम् प्रत्ययो भवति । काशांचक्रे (?) ॥ आत्मभाव—'जुहोतेः' चकाशे । काशिषीष्ट । लुङ्लकार—अकाशिष्ट ॥

विद्वरिदा० । काशांचक्रे (?) । चकाशे । काशिषीष्ट काशिता । काशिष्यते । अकाशिष्यत । अकाशिष्ट ॥ कासृ शब्दकुत्सायाम् । कासते । कासेत । कासताम् । अकासत । कासांचक्रे । चकासे (?) । कासिषीष्ट । कासिता । कासिष्यते । अकासिष्यत । अकासिष्ट ॥

(च०) कासृ शब्दकुत्सायाम् । ऋकार इत् । । पूर्ववत् तआदयः । कासते । लि

टल्कारे 'कासादिप्रत्ययादाम्' अनेन नित्ये प्राप्ते । 'विदूदरिद्रा०' अनेन वा भवति कासांचक्रे (?) । आमभाव-पक्षे । कासिषीष्ट । कासिता । लुङ्लकारे अकासिष्ट ॥

षेवृ सेवने । सत्वम् । सेवते । सेवेत । सेवताम् । असेवत । सिषेवे सिषेवाते । सेविषीष्ट । सेविता । सेविष्यते । असेविष्यत । असेविष्ट ॥

(च०) षेवृ सेवने । 'आदेः ष्ण स्नः' अनेन सत्वम् । ऋकार इत् । सेवते । लिटलकारे । सिषेवे सिषेवाते सिषेविरे । सेविषीष्ट । लुङ्लकारे । असेविष्ट ॥

गाङ् गतौ । सवर्णदीर्घे कृते आकारत्वात्—'आतोऽन्तोदनतः' । गाते गाते गाते । गेत । गाताम् । अगात । जगे जगाते जगिरे । गासीष्ट । गाता । गास्यते । अगास्यत । अगास्त अगासाताम् ॥

(च०) गाङ् गतौ । ङकार आत्मनेपदार्थं । पूर्ववत् तआदय । 'सवर्णे०' गात । गात । आकारान्तत्वात् । 'आतोऽन्तोदनतः' । अनेन अन्ते इत्यस्य अते भवति । 'सवर्णे०' गाते । गासे । गाथे । गत्यादिनी । 'अ इ ए०' गेत । गाताम् । गाताम् । गाताम् । अगात अगाताम् अगात । गा णप् इति स्थिते । 'द्विश्च' 'ह्रस्वः' 'कुहोश्चुः' 'आतोऽनपि' । जगे जगाते जगिरे । गासीष्ट । गाता । गास्यते । लुङ्लकारे । अगास्त अगासाताम् अगासत ॥

(प्र०) गाङ्गताविति । गाते इत्यत्र प्रथमपुरुषप्रत्ययेन सह सवर्णदीर्घे कृते पश्चात् दाप इति न आतोऽन्तोदनत इति तु प्रवृत्त एव । तत्र अन्त परतस्तुल्यं रूपमिति भाव । गातऽआदादिकोऽप्यमिति इत्यदादय । फले तु न भेद ।

रुङ् गतौ भाषणे च । गुण । रवते । रवेत । रवताम् । अरवत अरवेताम् । अनेकस्वरत्वादसयोगपूर्वत्वाच्चोकारस्य वत्वे प्राप्ते ॥ नानप्योर्वः ॥ अनपि विषये धातोरुवर्णस्य वत्वं न भवति ॥१२॥ तत उव् । रुधातो । रुरुवे रुरुवाते रुरुविरे । रविषीष्ट । रविता । रविष्यते । अरविष्यत । अरविष्ट ॥

(च०) रुङ् गतौ भाषणे च । पूर्ववत् तआदय 'गुण' रवते । लिटलकारे—'उ धातो' अनेनानेकस्वरासंयोगपूर्वत्वात् वकारे प्राप्ते ॥ सूत्रम्—'नानप्योर्वः' ॥ न अनपि ओः व । तिबादिचतुष्टयस्याप्रत्ययो भवति नान्यविभक्तिगणस्य । ततो विभक्तिचतुष्टयवर्जितो विभक्तिगणोऽनप् कथ्यते । ततोऽनप्संबन्धिनि स्वरे परे धातोरुवर्णस्य वत्वं न भवति । किंतु उवेव भवति । अनेनोव् भवति । रुरुवे । रुरुवाते । रुरुविरे । रविषीष्ट । रविता । लुङ्लकारे—अरविष्ट अरविषाताम् अरविषत ॥ १२ ॥

देङ् पालने । दयते । दयेत । दयताम् । अदयत ॥ दयतेर्दिगि लिटि दिग्यादेशो द्वित्वाभावश्च वक्तव्यः ॥१३॥ दिग्ये । 'सध्यक्षराणामा' । दासीष्ट । दाता । दास्यते । अदास्यत ॥ आपिदूदाधास्थामित्व

सेर्डित्त्वं आत्मनेपदे वाच्यम् ॥ १४ ॥ ङित्वान्न गुणः ॥ लोपो ह्रस्वाज्झसे ॥ ह्रस्वादुत्तरस्य सेर्लोपो भवति झसे परे ॥ १५ ॥ अदित अदिषाताम् अदिषत ॥

(म०) दय पालने । ङकार आत्मनेपदार्थः । दयते । लिट्लकार ॥ सूत्रम्—'दय तेः' ॥ दयधातोर्लिटि परे सति दिग्यादेशो भवति । द्वित्वाभावश्च वक्तव्यः । 'आतो लोप इटि च' दिग्ये दिग्याते दिग्यिरे । 'सेर्डित्त्वमात्मने०' दासीष्ट । दाता । दास्यते । अदास्यत । अन्यानि तद्वत् इति स्थितं । सूत्रम्— अपिदाधाभ्याम्०' अपिदाधाभ्यां धा तुभ्यां ह्रस्वं सर्डित्त्वं च आत्मने० वाच्यम् । 'पक्षोर्निर्दि०' ङित्त्वाद् गुणाभावो भवति । तत अदि नि तत् इति जात ॥ सूत्रम्— लोपो ह्रस्वाज्झसे' ॥ अत्र ह्रस्वात् झसे । ह्रस्वादुत्तरस्य सर्लोपो भवति झसे परे । अनेन सलोपो भवति । अदित अदिषाताम् अदिषत ॥ १५ ॥

डीङ् विहायसा गतौ । डयते । डयेत । डयताम् । अडयत । 'गुणातो' डिड्ये । डयिषीष्ट । डयिता । डयिष्यते । अडयिष्यत । अडयिष्ट ॥

(म०) डीङ् विहायसा गतौ । ङकार आत्मनेपदार्थो ज्ञातव्यः । 'गुण' डयते । डयत । लिट्लकारे-'गुणातो' अनेन इ य भवति । डिड्ये डिड्याते डिड्यिरे । लुङः डयिषीष्ट । अन्यानि मूले सन्ति । लुङ्लकारे—अडयिष्ट अडयिषाताम् अडयिषत ॥

देङ् त्रैङ् पालने । दायते । दायेत । दायताम् । अदायत ॥ देङो णादौ दिग्यादेशो द्वित्वाभावश्च ॥ १६ ॥ दिग्ये । दासीष्ट । 'अपिदाधाभ्यामिति लोपो ह्रस्वाज्झसे' अदित ॥ त्रायते । तत्रे । अत्रास्त ॥

(म०) देङ् त्रैङ् पालने । पूर्ववत् तथा,ए । ए आय् । दायते त्रायते । लिट्लकार सूत्रम्—'देङो०' ॥ देङ धातोर्णादौ परे सति दिग्यादेशो द्वित्वाभावश्च भवति । 'आतोऽनपि' । दिग्ये दिग्याते दिग्यिरे । सेर्डित्त्वमात्मने० दासीष्ट । लुङ्लकारे । अपिदाधा 'लोपो ह्रस्वा०' । अदित अदिषाताम् अदिषत ॥ त्रैङ्धातोर्लिङ्लकारे सेर्डि त्त्वमात्मने०' अनेनाकार द्वित्व 'ह्रस्व' । 'पूर्वोऽस्य' आतोऽनपि' अनेनाकारलोपः । तत्रे तत्राते तत्रिरे । अस्य धातोर्लुङ्लकारे । 'सेर्डित्त्वमा०' अत्रास्त अत्रासाताम् अत्रासत ॥ १६ ॥

द्युतङ् दीप्तौ । उपधाया गुणः । द्योतते । द्योतेत । द्योतताम् । अद्योतत ॥ द्युते पूर्वस्य सम्प्रसारणं वक्तव्यं णादौ परे ॥ १७ ॥ दिद्युते । द्योतिषीष्ट । द्योतिता । द्योतिष्यते । अद्योतिष्यत । अद्योतिष्ट ॥ द्युतादिभ्यो लुङि वा परस्मैपदं वाच्यम् ॥ १८ ॥ ङित्त्वाद् गुणाभावे च । अद्युतत् ॥

(च०) द्युतङ् दीप्तने । ङकार उच्चारणार्थः । ङकार आत्मनेपदार्थः । 'उपधाया लघोः' अनेन गुणः ... । द्योतते । अन्यानि सूत्र सन्ति । द्युत् ण इति स्थिते । 'द्विर्भावे ...' द्युत् ण इति जात ॥ सूत्रम्—'द्युते ०' ॥ द्युतधातोः पूर्वस्य सम्प्रसारणं ... ... भवति । अनेनास्य पूर्वस्य सम्प्रसारणम् । 'द्युतिद्योतिनम्' । दिद्युते दिद्युताते दिद्युतिरे । द्योतिषीष्ट । द्योतिता । लुङ्लकार—अद्योतिष्ट । सूत्रम्—'द्युताद्भ्यः ०' ॥ द्युतादिभ्यः लुङि वा परस्मैपदं वाच्यम् । अनेनास्य लुङि वा परस्मैपदं भवति । तदा 'पुषादिद्युताद्य...' अनेन ... । ङित्त्वात् गुणाभावः । अद्युतत् अद्युतताम् अद्युतन् ॥ १८ ॥

वृतुङ् वर्तने । वर्तते वर्तेते वर्तन्ते । वर्तेत । वर्तताम् । अवर्तत । ववृते । वर्तिषीष्ट । वर्तिता । वर्तिष्यते । अवर्तिष्यत ॥ वृताद्भ्यः स्यसनोर्वा पे ऽनिट्त्वं च ॥ १९ ॥ 'वृतु वृधु शृधु स्यन्दू कृपू' एते वृतादयः । वर्त्स्यति । अवर्त्स्यत् । अवर्तिष्ट । परस्मैपदपक्षे—लिदुपा... । अवृतत् ॥

(च०) वृतुङ् वर्तने । उकार उच्चारणार्थः । वर्तते । लिट्लकारे ... ववृ ते । वर्तिषीष्ट । वर्तिता । वर्तिष्यते । अवर्तिष्यत ॥ सूत्रम्—'वृताद्भ्यः०' ॥ वृतादिभ्यः ... परस्मैपदमनिट्त्वं च वाच्यम् । वृताद्यन्तर्गण... । ... वर्त्स्यति । अवर्त्स्यत् । लुङ्लकारे । अवर्तिष्ट । परस्मैपदपक्षे- लिदुपा... ... । अवृतत् ॥ १९ ॥

वृधुङ् वृद्धौ । वर्धते । वर्धेत । वर्धताम् । अवर्धत । ववृधे । वर्धिषीष्ट । वर्धिता । वर्धिष्यते । अवर्धिष्यत । वर्त्स्यति । अवर्त्स्यत् । अवर्धिष्ट । अवृधत् ॥

(च०) वृधुङ् । ... । वर्धते । लिट्लकारे । ववृधे । वर्धिषीष्ट । ... ... पूर्ववत् ... सिद्धानि ॥

शृधुङ् शर्धने । शर्धते । शर्धेत । शर्धताम् । अशर्धत ॥ शशृधे । शर्धिषीष्ट । शर्धिता । शर्धिष्यते । अशर्धिष्यत । अशर्धिष्ट । शर्त्स्यति । अशर्त्स्यत् । अशृधत् ॥

(च०) शृधुङ् शर्धने । ... । ... । ... । ... ॥

स्यन्दूङ् प्रस्रवणे । स्यन्दते । स्यन्देत । स्यन्दताम् । अस्यन्दत । सस्यन्दे । ... । स्यन्दिषीष्ट । स्यन्त्सीष्ट । स्यन्दिता स्यन्ता । ... स्यन्दिष्यते स्यन्त्स्यते । ... स्यन्त्स्यति । अस्यन्दिष्यत अस्यन्त्स्यत अस्यन्त्स्यत् । अस्यन्दिष्ट अस्यन्त्त । अस्यदत् ॥

(च०) [illegible]

भवति । स्वस्निष्ट । इडभावपक्षे भ्वन वसा समावाभ् अनेन इस्य त । स्वस्सीष्ट । स्वर्त्स्यत—स्वन्ता । स्वरिष्यते । इडभावपक्षे 'सनेऽ' स्वर्त्स्यते । अस्वरिष्यत अस्वर्त्स्यत । अस्वरिष्ट । इडभावे । अस्वर्त । पाक्षेऽन्यत्र—'स्विदुपातेर्' 'को लोप' अनेन अनुस्वारस्य लत्वो भवति । अस्वर्त्त ॥

कृपू सामर्थ्ये । गुण ॥ कृपो रो लः ॥ कृपो रेफस्य लो भवति ऋकारस्य लृकारो भवति ॥ २० ॥ कल्पते कल्पेत । कल्पताम् । अकल्पत । चक्लृपे । कल्पिषीष्ट । इडभावपक्षे ॥ सिस्पो ॥ उपधाया गुणो न भवति सिस्पेरनिटि परत ॥ २१ ॥ क्लृप्सीष्ट । कल्पिता—कल्प्ता । कल्पिष्यते कल्प्स्यते कल्प्स्यति । अकल्पिष्यत अकल्प्स्यत । अकल्पिष्ट । अक्लृप्त अक्लृप्साताम् अक्लृप्सत । अक्लृपत ।

(च०) कृपू सामर्थ्ये । दुष्यन्न विभाग्यः । उपधाया सुत्रम्—'कृपो रो लः' ॥ कृप र ल । कृपः धातो रेफस्य लकारो भवति ऋकारस्य लृकारो भवति । अनेन रस्य ल । कल्पत । सिरस्कार 'कृपो रो लः' । अनेन ऋकारस्य लृकार । चक्लृपे । कल्पिषीष्ट । सभाति ऊर्ध्वादिविकल्पो भवति । तदा क्लृप्सीष्ट इति जात । 'उपधाया लघु' अनेन गुण प्राप्ते सति ॥ सूत्रम्—'सिस्पो' ॥ सिस् लोप सिस्पौ तयोः सिस्पा । सिस्पयनिटि परत उपधाया गुणो न भवति । अनेन गुणाभावः । 'कृपो रो लः' । कल्पिष्यते । कल्पिता । कल्प्ता । कल्पिष्यते । कल्प्स्यते । अकल्पिष्यत । अकल्प्स्यत । पाक्षेऽन्यत्र । कल्प्स्यति । अकल्प्स्यत् । अकल्पिष्ट । स्विदुपात्तु 'कृपो रो लः' अक्लृप्त । अक्लृप्साताम् । अक्लृप्सत् । सम्प्रसार्य धातु ॥ २१ ॥

(प्र०) कृपो रो ल इति । आवृत्त्या वाक्यद्वयसिद्धिरित्याह—ऋकारस्यति । तत्कृतम् अलकारादिस्यादिसिद्धि । यदपि कृपूसामर्थ्ये इति पाठेनैव रूपसिद्धि सूत्रा करणाभावे च । कृपन्तिसिद्धिस्तु कृप कृपायामित्यस्माद्वरेषा बाहुलकेति बहुवचनात् सम्प्रसारण तथापि अधीयन्तेति सिद्धम्भवस्तथा च ॥ २१ ॥

व्यथ दु समयचलनयोः । व्यथते । व्यथेत । व्यथताम् । अव्यथत ॥ व्यथतेर्णादौ पूर्वस्य सम्प्रसारण वक्तव्यम् ॥ २२ ॥ विव्यथे । व्यथिषीष्ट । व्यथिता । व्यथिष्यते । अव्यथिष्यत । अव्यथिष्ट ॥

(च०) व्यथ दुःखभयचलनयोः । अकार आत्मनेपदार्थः । व्यथन ॥ 'व्यथतेर्णादौ' ऐ पर पूर्वस्य सम्प्रसारणं वक्तव्यम् इदं सूत्र सूत्रमस्ति । अनेनास्य धातोः सम्प्रसारणं भवति । विव्यथ विव्यथाते विव्यथिरे । व्यथिषीष्ट । व्यथिता । सुव्यकारे । अव्यथिष्ट ॥ २२ ॥

रमु क्रीडायाम् । रमते । रमेत । रमताम् । अरमत ॥ व्याङ्परिभ्यो रमः पन् ॥ २३ ॥ विरमति आरमति परिरमति उपरमति । रेमे ।

रसीष्ट । रन्ता । रस्यते । अरम्त अरसाताम् अरसत । विपूर्व । आद्न्तानाम् इवीट्सकौ । व्यरसीत् व्यरासिष्टाम् ॥

(व०) रमु क्रीडायाम् । रमत । रमेत । रमताम् । अरमत ॥ सूत्रम्—'व्याङ्परिभ्य०' । वि आङ्परि उप एभ्य उपसर्गेभ्यो रमधातो पं परस्मैपदं भवति । विरमति । आरमति । परिरमति । उपरमति । लिट्लकार । 'लोप पचाम्' अनेनैत्वपूर्वलोपौ भवत । रम रेमार रेमिर । 'नश्चापदान्ते झसे' अनत मकारस्यानुस्वारा भवति । रंसी० । रन्ता । लुड्लकार—अरस्त अरंसाताम् अरंसत । यदामं धातुविपूर्वं स्यात् तदात्मनपं भवति । 'आदन्तानाम्' अनेन परस्मैपद सति इट्सकौ भवत । 'व्यरम् स् इ' सि इ- दिप इति स्थित । 'इट इटि' 'स्वर्गे०' स्वादीनाम्' 'नश्चापदान्त'। वावमान' व्यरसार। व्यरंसिष्टाम् । व्यरंसिषु ॥ २३ ॥

ञित्वरा सम्भ्रमे । ञिआवितौ । त्वरते । त्वरेत । त्वरताम् । अत्वरत । तत्वरे । त्वरिषीष्ट । त्वरिता । त्वरिष्यते । अत्वरिष्यत । अत्वरिष्ट । अत्वरिढ्ढ्व–अत्वरिध्वम् ॥

(व०) ञित्वरा सम्भ्रमे । ञिआवितौ । पूर्ववत् तमादय । त्वरते । लिट्लकारे 'द्वित्व' । पूर्वस्य हमादि शेष । तत्वरे । तत्वराते । तत्वरिरे । त्वरिषा० । लुङ्लकार । अत्वरिष्ट अत्वरिषाताम् अत्वरिषत ॥

षह मर्षणे । सहते । सहेत । सहताम् । असहत । सेहे । सहिषीष्ट । सहिता । इटुसह । इति वेट् । हो ढ । तयोर्ध । ष्टुत्वम् । ढलोप ॥

सहिवहोरोदवर्णस्य ॥ सहिवहोरवर्णस्यौकारादेशो भवति ढलोपनिमित्ते ढकारे परे ॥ २४ ॥ सोढा । सहिष्यते । असहिष्यत । असहिष्ट ॥

इति भ्वादिष्वात्मनेपदिन ॥

(व०) षह मर्षण । 'धात्वादे षः सः' अनेन सत्वम् । सहते । लिट्लकार । 'लोप पचाम्' अनेनैत्वपूर्वलोपौ । सह सेहात सेहिर । सहिषीष्ट । सहिता । 'इटुसह०' अनेनास्य वा इट् भवति । इडभावपक्षे सह ता इति स्थित । 'हो ढ' अनेन हस्य ढ । 'तयोर्ध' अनेन तस्य ध 'ष्टुभि ष्टु' 'ढि ढो लोप' पूर्वेण तदा सा ढा इति जाते ॥ सूत्रम्—'सहिवहोरोदवर्णस्य' सहिश्च वह च सहिवहौ तयोः सहिवहो' अवर्णस्य । सहिवहोरवर्णस्य ओकारो भवति ढलोपनिमित्ते ढकारे परे । अनेन ओकार । सोढा सोढारौ सोढार । सहिष्यते । असहिष्यत । असहिष्ट असहिषाताम् असहिषत ॥ २४ ॥

इति भ्वादिष्वात्मनेपदिनः ।

(व०) सहादि । सेहाति इत्यादयः ॥ २४ ॥

इति भ्वादिष्वात्मनेपदप्रक्रिया ।

भ्वादिषूभयपदिन ॥ ३ ॥

अथोभयपदिप्रक्रिया ॥ राजृ दीप्तौ । ऋकार ऋदित्कार्यार्थः । राजति । राजते । राजेत् । राजेत । राजतु । राजताम् । अराजत् । अराजत । रराज । फणादित्वादेत्वाभ्यासलोपौ । रेजतुः-रराजतुः रेजुः-रराजुः । रेजे-रराजे । राज्यात् । राजिषीष्ट । राजिता । राजिता । राजिष्यति । राजिष्यते । अराजिष्यत् । अराजिष्यत । अराजीत् । अराजिष्ट ॥

(बा०) अथ भ्वादिगणस्थोभयपदिनः कथ्यन्ते । राजृ दीप्तौ । उभयपदिनो धातो स्तिबादिप्रत्ययाः उभयथा भवन्ति । इमा परस्मैपदे अप् कर्तरि अनेन अप् प्रत्ययो भवति । ऋकार ऋदित्कार्यार्थः । राजति । राजते । लिट्लकारे फणादीनां अने वा एत्वाभ्यासलोपौ । रराज । रेजतुः । रराजतुः । रेजिथ । रराजिथ । आत्मनेपदे । रेजे । अन्यरूपाण्यनयोर्भवन्ति । राज्यात् । राजिषीष्ट । राजिता । अन्यानि रूपाणि तानि सुगमानि पूर्वोक्तैः सूत्रैः सिद्ध्यन्ति । लुङ्लकारे । अराजीत् । अराजिष्ट अराजिषाताम् अराजिषत ॥

(प्र०) राजृ इति । ऋदित्त्वमुपधाह्रस्वाभावार्थमिति बोध्यम् ।

खन खनने । खनति । खनते । खनेत् । खनेत । खनतु । खनताम् । अखनत् । अखनत । चखान । गमहनेत्युपधालोपः । चख्नतुः चख्नुः । चख्ने । खन्यात् ॥ जनसनखनां झलि ये आकारो वा वक्तव्यः ॥ १ ॥ खायात् खनिषीष्ट । खनिता-खनिता । खनिष्यति-खनिष्यते । अखनिष्यत्-अखनिष्यत । अखानीत् अखनीत् । अखनिष्ट ॥

(बा०) खन खनने । अकार उभयपदार्थः । खनति । खनते । लिट्लकारे । 'गमहनजन' इत्यनेन इति । चखान । चख्नतुः चख्नुः इति जाते गमहनेत्यस्य अनेन आकारो वा भवति । खायात् । खन्यात् ॥ सूत्रम्—'जनसनखनाम्'। जन खन सन एषां धातूनां झलि यकारे परे आकारो वा वक्तव्यः । खायात् खन्यात् । खनिषीष्ट । खनिता । खनिता । लुङ्लकारे 'अतो हलादेर्लघोः' अनेनास्य वा वृद्धिः । अखानीत् अखनीत् । अखनिष्ट अखनिषाताम् अखनिषत ॥ १ ॥

हृञ् हरणे । हरति । हरते । हरेत् । हरेत । हरतु । हरताम् । अहरत् । अहरत । जहार जह्रतुः जह्रुः ॥ ऋदन्तस्य थलो नेट् ॥ २ ॥ जहर्थ । जह्रे । जहृषे । ह्रियात् ॥ उः ॥ ऋकारान्तस्य गुणो न भवति लिङ्सिचोरात्मनेपदेषु ॥३॥ हृषीष्ट । हर्ता । 'हृञ स्वरः' । हरिष्यति हरिष्यते । अहरिष्यत् अहरिष्यत । अहार्षीत् । ह्रस्वो ह्रस्वाङ्गात् । अहृत अहृषाताम् अहृषत ॥

(च०) हृञ् हरणे । ञकार उभयपदार्थः । 'गुण' । हरति । हरत । लिट्लकारे । 'धातोर्नामिनः' । अनेन वृद्धिः । 'कुहोश्चु' । जहार । जह्रतु ॥ 'ऋदन्तस्य' ऋदन्तस्य धातोस्थपि इट् न भवति । 'गुण' जहर्थ । परे 'यमादौ' अनेन ऋकारस्य रिङादेश । ह्रियात् । हृषीष्ट इति जाते । 'गुण' अनेन गुणे प्राप्ते । सूत्रम् 'ऋ' अनिटि सिच्यों परत ऋकारस्य गुणो न भवति । अनेन गुणनिषेध । हृषीष्ट । 'गुण' हर्ता । 'हन ऋस्य' अनेन स्यपि इट् भवति । 'गुण' हरिष्यति । हरिष्यते । लुङ्लकारे । वृद्धि । अहार्षीत् । 'लोपो ह्रस्वाज्झसे' अनेन सलोपो भवति । अहृत अहृषाताम् अहृषत ॥३॥

गुहू संवरणे ॥ गुहेरुपधाया उद्गुणहेतौ स्वरे ॥४॥ गूहति गूहते । जुगूह । जुगुहतु । जुगूहिथ-जुगोढ । जुगुहे-जुगुहिषे । जुगुहिध्वे ध्वे, जुघूढ्वे । गूहिषीष्ट घुक्षीष्ट । गूहिता गोढा । गूहिष्यति घोक्ष्यति ॥
दुहदिहलिहगुहूभ्यः सको लुग्वा वकारतवर्गयोरात्ति ॥५॥ अगूढ-अघुक्षत ॥ आति सकोऽकारलोप स्वरे ॥ ६ ॥ अघुक्षाताम् अघुक्षन्त । अगूढा अघुक्षथा । अघुक्षाथाम् । अघूढ्व-अघुक्षध्वम् । अघुक्षि । अगुह्वहि अघुक्षावहि अघुक्षामहि ॥

(च०) गुहू संवरणे । ऊकार इड्विकल्पार्थ । पूर्ववत् तिबादयस्तआदयश्च प्रत्यया भवन्ति ॥ 'गुहे' इदं सूत्रमस्ति । गुहधातोरुपधाया ऊत् स्याद् गुणहेतौ स्वरे परे । अनेनास्योपधाया ऊत् । गूहति । गूहत । अन्यानि मूले सन्ति तानि सुगमान्येवानेन क्रमेण साध्यानि । लिट्लकारे-जुगूह जुगुहतु जुगुहु । 'गुण' जुगूहिथ । 'ऊदितो वा' अनेनास्येड्विकल्प । गुहेरिति सूत्रे स्वरादौ इति वक्तव्य तेन हलादौ गुणनिमित्ते प्रत्यये परे ऊत् न भवति किन्तु गुणो भवति । जुगुह् थप् इति स्थिते 'गुण' । जुगोह् थप इति जाते । 'हो ढ' तयोर्ध 'ढिढो लोपो०' जुगोढ । आत्मनेपदे । जुगुहे जुगुहाते जुगुहिरे । ऊदितो वा जुगुहिषे । इडभावे जुगुह् से इति जाते । 'हो ढ' 'गादिन्त्रवानाम्' जुघुढ् स इति जाते । 'षढो क. से' अनेन ढस्य क । 'किलात्०' 'कषसंयोगे क्ष' जुघुक्षे । जुगुहिध्वे । जुगुहिध्वे ध्वे, इडभावे 'हो ढ' 'तयोर्ध' 'आदिन्त्रवाना' 'ढि ढो०' जुघूढ्वे । गुह्यात् । 'गुहे' । 'सिसत्ता०' गूहिषीष्ट । इडभावे 'हो ढ' 'आदिन्त्रवानाम्' 'षढो क से' 'किलात् षष०' घुक्षीष्ट ॥ गूहिता । इडभावे गुण 'उपधाया ऊधा' अनेन सूत्रेण भवति । 'हो ढ' 'तयोर्ध' 'ढिढो०' गोढा । आत्मनेपदे । गूहिता । गोढा ॥ गूहिष्यति । इडभावे । 'उपधाया' । 'हो ढ' आदिन्त्रवानाम् 'षढो क. स' 'किलात्०' 'कष स०' घोक्ष्यति ॥ गूहिष्यते घोक्ष्यते ॥ अगूहिष्यत् । अघोक्ष्यत् । अगूहिष्यत । अघोक्ष्यत ॥ लुङ्लकारे । अगूहीत् । इडभावे । 'हशषान्ता०' अनेन सकप्रत्ययो भवति । अघुक्षत् । आत्मनेपदे । अगूहिष्ट । इडभावे अगुह् सक तन् इति स्थिते । 'हो ढ' 'आदिन्त्रवानाम्' अघुढ् स क् तन् इति जाते ॥ सूत्रम्—'दुहदिहलिहगुहूभ्य०' ॥ दुह

लिह् गुह् एभ्यो धातुभ्य सको वा लुग् भवति तकारतवर्गयोरादि आत्मनेपदे ॥ [वग ग्रहणात्] थकारे परेऽपि भवति। अनेन सका वा लुक्। तयोर्ढ ' न्धि लोप दार्घ श्च। अगूढ। लुगभावे अगृक्ष सक तन् इति जात। 'षढो' क से 'किलान्० कर्मधार क्र अघुक्षत। अघुक्ष् आताम् इत्यत्र। 'आत्मने इः' अनेन आकारस्य इकारे प्राप्ते 'आदि०' आति आत्मनेपदे सक. अकारस्य लोपो भवति स्वरे पर। अनेन अकारस्य लोप। अघुक्षाताम् अघुक्षन। अगूढाः अघुक्षथा अघुक्षाथाम् अघूढ्वम् अघुक्षध्वम्। अघुक्षि अगुह्वहि अघुक्षावहि अघुक्षामहि ॥ ६ ॥

दान आर्जवे। गुरुभ्य। यः से। मानादीनां पूर्वस्य दीर्घो वक्तव्य ॥ ७ ॥ दीदांसति दीदांसते। दीदांसेत् दीदांसेत। दीदांसतु दीदांसताम्। अदीदांसत् अदीदांसत। दीदांसांचक्रे दीदांसामास दीदांसांबभूव। दीदां स्यात् दीदांसिषीष्ट। दीदांसिता २। दीदांसिष्यति-दीदांसिष्यते। अदीदां सिष्यत्-अदीदांसिष्यत। अदीदांसीत् अदीदांसिष्ट ॥

(च०) दान आर्जवे। 'गुरुभ्य 'य स। 'मानादीनाम्'। एस धातु 'अन्या पदान्ते। दीदांसति दीदांसेत्। अन्यानि सुगे सन्ति। दादांसांचकार। दादांसांचक्रे। द्वे सूत्रे स्त। अन्यापतः। दीदांस्यात्। दीदांसिषीष्ट। अन्यानि सून सन्ति तानि पूर्वोक्तैरेव सूत्रैः सिध्यन्ति ॥ ७ ॥

शान तेजने। शीशांसति शीशांसते। शानवत् ॥

(च) शान तेजने। 'गुरुभ्य' शीशांसति शाशांसत। शानवत् ॥

भज सेवायाम्। भजति भजते। भजेत् भजेत। भजतु भजताम्। अ भजत् अभजत। बभाज [तृफलभज त्रपश्चेति एत्वपूर्वलोपौ] भेजतु भेजु। बेभि थ बभक्थ। भेजे भेजाते भेजिरे। भज्यात् भक्षीष्ट। भक्ता भक्ता। भक्ष्यति भक्ष्यते। अभक्ष्यत्-अभक्ष्यत। अभाक्षीत् अभाक्ताम् अभाक्षु। अभक्त अ भक्षाताम् अभक्षत ॥

(च०) भज सेवायाम्। भजति भजत। लिट्लकार। भत बपथाया बभाज। 'तृफलभज० अत एत्वपूर्वलोपौ भवत। भेजतु। भेजे। भेजात। 'थ' 'कृ०'। 'व्रत 'वरो' क. स' 'किलात्० 'षढो०' भक्षीष्ट। भक्ता। लुङ्लकारे। 'वादि०' अभाक्षी त्। 'झलात्' अभाक्ताम्। अभक्त। अभक्षाताम् ॥

डुपचष् पाके। डुकारषकारौ कार्यार्थौ। पचति। पचते। पचेत्। पचेत। पचतु। पचताम्। अपचत्। अपचत। पपाच पेचतु पेचु। पेचे। पपक्थ। पचीष्ट। पक्ता। पक्ता। पक्ष्यति। पक्ष्यते। अपक्ष्यत्। अपक्ष्यत। अपाक्षीत्। अपक्त अपक्षाताम् अपक्षत ॥

(च०) डुपचष् पाके । डुकारषकारौ कार्यार्थौ । पचति पचते । लिट्लकारे । 'अत उपधायाः' पपाच । 'लोपः पचाम्०' पेचतुः । पेचे । पचेते । पच्यात् । पच सीष्ट इति स्थिते । 'चो कुः' 'किलात्०' 'कषसंयोगे क्षः' पक्षीष्ट । 'चो कुः' पक्ता । लुङ्लकारे । 'मावनिट्' अपाक्षीत् । 'झसात्' अपाक्ताम् । आत्मनेपदे । अपक्त । अपक्षाताम् ॥

अञ्चु गतौ याचने च । आञ्चीत् ॥

व्यय गतौ । वव्यये । अव्ययीत् ॥

(च०) अञ्चु गतौ याचने च । अञ्चति । लिट्लकारे । आनञ्च । आनञ्चे । 'नो लोपः' अच्यात् । अञ्चीष्ट । अञ्चिता । लुङ्लकारे । आञ्चीत् । आञ्चिष्ट ॥

श्रिञ् सेवायाम् । गुण । श्रयति । श्रयते । शिश्राय शिश्रियतुः । शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिता श्रयिता । श्रयिष्यति–श्रयिष्यते । अश्रयिष्यत्–अश्रयिष्यत ॥ **स्रुश्रिद्रुवा सेरङ् धातोर्द्वित्वं च ॥८॥** अशिश्रियत्–अशिश्रियत ।

(च०) श्रिञ् सेवायाम् । पूर्ववत् तिबादयस्तआदयश्च । 'अप् कर्तरि' 'गुण' 'ए अय्' श्रयति । श्रयते । लिट्लकारे । 'द्विश्च' । पूर्वस्य 'धातोर्नामिनः' अनेन वृद्धिः । शिश्राय । 'नुधातो' शिश्रियतुः—शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिता । अन्यानि मूले सन्ति । लुङ्लकारे ॥ सूत्रम्—'स्रुश्रिद्रुवाम्०' ॥ स्रु श्रि द्रु एतेषां धातूनां सेरङ् प्रत्ययो भवति धातोर्द्वित्वं च भवति । अशिश्रियत् अशिश्रियत ॥ ८ ॥

त्विष् दीप्तौ । त्वेषति–त्वेषते । तित्वेष तित्विषे । त्विष्यात् । त्विक्षीष्ट । त्वेष्टा २ । त्वेक्ष्यति त्वेक्ष्यते । अत्वेक्ष्यत् अत्वेक्ष्यत । हशषान्तात्सक् । अत्विक्षत ॥ **सस्यात्मनेपदे स्वरे टिलोपो वाच्यः ॥९॥** अकार लोपे कृते । 'आतोऽन्तोदनतः' अत्विक्षाताम् अत्विक्षत ।

(च०) त्विष् दीप्तौ । 'उपधाया लघोः' अनेन गुण । त्वेषति । त्वेषते । अन्यानि सुगमानि । लिट्लकारे । 'उपधाया' 'पूर्वस्य' । तित्वेष । तित्विषतुः । आत्मनेपदे । तित्विषे । तित्विषाते । त्विष्यात् । 'षढो कः से' । त्विक्षीष्ट । 'उपधाया । 'ष्टुभिः ष्टुः' । त्वेष्टा । अन्यानि मूले सन्ति । लुङ्लकारे । 'हशषान्तात्सक्' अनेन सक् प्रत्ययो भवति । 'षढो कः से' किलात्०' 'कषसंयोगे क्षः' अत्विक्षत् अत्विक्षताम् अत्विक्षन् । आत्मनेपदे । अत्विक्षत । अत्विक्ष आताम् इति जाते । 'आदाय इः' अनेन आकारस्य इकारे प्राप्ते ॥ सूत्रम्—'सस्या०' ॥ सस्य आत्मनेपदे स्वरे परे सति टेर्लोपो वाच्यः । अनेन अकारस्य लोपः । 'स्वरहीनं०' अत्विक्षाताम् । 'आतोऽन्तोदनतः' अत्विक्षत । अ भासोऽर्थे धातुः ॥ ९ ॥

यज देवपूजासङ्गतिकरणदानेषु । यजति यजते । यजेत् यजेत । यजतु

यष्टास्थ् । अयजत् अयजत । 'वचादौ पूर्वस्य' इयाज । यजां यवराणां वत्र्रूत सम्प्रसारणम् । ईजतुः ईजुः । इयजिथ-इयष्ठ । ईजे । इज्यात् । यक्षीष्ट । यष्टा यष्टा । यक्ष्यति यक्ष्यते । अयक्ष्यत् अयक्ष्यत । अयाक्षीत् अयाष्टाम् अयाक्षुः । अयष्ट अयक्षाताम् अयक्षत । अयष्ठा अयक्षाथाम् ॥ ध्वे च सेर्लोपः ॥ १० ॥ षत्वम् । झषे जशः । ष्टुत्वम् । अयड्ढ्वम् । अयक्षि अयक्ष्वहि अयक्ष्महि ।

(च०) यज देवपूजासङ्गतिकरणदानेषु । यजति यजते । अन्यानि सूत्रे सन्ति । लिट्लकार—यज अप् इति स्थिते । द्वित्वं 'वचादौ पूर्वस्य' अनेन सम्प्रसारणम् । 'अत उपधायाः' इयाज । य यज अतुस् इति जाते । 'वचादौ पूर्वस्य' 'यजां यवराणाम् सवर्णे' ईजतुः । ईजुः । इयजिथ । अत्वतो नित्यानिटः अनेनास्य वा इट् भवति । इयज थप् इति जाते । 'छ्वशसराजभ्राजः' अनेन जस्य षः । 'ष्टुना ष्टुः' इयष्ठ । आत्मनेपदे द्वाभ्यां सूत्राभ्यां सम्प्रसारणं भवति । ईजे इजाते ईजिरे । 'यजाम्' इज्यात् । 'व्रश्चभ्रस्ज' षः । 'षढोः कः सि' । 'लिङ्सिचौ' 'कारम्भणात्' यक्षीष्ट । 'छ्वशसराजभ्राजः' षः 'ष्टुना ष्टुः' यष्टा । अन्यानि लिखितानि सन्ति तस्मात्र लिखितानि मया । तानि पूर्वोक्तैरेव सूत्रैः सिध्यन्ति । लुङ्लकार-'सिचि वृद्धिः' अनेन वृद्धिः । अयाक्षीत् । 'झलो झलि' अयाष्टाम् । अयाक्षुः । आत्मनेपदे । 'झलो झलि' अनेन सेर्लोपः । 'ष्टुना ष्टुः' अयष्ट अयक्षाताम् । अयक्षत । अयज स ध्वं इति जाते । 'ध्वे च सेर्लोपः' अनेन सेर्लोपः । 'छ्वशसराजभ्राजः' षः 'झषां जशोऽन्ते' अनेन षस्य डः । ष्टुत्वम् । अयड्ढ्वम् ॥ १० ॥

टुवप् बीजतन्तुसन्ताने । टु इत् । वपति । वपेत् । उवाप ऊपतुः ऊपुः । उवपिथ-उवप्थ । ऊपे । उप्यात् । वप्सीष्ट । वप्ता २ । वप्स्यति वप्स्यते । अवप्स्यत् अवप्स्यत । अवाप्सीत् अवप्त ।

(च०) टु वप बीजतन्तुसन्ताने । टु इत् । वपति वपते । लिट्लकारे । 'वचादौ' अनेन सम्प्रसारणम् । 'अत उपधायाः' उवाप । द्वे सम्प्रसारणे भवतः 'सवर्णे' । ऊपतुः । 'अत्वत' उवपिथ इडभावे । उवप्थ । ऊपे ऊपाते ऊपिरे । 'यजाम्' । उप्यात् । वप्सीष्ट । वप्ता अन्यानि सूत्रे सन्ति । लुङ्लकारे । 'सावनिटः' अवाप्सीत् । 'झलो झलि' अवाप्ताम् अवाप्सुः । आत्मनेपदे । अवप्त अवप्साताम् अवप्सत ॥

वह प्रापणे । वहति वहते । उवाह ऊहतुः ऊहुः । उवहिथ । हो ढः । तयोर्धः । ष्टुत्वम् । ढलोपः । सहिवहोरोदवर्णस्य । उवोढ । उह्यात् । वक्षीष्ट । वोढा २ । वक्ष्यति वक्ष्यते । अवक्ष्यत् अवक्ष्यत । अवाक्षीत् अवोढाम् । अवोढ अवक्षाताम् अवक्षत ।

(च०) वह प्रापणे । वहति वहते । लिट्लकारे । 'वचादौ पूर्वस्य' । 'अत उप

धाया' उवाह । 'यजाम्' ऊह्यतु । ऊहु । उवहिय । 'अस्वत' । उवद् थप् इति जाते । 'हो ढः' अनेन हस्य ढ । 'तथोर्धः' अनेन थस्य ध । ष्टुत्वम् । ढलोप । 'सहिवहोरा-दवर्णस्य' । उवोढ । ऊहे । ऊहाते । ऊहिरे । 'यजाम्' । उवाद् 'हो ढः' । 'तथोर्धः' । ष्टुत्वम् । ढलोप । 'सहिवहोरादवर्णस्य' वोढा । 'षढो कः से' वक्ष्यति । वक्ष्यते । रूपाणि सन्ति मृग्यं । लुङ्लकार सावकि' । अवाक्षीत् अवोढाम् अवाक्षु । अवाढ अवक्षाताम् अवक्षत ॥

वेञ् तन्तुसन्ताने । वयति वयते ॥ **वेञो णादौ सम्प्रसारणा-भावो वाच्यः ॥११॥** सम्प्रसारणाभावः । ववौ । वादिरवादिरपूर्वकोपि । ववतु ववु । ववे । **वेञो वय् णादौ वा वक्तव्य ॥१२॥** उवाय ॥

ग्रहा क्ङिति च ॥ ग्रहादीनां सम्प्रसारण स्यात् किति ङिति च परे ॥१३॥ इति सम्प्रसारणम् । **यकारस्य सम्प्रसारणनिषेधः ॥१४॥** ऊयतु ऊयु । उवयिय ऊयथु । ऊये ऊयाते ऊयिरे ॥

वयो यस्य किति णादौ वो वा वक्तव्य. ॥१५॥ ऊवतु ऊवु । ऊवे । ऊयात् । वासीष्ट । वाता वाता । वास्यति वास्यते । अवास्यत् । अवास्यत । अवासीत् । आदन्तानाम् इति इट्सकौ अवासिष्टाम् अवास्त ।

(च०) वेञ् तन्तुसन्ताने । ञकार उभयपदार्थः । वयति वयते । लिट्लकारे ॥ सूत्रम्—'वेञ ०' ॥ वेञो धातोर्णादौ परे सम्प्रसारणाभावो वाच्य. । अनेनास्य सम्प्र सारणनिषेधो भवति । 'सन्ध्यक्षराणामा' इति 'आतो णप् डौ' ववौ । 'क्ङोर यणाम् असवर्णस्वरूपकारौ प्राप्तौ । 'गमृदस्वादि' अनेन तन्निषेध । 'आतोऽनपि' ववतु । ववु । आत्मनेपदे । वव ववाते ववरे ॥ सूत्रम्—'वेञो वय् णादौ वा वक्तव्यः' ॥ वय् वय् इति स्थितः । 'द्विश्च 'अचादौ पूर्वस्य' । 'अत उपधाया' । उवाय । वय अतुस् इति स्थित । 'अचादौ-पूर्वस्य' सूत्रम्—ग्रहा क्ङिति च । क्ङितीति सूत्रम् । ग्रह उपादाने । ज्या वयोहानौ । व्यध ताडने । ह्वेञ् आह्वाने । वश्च् छेदने । वस् कान्तावभिलाषे । व्यच् व्याजीकरणे । प्रच्छ ज्ञीप्सायां (पृच्छायाम्) । भ्रस्ज् पाके । प्रश्न दर्शने । इत्येतेषां सम्प्रसारणं यकाररेफवकाराणां किति ङिति च परे सम्प्रसारणं भवति । यकारस्य इकार । वकारस्य उकार । रेफस्य ऋकारः । [लकारस्य लृकारः] सम्प्रसारणम् । अनेन द्वितीये सम्प्रसारणम् । 'यकारस्य सम्प्रसारणनिषेधो वाच्यः । अत्र । ऊयतु ऊयु । उवयिथ । आत्मनेपदे । ऊये ऊयाते ऊयिरे ॥ सूत्रम्—'वय०' ॥ वयो यस्य किति णादौ परे वकारो वा वक्तव्यः । वव्रुः । ऊवतुः ऊवु । आत्मने पदे । ऊवे ऊवाते ऊविरे । 'ग्रहो क्ङिति च' ऊयात् । 'सन्ध्यक्षराणामा' वासीष्ट । वाता । वास्यति मृग्यं सन्ति । लुङ्लकारे । 'आदन्तानाम्' । अवासीत् अवासिष्टाम् अवासिषु । अवास्त । अवासाताम् । अवासत ॥ ११ ॥

(टी०) [illegible] ।

ध्यैञ् चिन्तायाम् । ध्यायति ध्यायते ॥ ध्येषो पादौ मारयम् ॥१६॥
दिध्य द दिध्यतु दिध्यु ॥ अस्यानिष्पततीना पथो निलायिद् ॥१७॥
दिध्येथ दिध्ये । ध्यायात् ध्यासीष्ट । ध्याता ध्याता । ध्यास्यति ध्यास्यते ।
अध्यास्यत् अध्यास्यत । अध्यासीत् । अध्यास्त ।

(सा०) [illegible] । ध्यायति ध्यायते । लिट्लकार ॥ सूत्रम्— [illegible] [illegible] । [illegible] ॥१६-१७॥

ह्वेञ् स्पर्धायाम् । ह्वयति ह्वयते ॥ अह्विकत्स्य ह्वयते समसा
ह्वा ववान्यम् ॥ १८ ॥ जुहाव जुहुवतु जुहुवु । जुहविथ जुहोथ ।
जुहुवे जुहुवाते जुहुविरे । हूयात् । ह्वासीष्ट । ह्वाता ह्वाता । ह्वास्यति ह्वास्यते ।
अह्वास्यत् अह्वास्यत ॥ अस्यतियक्तिकपातिलिपिसिचिह्वय
मीना सेट्तौ वा धात्वा । १९ ॥ अह्वत् अह्वताम् अह्वन् । अह्वास्त
अह्वासाताम् अह्वासत ।

(सा०) ह्वेञ् स्पर्धायाम् । ह्वयति । ह्वयते । लिट्लकार ॥ सूत्रम्—'अभ्यस्त [illegible] [illegible] । [illegible] जुहाव जुहुवतु जुहुवु । जुहविथ जुहोथ । जुहुवे जुहुवाते जुहुविरे । [illegible] । हूयात् । ह्वा [illegible] । [illegible] लुङ्लकार अह्वासीत् । सूत्रम्—'अस्यतिवक्तिख्याति [illegible] अस्यति वक्ति ख्याति लिपि सिचि ह्वयति एतेभ्यो धातुभ्यो [illegible] वा धात्वा । [illegible] अह्वत अह्वताम् अह्वन्त । अह्वास्त ॥१९॥

(प्र०) [illegible] इति [illegible] । [illegible] — [illegible] [illegible] इति [illegible] प्रयोगाः । [illegible] । ह्वेञ् एव [illegible] [illegible] स्यात् ।

ऋत जुगुप्सायां कृपायां च । ऋतेरीयङ् स्यार्धेऽनापि तु वा ॥२०॥
ऋतीयते । ऋतीयाञ्चक्रे । आनर्त । ऋतीयिष्यते । आर्तीत् । आर्तीयिष्ट ॥
इति [illegible] ॥ १ ॥ इति [illegible] धातव ॥

(च०) ऋत जुगुप्सायां कृतायां च ॥ सूत्रम्—'ऋते ०' ॥ ऋतेर्धातोरीयङ् प्रत्ययो भवति स्वार्थे । अनपि तु वा भवति । ऋतीयते । ऋतीयांचक्रे । इयङ्भावे । आनर्त । ऋतीयिष्यते । आर्तीत् । आर्तीयिष्ट ॥ इति भ्वादिगणम्योभयपदिन समाप्ता ॥ इत्यविकरणा भ्वादयो धातवः ॥ २० ॥

(प्र०) ऋतेरिति । ऋति सौत्रस्तस्मादीयङ् स्यात् स्वार्थे अनपि तु वा । तथा तुरिति धातुत्वम् । अनुदात्तेदित्यात्मने पदम् ॥ २० ॥

इति प्रसादटीकायां भ्वादिप्रक्रिया ॥ ३ ॥

अदादिषु परस्मैपदिनः ॥ ४ ॥

इदानीं लुग्विकरणाददादेर्गणात्कर्तरि तिबादयो वर्ण्यन्ते ॥ अद् भक्षणे ॥ अप्कर्तरि—**अदादेर्लुक्** ॥ अदादेर्गणादुत्पन्नस्यापो लुग्भवति ॥ १ ॥ खसे चपा झसानां । अत्ति अत्तः अदन्ति । अत्सि अत्थ अत्थ । अद्मि अद्वः अद्मः । अद्यात् । अत्तु अत्तात् अत्ताम् अदन्तु ॥ **झसाद्धेर्हिः** ॥ झसादुत्तरस्य हेर्धिर्भवति ॥ २ ॥ अद्धि अत्तात् अत्तम् अत्त । अदानि अदाव अदाम ॥ **अदो दिस्योरडागमो वक्तव्यः** ॥ ३ ॥ आदत् आद ॥ जघास । गमां स्वरे । खसे चपा० । घसादेः ष, क्ष । जक्षतुः जक्षुः । जघसिथ । पक्षे—आद आदतुः आदुः । आदिथ । अद्यात् । अत्ता । अत्स्यति । आत्स्यत् ॥ **सिसयोरदेर्घस्लृ लिटि तु वा** ॥ ४ ॥ लृदित्त्वादङ् । अघसत् अघसताम् अघसन् ॥

(च०) इदानीं लुग्विकरणाददादेर्गणात् कर्तरि तिबादयो वाच्यन्ते । अद् भक्षणे । पूर्ववत् तिबादय 'अप्कर्तरि' सूत्रम्—अदादेर्लुक् ॥ अप्कर्तरि लुक् दिप् दि० । अदादेर्धातोर्गणादुत्पन्नो योऽप्प्रत्ययः तस्य लुग्भवति । अनेन सर्वत्रापि लुक् । तत्र वर्तमाने तिप् तस् अन्ति सिप् थस् इत्यतपु । 'खसे चपा०' इति दस्य तकार । अत्ति अत्तः अदन्ति । अद्यात् । अत्तु अत्तात् अत्ताम् अदन्तु । अद् हि इति स्थिते । सूत्रम्—'झसाद्धेर्हिः' ॥ झसात् धि हेः । झसादुत्तरस्य हि इति वचनस्य धिरित्यादेशो भवति । तावन्मात्रे कृते तु न भवति । 'स्वर०' अद्धि अत्तात् अत्तम् अत्त । उत्तमपुरुष सर्वत्र । 'स्वर०' अदानि अदाव अदाम । अनद्यतनेऽप् । प्रत्ययलुकि कृते । 'दिबादावट्' 'स्वरादेः' इत्यडागमद्वये च कृते उभयत्रापि 'सवर्ण०' ॥ सूत्रम्—'अदो दिस्यो०' ॥ अदो धातोः परयोर्दिप् सिप् इत्यनयोः अडागमो भवति । अनेनाडागमः दिस्यादादौ । 'स्वर०' 'वामने०' आदत् । तकारान्ते । 'खसे०' आत्ताम् आदन् । आदः आत्तम् आत्त । आदम् आद्व आद्म । अद् अप् इति स्थिते । सूत्रम्—'सिसयोः०' ॥ सिसयोः परतः अद्धातोर्घस्लृ इत्यादेशो

भवति पक्षान्ते वा भवति । लुकार लदित् कार्यार्थः । घस् घस् इति स्थिते । द्विश्च 'पुरोऽचु' । 'सपानौ अवपाः' । 'अत उपधायाः' जघास । जघस् अतुस् इति स्थिते । गमां स्वरे' अनेनोपधाया लोपः । स्त्ससः अनेन घस्य कः । 'घमाद् षः' । अनेन षत्वम् । 'कपसयोगे०' जक्षतुः । जक्षुः । जघसिथ । पक्षे । आद आदतुः आदुः । अघात् । घस्से० अत्ता । अन्यानि सन्ति सूत्र । लुङ्लकारे । 'मिसयोः' इन्स्वान्ड । अघसन् अघसताम् अघसन् ॥ ४ ॥

(प्र०) अन्तेरिति । अद् आदिर्यस्य स अदादिस्तस्मादादरयान्मध्ये इत्यर्थः । स्यैतद्गणनामनिर्वर्तिधातुसमुदायोऽनापि गृह्यते । तस्य धातुद्भूतावयवमेस्यान्य पर्यायत्वेन विवक्षणादद्रादेरित्येकवचनम् ॥ १ ॥

भसादिहैरिति । अत्र स्थानिवद्भावेन लातेर्हि द्वित्वेऽपि सद्वत्वादिति न्यायेन न भिरादः ॥ २ ॥

प्सा भक्षणे । प्साति प्सातः प्सान्ति । प्सायात् प्सायाताम् प्सायुः । प्सातु-प्सातात् प्साताम् प्सान्तु । अप्सात् अप्साताम् ॥ आदन्तविद्द्विषामन उस् वा वक्तव्य ॥ ५ ॥ उस्यालोपः । अप्सुः अप्सान् । पप्सौ पप्सतुः पप्सुः । पप्सिथ पप्साथ । प्सेयात्-प्सायात् । प्साता । प्सास्यति । अप्सास्यत् । आदन्तानाम् इटीट्सकौ । अप्सासीत् अप्सासिष्टाम् ॥

(च०) प्सा भक्षणे । प्साति प्सातः प्सान्ति । अन्यानि सूत्र सन्ति तानि सूत्र मान्यत । लङ्लकारे । अप्सात् अप्साताम् । अप्सा अन् इति स्थिते ॥ सूत्रम्— 'आदन्तविद्द्विषाम०' ॥ आदन्तः विद् द्विष एतयो धातूनां अन उस वा वक्तव्य । 'उस्यालोप' । अप्सुः । अप्सान् । 'द्विश्च' 'पूर्वस्य' 'हसादि' आतो णव औ पप्सौ । पप्सतुः । अस्वत' पप्सिथ—पप्साथ । 'संयोगादे०' प्सेयात्—प्सायात् । प्साता । लुङ्लकारे आदन्तानाम्' अप्सासीत् ॥ ६ ॥

मा माने । माति । मायात् । मातु । अमात् अमाताम् अमुः—अमान् । ममौ । ददेरे । मेयात् । माता । मास्यति । अमास्यत् । अमासीत् ॥

(च०) मा माने । माति । लिट्लकारे । ममौ । 'दादरे' मयात् । माता । 'आद-दन्तानाम्' अमासीत् । अमासिष्टाम् अमासिषुः । सम्प्राप्तम् ॥

या प्रापणे । याति । यायात् । यातु । अयात् । अयाताम् । अयुः-अयान् । ययौ । यायात् । याता । यास्यति । अयास्यत् । अयासीत् ॥

(च०) या प्रापणे । याति । ययौ । अयासीत् ॥

वा गतिगन्धनयोः । वाति । वातिस्म ॥

(च०) वा गतिगन्धनयोः । वाति । अयं धातुर्गन्धिवत् इयः । न कश्चित् विशेषः ॥

रा दाने । रदत् ॥ —

(च०) रा दाने । राति । अयमपि तद्वत् ॥

ला दानग्रहणयो । लाति । ललौ । तद्वत् ॥

(च०) ला दानग्रहणयोः । लाति । लली । अलासीत् ॥

द्रा कुत्सायां गतौ च । द्राति । दद्रौ । द्रायात्–द्रेयात् । द्राता । द्रास्यति । अद्रास्यत् । अद्रासीत् ॥

(च०) द्रा कुत्सायां गतौ च । द्राति । 'र' दद्रौ । 'संयोगादेः' द्रायात्–द्रेयात् । अद्रासीत् ॥

ख्या प्रकथने । ख्याति । ख्यायात् । ख्यातु । अख्यात् । चख्यौ । ख्यायात्–ख्येयात् । ख्याता । ख्यास्यति । अख्यास्यत् । पुषादित्वाद् ङ । आतोऽनपि अख्यत् ॥

(च०) ख्या प्रकथने । ख्याति । 'द्विरुक्तं' 'हयानाम्' चख्यौ । 'संयोगादेः' ख्यायात्–ख्येयात् । अस्य धातोर्लुङ्यङ्कार । पुषादित्वात् 'लिट्युपादेः' । 'आतोऽनपि' अनेनाकारस्य लोप । अख्यत् अख्यताम् अख्यन् ॥

पा रक्षणे । पाति । पायात् । पातु । अपात् । पपौ । पाता । पास्यति । अपास्यत् । अपासीत् ॥ भा दीप्तौ । भाति । बभौ । अभासीत् ॥ ष्णा शौचे । स्नाति । सस्नौ । स्नायात्–स्नेयात् । अस्नासीत् ॥

(च०) भा दीप्तौ । भाति । 'पानादौ' बभौ । अभासीत् अभासिष्टाम् अभासिषुः । [illegible] ॥

"य । अन्यत् पूर्ववत् । सुमनायते । लिट् । कासादि० । सुमनायांचक्रे । लुङ् । अ[illegible] मनायिष्ट ॥ १६–१७ ॥

नाम्न आचारे क्विप् वाच्य. ॥१८॥ कृष्ण इव आचरति कृष्ण ति । **क्विपो लोपः ॥ १९ ॥**

(च०) सूत्रम्—'नाम्न ०' ॥ पश्चात् आचारऽर्थे क्विप् प्रत्ययो वाच्य । [illegible] इव आचरतीति क्विप् प्रत्यय । क्विपो लोप ।' क्विप्प्रत्ययस्य लोपो भवति । [illegible] धातु । पश्चात् लोप कार्य । 'अप्कर्तरि । कृष्णति । लिट् । 'कासादि०' । कृष्णां चकार । कृष्णतात् । मिमता० । कृष्णिता । लुङ् । अकृष्णात् ॥ १८–१९ ॥

आचार उपमानात् ॥ कर्मधारयोरुपमानात् य प्रत्ययो भवति आचारेऽर्थे ॥२०॥ अकारस्येकार । पुत्रीयति शिष्यमुपाध्याय । प्रासा दीयति कुट्याम् ॥

(च०) सूत्रम्—'आचार उपमानात्' ॥ आचारे उपमानात् । कर्मधारय [illegible] उपमानात् आचारे य प्रत्ययो भवति । अकारस्य इकार । पुत्र इव आचरति । तत्र य प्रत्यय । अकारस्य इकार । अन्यत्कार्यं तु पूर्ववत् । पुत्रीयति शिष्यमुपाध्याय ॥ [illegible] [illegible] इव आचरतीति य प्रत्यय । अकारस्य इकार । प्रासादीयति कु[illegible] [illegible] । लिट् । प्रासादीयांचकार । लुङ् । अप्रासादीयात् ॥ २० ॥

(प्र०) पुत्रीयति शिष्यमुपाध्याय । पुत्रविषयक यज्ज्ञानं व्यवहारो वा त[illegible] [illegible] [illegible] यज्ज्ञानं व्यवहारो वा तदनुकूल वर्तमानकालिक [illegible] [illegible] [illegible] । प्रासादीयति कुट्याम् । प्रासादाभिप्रायं यज्ज्ञानं व्यवहारो वा त[illegible] [illegible] यज्ज्ञानं व्यवहारो वा तदनुकूल[illegible] नाश्रया वर्तमानकालिक व्यापार ॥

भृशादिभ्योऽभूततद्भावे यङ् वाच्य. ॥२१॥ अभृश भृशो भवति भृशायते । श्यामायते । इत्यादि ॥

(च०) सूत्रम्—'भृशादिभ्य ०' ॥ भृशादिभ्य [illegible] [illegible] [illegible] [illegible] । [illegible] भवति । यङ् च भृशायते । लिट् । [illegible] । [illegible] [illegible] ॥ अश्याम श्यामा भवतीति यङ् । य [illegible] । लिट् [illegible] । [illegible] ॥ २१ ॥

(प्र) [illegible] । श्यायतेति । [illegible] [illegible] [illegible] [illegible] [illegible] । इयति । [illegible] । [illegible] [illegible] ।

[illegible] ॥२२॥ [illegible] ॥ सुखादिभ्यः [illegible] [illegible] । [illegible] ॥ इति नामधातुप्रक्रिया ॥ २२ ॥

(च०) सूत्रम्—'अश्ववृषयो०' ॥ अश्ववृषयोः शब्दयोः मैथुनेच्छायां च प्रत्ययो भवति । सुगागमश्च भवति । अश्वमात्मन इच्छतीति । धः । सुगागमः । अश्वस्यति । अश्वस्यांचकार । आश्वसात् । वृषमात्मन इच्छतीति । च सुक् । वृषस्यति गौः । पुरुष इव आचरतीति । च सुक् । पुरुषस्यति कामातुरा ।। सूत्रम्-'सुखादिभ्य ०' ॥ सुखादिभ्यः शब्देभ्यो ज्ञापनार्थो णङ्प्रत्ययो भवति । सुखं ज्ञापयतीति । णङ् । 'दे सुखायते । सुखाय चक्र । असुखायिष्ट । इत्यादीनि ।। २२-२३ ।।

इति नामधातुप्रक्रिया समाप्ता ।। २१ ।।

(प्र०) अश्ववृषयोरिति । अश्ववृषभेच्छा यदा मैथुनार्था न स्यात्तदाऽऽत्मार्था तदैव सुगित्यर्थः । अन्य तु इति वामो वृषस्य-न्ताम्' इत्यादिप्रयोगदर्शनात् परित्यक्तप्रकृत्यर्था मैथुनेच्छैवार्थ —इत्याहु । अत एव वृषस्यन्ती तु कामुकेति कदाऽपि स्वरमतः संगच्छ त । वृषा च मुष्कः पुरुषः । यथा च- मुष्कः मूषिक अण्डे मुष्के वृषभे वृषः' इत्यमरः । कामुकी वृषम अब्धुमिच्छतीत्यर्थः ।। २२ ।।

इति प्रसा° नामधातुप्रक्रिया ।। २१ ।।

आत्मनेपदप्रक्रिया ॥ २२ ॥

अथात्मनेपदव्यवस्था ॥ **निविशादे** ॥ नीत्यादुपसर्गपूर्वकाद्विशादे-र्धातोरात्मनेपदं भवति ॥१॥ निविशते ॥

(च०) अथात्मनेपदप्रक्रिया कथ्यते । सूत्रम्—'निविशादेः' ॥ निपूर्वो विश आदिर्यस्य स निविशादिः तस्मात् निविशादेः । निपूर्वस्य विशादेर्धातोः परस्मैपदिनोऽपि आत्मनेपदं भवति । विश प्रवेशने । निपूर्व । अनेन सूत्रेण आत्मनेपदं भवति । त इत्यादयः प्रत्यया भवन्ति । निविशते । तु तेर अनेनाश्च क प्रत्ययो भवति ॥ १ ॥

(प्र) निविशादेरिति । अत्रापि नेः प्रकारः । निविशते यदि शुकनिलाय० इति धातुः । नि किं ? प्रविशति । अर्थवद्ग्रहणलक्षणप्रतिपत्तिकपरिभाषाभ्यां नेरुपसर्ग स्य ग्रहणम् । तनेह न । मधुनि विशन्ति भ्रमराः । कथं तर्हि इत्युक्त्वा मैथिली भर्तुरङ्के निविशती भवान् इति अत्र तु भक्तानि निविशतीति पाठ्यम् । न च पक्षस्कारपक्षे स्वदङ्क निविशतीति पाठ प्यर्याय इति वाच्यम् । युष्मदस्मदोः सामानाधिकरण्य वि त्वं करोति भवान् करोति-त्यादिप्रयोगस्यापि बहुलशब्दात् साधुत्वापत्तेः । वा लिप्साया मित्या वक्ष्यमाणत्वात् ॥ १ ॥

विपराभ्यां जेः । २ ॥ विजयते । पराजयते ॥

(च) सूत्रम् विपराभ्याम्० ॥ विपराभ्यामुपसर्गाभ्यां परस्य जयतेर्धातो रात्मनेपदं भवति । विजयते । पराजयते । इत्युदाहरणम् ॥ ॥

(प्र) विपरा भ्यामिति । अत्र विपरेत्युपसर्गाभ्यां परस्य भ्य

ग्रहणम् । तेन 'पराजयति सेना' इत्यत्र आबन्तेन उत्कृष्टा इत्यर्थकेन पराशब्देन योगो न । पक्षिवाचकस्य विहङ्गस्य सम्भवेऽपि परस्परसाहचर्यादुपसर्गग्रहणं व्याख्येयम् इति कैयटः ॥ २ ॥

समो गमादिभ्यः ॥ ३ ॥ सङ्गच्छते ॥

(च०) सूत्रम्—'सम ०' ॥ समुपसर्गात् गमादिभ्यो धातुभ्य आत्मनेपदं भवति । सङ्गच्छते ॥ ३ ॥

गमः परौ सिस्यौ आत्मनेपदे वा कितौ वाच्यौ ॥४॥ लोपस्त्वनुदात्ततनाम् । संगसीष्ट सङ्गंसीष्ट । लोपो ह्रस्वाज्झसे । समगत समगस्त ॥ ऋच्छ गतीन्द्रियमूर्तिभावेषु । समृच्छते ॥ संपृच्छते ॥ स्वृ शब्दोपतापयोः । संस्वरते । संस्वृषीष्ट संस्वरिषीष्ट । समियृते । संशृणुते । संवित्ते संविदाते ॥ **विदोऽन्तो वा रुट् आति ॥५॥** संविद्रते संविदते । संपश्यते । गम् ऋच्छ पृच्छ स्वृ ऋ श्रु विद दृश' एते गमादयः ॥

(च०) सूत्रम्—'गमः०' ॥ गम्धातोः परौ सिस्यौ वा कितौ वाच्यौ आत्मनेपदे । तस्मादाशिषि मकारस्य लोपो वा भवति । संगसीष्ट । संगंसीष्ट । लुङ् । 'लोपो ह्रस्वाज्झसे' । अनेन सकारस्य वा लोपः । समगत । समगस्त । इत्यादीनि रूपाणि । आदिशब्दात् । समृच्छते । संपृच्छते । संशृणुते । समियृते । इत्यादीनि । स्वृ शब्दोपतापयोः । संस्वरते । 'स्वरत्यादेर्विकल्पः' । 'उः' अनेन गुणनिषेधः । संस्वृषीष्ट । संस्वरिषीष्ट ॥ संवित्ते । 'विदोऽन्तो वा रुट् आत्मनेपदे' । संविद्रते । संविदते । गमादयो मूले उक्ताः ॥ ४-५ ॥

आङो दोऽनास्यविहरणे ॥ आङ्पूर्वाद्ददातेरात्मनेपदं भवति मुखप्रसारणव्यतिरिक्तेऽर्थे ॥ ६ ॥ आदत्ते ॥ 'मुखं व्याददाति' अत्र न ॥

(च०) सूत्रम्—'आङो दोऽनास्यविहरणे' ॥ आङः दः अनास्यविहरणे ॥ आस्यस्य मुखस्य विहरणं प्रसारणं आस्यविहरणम् । न आस्यविहरणमनास्यविहरणं तस्मिन् अनास्यविहरणे । आङ्पूर्वात् ददातिधातोरात्मनेपदं भवति मुखप्रसारणव्यतिरिक्ते । आदत्ते ॥ मुखप्रसारणे तु 'मुखं व्याददाति' अत्रात्मनेपदं न भवति ॥ ६ ॥

क्रीडोऽनुसम्परिभ्यश्च ॥ अनुसम्परिभ्यः क्रीडतेरात्मनेपदं स्यात् ॥७॥ क्रीड विहारे शब्दे च । अनुक्रीडते । संक्रीडते । परिक्रीडते ॥ शब्दे तु न ॥ ८ ॥ संक्रीडति चक्रम् ॥

(च०) सूत्रम्—'क्रीडोऽनुसम्परिभ्यश्च' ॥ क्रीडः अनुसम्परिभ्यः च ॥ अनुसम्परिभ्य उपसर्गेभ्यः क्रीड विहार इत्यस्य धातोरात्मनेपदं भवति । क्रीड विहार

शब्दे च । अनुक्रोशते । संक्रोशते । परिक्रोशते । इत्युदाहरणानि । शब्दे तु नात्र
भवति संक्रोशति चक्रम् अत्र न भवति ॥ ७–८ ॥

समवप्रोपविभ्यः स्थः ॥ एभ्यस्तिष्ठतेरात्मनेपदं भवति ॥ ९
सन्तिष्ठते । अवतिष्ठते । प्रतिष्ठते । उपतिष्ठते । वितिष्ठते ॥

(च०) सूत्रम्— समवप्रोपविभ्य स्थः ॥ समवप्रोपविभ्य स्थ ॥ सम् अव
प्र उप वि एभ्य उपसर्गेभ्य स्था गतिनिवृत्तौ इत्यस्य धातोरात्मनेपदं भवति । सन्तिष्ठते
अवतिष्ठते । प्रतिष्ठते । उपतिष्ठते । वितिष्ठते । इत्युदाहरणानि ॥ ९ ॥

आङो यमहनः ॥ आङ्परयोर्यमहनोरात्मनेपदं भवति ॥ १० ।
आयच्छते । आहते ॥ **अकर्मकयोरात्मार्थकर्मकयोर्वा ॥ ११ ॥**
आयच्छते पाणिम् । आहते शिर । अन्यथा पराशिर आयच्छति । अनु
माहन्ति ॥

(च) सूत्रम्— आङो यमहन० ॥ आङ यमहन ॥ आङ्परयोर्यमहनोर्धा
त्वोरात्मनेपदं भवति । आयच्छते । आहते ॥ अकर्मकयो० अकर्मकयोरात्मार्थकर्म
कयोर्यमहनोर्वा आत्मनेपदं भवति । आयच्छते पाणिम् । आहते स्वशिर । अन्यथा
परशिर आयच्छति । अनुमाहन्ति ॥ १०–११ ॥

हन्तेरात्मनेपदे सि किद्वा वाच्यः ॥ १२ ॥ 'लोपस्त्वनु–'
आहत ॥ **हन्तेः स्याशीर्षोदायोर्वधादेश आति वा ॥ १३ ॥**
अवधिष्ट ॥

(च०) सूत्रम्— हन्ते ॥ हन्तधातोरात्मनेपदे सि किद्वाच्य । लोपस्त्वनु०
इत्यनेन नकारलोप । आहत । हन्ते स्याशीर्षोर्वधादेश आत्मनेपदे वा भवति ।
अवधिष्ट । इत्यादीनि ॥ १२–१३ ॥

उद्विभ्यां तपः ॥ उद्विभ्यां परस्याकर्मकस्यात्मार्थकर्मकस्य वा
तपतेरात्मनेपदं भवति ॥ १४ ॥ उत्तपते । वितपते पाणिम् । अन्यथा महीं
वितपन्त्यर्क ॥

(च) सूत्रम्— उद्विभ्यां तपः ॥ उद्विभ्यां तप । उद् वि एताभ्यामुपसर्गा
भ्यां तपतेरकर्मकस्य च आत्मनेपदं भवति । उत्तपते वितपते स्वपाणिम् । अन्यथा महीं
वितपन्त्यर्क । अत्र न भवति ॥ १४ ॥

उदश्चरस्त्योग ॥ उत्पूर्वाच्चरतेस्त्योगेऽथ आत्मनेपदं भवति । १५ ।
धर्ममुच्चरते त्यजन्त्येव ॥ त्योग किम् । मन्त्रमुच्चरति ॥

(च) सूत्रम्— उदश्चरस्त्योग ॥ उद् चर त्योग । उत्पूर्वा

धातोस्त्यागऽर्थे आत्मनेपदं भवति । धर्ममुच्चरते त्यजति इत्यर्थः । त्यागाभावे नत्र मुच्चरति ॥ १५ ॥

समस्तृतीयायुक्ताच्च ॥ सपूर्वाच्चरतेस्तृतीयान्तेन पदेन युक्तादात्मनेपदं भवति ॥१६॥ अश्वेन सञ्चरते ॥

(च०) सूत्रम्—समस्तृतीयायुक्ताच्च' ॥ सम तृतीयायुक्तात् । सम्पूर्वाच्चरधातोस्तृतीयान्तपदयुक्तात् आत्मनेपदं भवति । चर गतिभक्षणयोः । संपूर्वस्यास्य आत्मनेपदम् । सञ्चरते अश्वेन । अश्वेन इति तृतीयान्तमुपपदम् । अन्यथा सञ्चरति अश्वः । अत्र न भवति ॥ १६ ॥

व्यवपरिभ्यः क्रीञः ॥ एभ्य क्रीणातेरात्मनेपदं भवति ॥ १७ ॥ विक्रीणीते । अवक्रीणीते । परिक्रीणीते ॥

(च०) सूत्रम्—'व्यवपरिभ्यः०' ॥ व्यवपरिभ्य क्रीञ । द्विपदम् ॥ वि अव परि एभ्य उपसर्गेभ्य डुक्रीञ्धातोरात्मनेपदं भवति । उदाहरणानि । विक्रीणीते । अवक्रीणीते परिक्रीणीते ॥ १७ ॥

शप उपालम्भे ॥ उपालम्भेऽर्थे शपतेरात्मनेपदं भवति ॥ १८ ॥ वाचा शरीरस्पर्शनमुपालम्भः । विप्राय शपते । विप्रशरीरं स्पृशति । शपथं करोतीत्यर्थः ॥ उपालम्भे किम् । दुष्टं शपति । शापं ददातीत्यर्थः ॥

(च०) शप उपालम्भे आक्रोशे च ॥ 'शप उपा०' वाचा शरीरस्पर्शनमुपालम्भः । विप्राः (विप्राय) शपते । शपथं करोति इत्यर्थः । सत्यमनद्दिति कथयति । उपालम्भे किम् । दुष्टं शपति । शापं ददाति । अत्रात्मनेपदं न भवति । शत्रुं शपति । आक्रोशति इत्यर्थः ॥ १८ ॥

(प्र०) शप उपालम्भ इति । उपालम्भ शपथः । स च त्वत्पादौ स्पृशामि न त्वं मया हतमित्यर्थं वाचा शरीरस्पर्शनम् । विप्राय शपत इति । त्वत्पादौ स्पृशामि नैव मया हतमित्यर्थं शपथेन विप्रस्य स्वाभिप्रायं प्रकाशयतीत्यर्थः । सकल शपामि यदि किञ्चिदपि स्मरामि इत्यत्र तु स्वाशयप्रकाशनमात्रं विवक्षितं न तु स्पर्शमात्रमप्यत्र ॥ १८ ॥

ज्ञाश्रुस्मृदृशां सन्तानामात् ॥ सप्रत्ययान्तानामेषामात्मनेपदं भवति ॥१९॥ सं से । जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ॥

(च०) सूत्रम्—'ज्ञाश्रुस्मृदृशां सन्तानामात्' ॥ सप्रत्ययान्तानामेषां धातूनां आत्मनेपदं भवति । तेषां साधनं तु पूर्वं कृतम् । स० प्रत्यय । ... इत्यादि । जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते । इत्यादीन्युदाहरणानि ॥ १९ ॥

अनुपसर्गाज्ज्ञानातेरात्मगामिनि कर्मे आत्मनेपदं वाच्यम् ॥२०॥ गां जानीते ॥

(च०) सूत्रम्— अनुपसर्गाज्ज्ञः० । अनुपसर्गाद् जानातेर्धातोरात्मगामिनि क्रियाफले सति आत्मनेपदं वाच्यम् । अनेनात्मनेपदम् । गां जानीते इत्युदाहरणम् ॥२०॥

कर्मव्यतिहारेऽन्यत्र हिंसादेरात् ॥ कर्मव्यतिहारेऽर्थे वाच्ये हिंसार्थान् गत्यर्थान् पठजल्पहसान् विहाय इतरेतरान्योन्यपरस्परपदाभावे सर्वेभ्यो धातुभ्य आत्मनेपदं भवति ॥२१॥ परस्परमेकक्रियाकरणं कर्मव्यतिहारः । श्रद्धा आस्तिक्यबुद्धिः । श्रद्धा व्यतिभवते । परस्परं भवतीत्यर्थः । व्यतिस्ते । विवदन्ते वादिनः । अन्यत्रेति किम् । व्यतिघ्नन्ति । व्यतिगच्छन्ति । व्यतिपठन्ति । व्यतिजल्पन्ति । व्यतिहसन्ति । इतरेतरं परस्परं अन्योन्यं वा व्यतिघ्नन्ति ॥

(च०) सूत्रम्—'कर्मव्यतिहारेऽन्यत्र हिंसादेरात्' ॥ कर्मव्यतिहारः कर्मणां व्यतिहारः विनिमयः परावृत्तिर्वा कर्मव्यतिहारः तस्मिन् कर्मव्यतिहारे । अन्यत्र हिंसादेः आत् । कर्मव्यतिहारेऽर्थे वाच्यमाने सति हिंसार्थान् गत्यर्थान् धातून् पठजल्पहसान् विहाय इतरेतरान्योन्यपरस्परपदाभावेऽपि सर्वेभ्यो धातुभ्य आत्मनेपदं भवति । परस्परमेकक्रियाकरणं कर्मव्यतिहारः । श्रद्धा आस्तिक्यबुद्धिः । श्रद्धा व्यतिभवते परस्परं भवतीत्यर्थः । अस भुवि । व्यतिस्ते ॥ विवदन्ते वादिनः । इत्युदाहरणानि ज्ञातव्यानि । अन्यत्रेति किम् । व्यतिघ्नन्ति । व्यतिगच्छन्ति । व्यतिपठन्ति । व्यतिजल्पन्ति । व्यतिहसन्ति । एषु आत्मनेपदं न भवति सूत्रे निषेधात् । इतरेतरं अन्योन्यं परस्परं व्यतिघ्नन्ति । इत्यत्रापि आत्मनेपदं न भवति ॥ २१ ॥

(प्र०) कर्मव्यतिहार इति । व्यतिभवत इति । अन्यस्य योग्यं भवनमन्यः करोतीत्यर्थः । परस्परकरणमपि कर्मव्यतिहारः । सम्प्रहरन्ते राजान इति यथा । अत्र च यदानेकस्य कर्तुः सह विवक्षा तदा द्विवचनं च भवति । सह विवक्षाभावे त्वेकवचनमपि । तत्र कर्मव्यतिहारस्यानेककर्तृत्वादेकवचनं न सम्भवतीति न भ्रान्तव्यम् ॥२१॥

भुजो भोजने आत्मनेपदं वाच्यम् ॥२२॥ भुङ्क्ते ओदनम् । भुनक्ति महीं नृप ॥ इत्यात्मनेपदव्यवस्थाप्रक्रिया ॥ २२ ॥

(च०) सूत्रम्— भुजो भोजने० ॥ भुज पालनाभ्यवहारयोः । अस्य भोजनेऽर्थे आत्मनेपदं भवति । उदाहरणम् । इदरं ओदनं भुङ्क्ते । भोजनाभावे तु भुनक्ति महीं नृपः । अत्रात्मनेपदं न भवति ॥२२॥ इत्यात्मनेपदप्रक्रिया समाप्ता ॥ २२ ॥

(प्र०) भुजो भोजन इति । उपभोगस्यापि भोजनत्वात्, भुङ्क्ते श्रियं दुःखानि भुङ्क्ते इत्यत्रात्मनेपदं सङ्गच्छते । अत्र भुजेरुपभोगोऽर्थः । उपभोग इत्युपलक्षणम् । तेन "बुभुजे पृथिवीपालः पृथिवीमेव केवलम्" इत्यत्रात्मनेपदसमर्थनम् । आत्मसात्करणस्यापि भोजनत्वम् । भुजोऽनवने इति पाणिनिसूत्रं यत्र । तत्र विभुजति पाणिमित्युदाहरणम् ॥ २२ ॥

भावकर्मप्रक्रिया ॥ ३२ ॥

अथ भावकर्मणोर्यकि प्रक्रिया ॥ **यक् चतुर्षु** ॥ धातोर्भावे कर्मणि च यक् प्रत्ययो भवति चतुर्षु पूर्वोक्तेषु परतः ॥ १ ॥ ककारो गुणप्रतिषेधार्थः ॥ **आद् भुवि कर्मणि** ॥ अकर्मकेभ्यो भुवि भावे सकर्मकेभ्यश्च कर्मण्यात्मनेपदं भवति ॥ २ ॥ ये कर्मनिरपेक्षां क्रियामाहुस्ते अकर्मकाः भूएधृआस् शीङ्प्रभृतयः । तदुक्तम्—

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥

(च०) अथ भावकर्मणोर्यकि प्रक्रिया कथ्यते । भावश्च कर्म च भावकर्मणी तयोः भावकर्मणोः । बालबोधनार्थमयं समासः । सूत्रम्—'यक् चतुर्षु' ॥ यक् चतुर्षु । धातोः भावे कर्मणि च चतुर्षु पूर्वोक्तेषु तिबादिषु परेषु यक्प्रत्ययो भवति । ककारो गुणप्रतिषेधार्थः, भयकि इति सूत्रविशेषणाय । अनेन धातोर्यक् । यकि सति पदनियममाह—'आद् भुवि कर्मणि' ॥ आत् भुवि कर्मणि । अकर्मकस्य न विद्यते कर्म यस्य ते अकर्मकाः तेभ्यः अकर्मकेभ्यो धातुभ्यो भुवि भावार्थे ॥ अकर्मकाः लज्जासत्तार्थवाचकाः । तथा सकर्मकेभ्यो धातुभ्य आत्मनेपदं भवति । अयं भावः । भावोक्तौ तृतीयान्तः कर्ता । अकर्मकधातोरात्मनेपदं भवति । दशानामपि विभक्तीनां प्रथमपुरुषैकवचनम् । कर्मोक्तौ च तृतीयान्तः कर्ता प्रथमान्तं कर्म । क्रियायाश्चात्मनेपदं भवति । विभक्तिचतुष्टयेऽपि यक्प्रत्ययान्तमेव । कर्मणः एकवचने सति क्रियाया एकवचनम् कर्मणो द्विवचने सति क्रियाया द्विवचनम् । कर्मणो बहुवचने सति क्रियाया बहुवचनं भवति । इति ज्ञातव्यम् ॥
'कर्तरि प्रथमा यत्र द्वितीया तत्र कर्मणि । धातोरुभे पदे स्यातामेतत् कर्तृरि लक्षणम् ॥
कर्तरि तृतीया यत्र प्रथमा तत्र कर्मणि यक्प्रत्ययान्त विज्ञेयं धातोश्चात्रात्मनेपदम् ॥
भावे कर्ता तृतीयान्तः कर्म चात्र भवेन्नहि । क्रियायाश्चैकवचनं भवत्यत्रात्मनेपदम् ॥'
अथाकर्मकान् धातूनाह—'अकर्मकेति' । ये धातवः कर्मवाञ्छारहितां क्रियां कथयन्ति ते अकर्मकाः । ते धातवः 'लज्जासत्ता०' अनेन श्लोकेन कथिताः । ततोऽन्येऽपि ज्ञातव्याः ॥ भावस्तु एक एव ॥ भावलक्षणमाह—'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' ॥ १—२ ॥

(प्र०) आद् भुवीति । भवनं भूः तस्यां भुवि । शुद्धो धात्वर्थः साध्यरूपो भावः यस्य तु सिद्धरूपो भावः इति विवेकः । तत्र सिद्धरूपो भावो द्रव्यवत्प्रकाशते लिङ्गसंख्यादीन् गृह्णाति । अतो द्विवचनादि । साध्यरूपस्य तु असत्त्वरूपत्वान्न संख्यायोगः । उक्तं च— क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्तिता । सिद्धतां द्रव्यमिच्छन्ति सर्वैर्लिङ्गैर्न पठ्यते ॥ इति । कर्म तु पारिभाषिकमेव । पुनर्भावग्रहणात् । एकाश्रयं कर्म । एतस्य च धातुनान्तरसाराऽ्यमात्माख्यातार्थे । अथ सकर्मकादिति भाव

[illegible] ॥ १ ॥

भावकर्मणोः [illegible] भवति [illegible] । भूयते भवता । भूयेत । [illegible] । अभूयत । बभूवे ॥

(च॰) [illegible] भवति ॥ [illegible] भवति । [भूयते भूयते भूय [illegible] इत्यादीनि रूपाणि भवन्ति भूयते भूयमानाम् भूयते । भूयताम् भूयताम् भूयन्ताम् । [illegible]] (१) भावतो भूयते । [illegible] रूपाणि भवन्ति ॥

स्वरान्मानाहन्ग्रहदृशां च भावकर्मणोः सिसतासीस्यपामिड् वा इणवच्चास्य ॥ २ ॥ [illegible] धातुनां नित्य[illegible] स [illegible] णित् । अनिटां धातूनां विकल्पेन इट् स नित्य णित् ॥ [illegible] इट् स च नित्य णित् । [illegible] सट् । [illegible] स च वा णित् । णित्वाद्वृद्धि । भाविषीष्ट । णित्वाभावे । भवि षीष्ट । भाविता भविता । भाविष्यते भविष्यते । अभाविष्यत अभविष्यत ॥

(च॰) सूत्रम्—स्वरान्मानाम॰ ॥ [illegible] धातूनां [illegible] च धातूनां भावकर्मणोः [illegible] ॥ [illegible] धातूनां नित्यमिट स विकल्पेन णित् । अनिटां धातूनां विकल्पेन इट् भवति स नित्यं णिद् भवति । [illegible] । [illegible] । णिद् । [illegible] इट् । स णिद् वा भवति । णित्वाद् वृद्धि [illegible] । भाविषीष्ट । णिद् [illegible] । गुण । [illegible] अव् । भविषीष्ट [illegible] । भाविता भाविताहे [illegible] । णित्वाभावपक्षे । [illegible] भविता [illegible] भाविष्यते भाविष्येते भाविष्यन्ते इत्यादीनि । [illegible] भाविषीष्ट [illegible] । अभाविष्यत अभविष्य[illegible] ॥

इणो गच्छति [illegible] ॥ धातोर्भावे कर्मणि च इण् प्रत्यया [illegible] ॥ [illegible] । गम्यते ॥ इणसंयोगे [illegible]

[illegible]

षाताम् अभविषाताम् अभाविषत अभविषत । इ त्यादीनि रूपाणि भवन्ति तानि ग्रन्थ-विस्तर भयान्नैवात्र प्रकाश्यन्ते । विस्तरं बुद्धिविकस्वाः ॥ ४-५ ॥

अकर्मकोऽपि कदाचित् सकर्मकतामनुभवति ॥ उक्तं च—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारपरिहारप्रहारवत् ॥
धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा ॥

सुखमनुभूयते स्वामिना । अन्वभावि भवो भवता । अन्वभाविषाताम्-अन्वभविषाताम् । अन्वभाविषत—अन्वभविषत ॥

(च०) अकर्मकोऽपि धातुः कदाचिदुपसर्गवशात् सकर्मकतामनुभवति । उक्तं च उपसर्गेणेति-उपसर्गेण धात्वर्थो ऽन्यत्र नीयते । अन्यस्मिन्नर्थे प्राप्यत इत्यर्थः । उदाहरणानि उत्तरार्धे सन्ति । अन्यान्यपि ज्ञातव्यानि । कश्चिदुपसर्गो धात्वर्थं बाधते । कश्चिदुपसर्गो धात्वर्थमनुवर्तते । कश्चिदुपसर्गस्तमेवार्थं विशिनष्टि । अनया रीत्योपसर्गाणां त्रिधा गतिरस्ति । 'भू सत्तायाम्' अयं धातुर्यद्यपि अकर्मकः तथापि यदानुपूर्वः तदा सकर्मकः । उदाहरणम् । सुखमनुभूयते स्वामिना । अन्वभावि भवो भवता । इत्यप्युदाहरणम् ॥

(प्र०) अकर्मकोऽपीति । यो यदा कर्मक्रियावाच्यप्यनेकार्थत्वात्सकर्मकक्रियामुत्थापयति तदा तदर्थपरत्वे सकर्मको भवति । तत्परत्वञ्च तन्त्र्यापसर्गेण द्योत्यत इत्युपसर्गेणेत्यादिरुक्तं । न तु सोपसर्ग एव सकर्मकः । उपसर्गस्तु द्योतक एव । सकर्मकाकर्मकधातुलक्षणमाह — फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥" तथाच-फलव्यधिकरणव्यापारबोधकत्वं सकर्मकत्वम्, फलसमानाधिकरणव्यापारबोधकत्वमकर्मकत्वम्, इति ।

शीङोऽयङ् किति ङिति ये वक्तव्यः ॥ ६ ॥ शय्यते । शिश्ये । शायिषीष्ट । शयिषीष्ट । अशायि । अन्वशायि । अन्वशायिषाताम् अन्वशयिषाताम् अन्वशायिषत अन्वशयिषत ॥

(च०) शीङ् स्वप्ने । 'यक् चतुर्षु' । अनेनास्य यक्प्रत्ययः । शीयते । इति स्थिते ॥ सूत्रम्—'शीङोऽयङ्' ॥ शीङ अयङ् ॥ शीङ्धातोः यकि परे सति अयङादेशो भवति ङकारोऽन्त्यादेशार्थः । तेनकारस्य भवति । ङकार उच्चारणार्थः । शय्यते शुद्धम् । कचिन्नाचार्या इदं सूत्रं न पठन्ति । किन्तु शीङः सर्वत्र गुणो भवति । अनेन कित्यपि गुणः—कचित्स्वरवद्यकारः—अनेन यकारस्य स्वरवत्त्वात् पूर्वं अय । शय्यते शय्येते शय्यन्ते । शय्येत शय्येयाताम् शय्येरन् । शय्यताम् शय्येताम् शय्यन्ताम् । दिवादावट् । अशय्यत अशय्येताम् अशय्यन्त । इत्यादीनि रूपाणि भवन्ति । लिट्यकारः । द्वित्वं । शुधातोः 'ह्रस्वः' अनेन पूर्वस्य ह्रस्वो भवति । शिश्ये शिश्याते शिश्यिरे । इत्यादीनि । 'स्वरा

स्ता० अनेनेट् इटो वा णिलुक् । धातोर्नामिन. अनेन वृद्धिः । ए अय् । शायिषीष्ट । एवं सर्वत्र वा णित्वं प्रथमस्य धातोः णित्वाभावपक्षे—गुण । ए अय् । शायिषीष्ट । शायिता । शयिता । शायिष्यते । शयिष्यते । दिवादावट् । [अशायिष्यत अशयिष्यत ॥ लुङ्प्रकारे— इण्तन्यक्ति । अनेन इण् वृद्धिः । अत्रापि अशायिषाताम् अशयिषाताम् अशायिषत अशयिषत ।] (१) यदा अनुपूर्वोऽयं तदा अन्वशायि । इत्यादीनि भवन्ति ॥ ६ ॥

ये कर्मसापेक्षां क्रियामाहुस्ते सकर्मकाः । यकि । घटः क्रियते देवदत्तेन । 'त्वं दुःखी क्रियसे रागे विरागे सुखयद् क्रिये ॥ चक्रे । कारिषीष्ट । कृषीष्ट । कारिता कर्ता । कारिष्यते करिष्यते । अकारिष्यत अकरिष्यत । अकारि अकारिषाताम् अकृषाताम् । अकारिषत अकृषत ॥

(च०) सकर्मकधातुलक्षणमाह—ये धातवः कर्मसापेक्षां क्रियामाहुस्ते सकर्मकाः । यथा कारस्यान्य । डुकृञ् करणे । अस्य धातोः यक् प्रत्ययः अनेन यक् । अयकि० अनेन ऋकारस्य रि । क्रियते । क्रियेते । क्रियताम् । अक्रियत । लिट्प्रकारे । द्विः । र । उदाहरणम् । ऋरम् चक्रे चक्राते चक्रिरे । इत्यादीनि । 'स्वरान्ता० अनेन इट् । अयं धातुरनिट् तस्माद् विकल्पेन इट् । नित्यं णित् । इटो णित्वात् धातोर्नामिन अनेन वृद्धिः । कारिषीष्ट । इडभावे—गुण० गुणनिषेधः । कृषीष्ट । कारिता कारितारौ कारितारः । इडभावे—गुण । कर्ता कर्तारौ कर्तारः । कारिष्यते करिष्यते कारिष्यन्ते । णित्वाभावपक्षे । इटोऽभावे अनेन इट् । गुणः । करिष्यते करिष्येते करिष्यन्ते । अकारिष्यत अकारिष्येताम् अकारिष्यन्त । णित्वाभावपक्षे—अकरिष्यत अकरिष्येताम् अकरिष्यन्त । इत्यादीनि रूपाणि भवन्ति । लुङ्प्रकारे— इण् तन्यक्ते रि । 'धातोर्नामिन । आप अनेन तथा आप । अकारि अकारिषाताम् अकृषाताम् । अकारिषत अकृषत । इत्यादीनि । एवमनेन त्वं दुःखी क्रियसे । रागेस्त्वं दुःखी क्रियसे । विरागे सुखयद् क्रिये ॥

चिञ् चयने । चीयते । चिच्ये । चायिषीष्ट चेषीष्ट । चायिता चेता । चायिष्यते चेष्यते । अचायिष्यत-अचेष्यत । अचायिषाताम् अचेषाताम् ॥

(च) चिञ् चयने । यक् प्रत्यय । [illegible] प्रत्यय । य । अनेन दीर्घ । चीयते चीयेते चीयन्ते [illegible] चीयेताम् चीयन्ताम् [illegible] चीयताम् चीयेताम् चीयन्ताम् । । अचीयत अचीयेताम् अचीयन्त लिट् द्विः [illegible] धातोः । [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

तना लोप । 'दिवादावट्' । अघायि अघायिषाताम् । इड्भावपक्षे । अघासाताम् । अघायिषत अघेषत । इत्यादीनि ॥

दादेरि । दीयते । दद ददाते ददिरे ॥ आतो युक् ॥ आकारान्ता- द्धातोर्युगागमो भवति ञिति णिति च परे ॥ ७ ॥ दायिषीष्ट दासीष्ट । दायिता दाता । दायिष्यते दास्यते । अदायि अदायिषाताम् । 'दाधास्थामिस्वं' । अदिषाताम् ॥

(च०) दा दाने । 'यक् चतुर्षु' । अनेन यक् । दादेरि । य' अनेन ई । दीयते दीयेते दीयन्ते । दीयेत दीयेयाताम् दीयेरन् । दीयताम् दीयेताम् दीयन्ताम् । 'दिवादावट्' अदीयत अदीयेताम् अदीयन्त । लिट् । द्वित्व । 'ह्रस्व' । 'आतो ऽनपि' । दद ददाते ददिरे । दा लोप इति सिध्यति । स्वरान्तानां० अनेन इट् इटो णित्त्वम् ॥ सूत्रम्—(आतो युक्) आत युक् ॥ आकारान्ताद्धातोर्युगागमो भवति ञिति णिति च परे । अनेन युक् । उकार उच्चारणार्थः । ककारः क्रियार्थः । दायिषीष्ट ॥ इड्भावपक्षे । दासीष्ट । दायिता दायितारौ दायितारः । इड्भावपक्षे । दाता दातारौ दातारः । दायिष्यते दास्यते । 'दिवादावट्' । अदायिष्यत अदायिष्येताम् अदायिष्यन्त । इड्भावपक्षे । अदास्यत अदास्येताम् अदास्यन्त । लुङ् । इण् । युक् । तना लोप । अदायि अदायिषाताम् । दाधास्थाम्०' अनेन इड्भावपक्षे इकार । अदिषाताम् । अदायिषत । अदिषत । इत्यादीनि ॥ ७ ॥

धीयते । अधायि अधायिषाताम् अधिषाताम् ॥

(च०) डुधाञ् धारणपोषणयोः । 'यक् चतुर्षु' अनेन यक् । 'दादेरि' अनेनाकारस्य इकारः । 'य' अनेन पूर्वस्य दीर्घः । धीयते । धीयेत । धीयताम् । अधीयत । इत्यादीनि भवन्ति । लिट्लकार । 'द्वित्व' । 'ह्रस्व' । झपानाम्०' । 'आतो ऽनपि' अनेनाकारलोप । दधे दधाते दधिरे । स्वरान्तानाम्०' । इटो णित्त्वम् । 'आतो युक्' । युक् । धायिषीष्ट । इड्भाव । धासीष्ट । धायिता धाता । धायिष्यते धास्यते । दिवादावट् । अधायिष्यत अधास्यत । लुङ्लकार । इण् । युक् । तना लोप । अधायि अधायिषाताम् । इड्भावपक्षे । 'दाधास्था० अधिषाताम् । अधायिषत अधिषत । इत्यादीनि ॥

स्थीयते । अस्थायि ॥

(च०) ष्ठा गतिनिवृत्तौ । सत्वम् । यक् दादेरि' । य । स्थीयते । स्थीयेत । स्थीयताम् । अस्थीयत । लिट्लकार तु साधनं पूर्ववत् । तस्थे तस्थाते तस्थिरे । स्वरान्तानाम् । आतो युक् स्थायिषीष्ट । इड्भाव । स्थासीष्ट । स्थायिता स्थाता । स्थायिष्यते स्थास्यते । अस्थायिष्यत अस्थास्यत । लुङ्लकार । इण् । युक् । तना लोप अस्थायि अस्थायिषाताम् । इड्भाव । दाधास्थाम्० अनेनत्वम् । अस्थिषाताम् । इत्यादीनि ॥

स्तूयते । तुष्टुवे । अस्तावि अस्ताविषाताम् अस्तोषाताम् हरिहरौ भक्तेन ॥

([illegible]) [illegible] ॥

हन्यते । हनो घ्ने । जघ्ने । घानिषीष्ट हसीष्ट ॥ हन्तेः स्यादार्धधातुके भावकर्मणोर्वधादेशो वक्तव्य आत्मने वा ॥ ८ ॥ वधिषीष्ट । घानिता हन्ता । घानिष्यते हनिष्यते अघानिष्यत अहनिष्यत । अघानि अघानिषाताम् ॥ हन आत्मनेपदे सिच् किद्वाच्यः ॥ ९ ॥ [illegible] अहसाताम् अघानिषत-अहसत । अवधि अवधिषाताम् ॥

([illegible]) [illegible] ॥

ग्रहो लिङि च गृह्यते । जगृहे । ग्राहिषीष्ट । 'ग्रहो ग्रहाम्' ग्रही [illegible] ग्राहिता ग्रहीता । ग्राहिष्यते ग्रहीष्यते । अग्राहिष्यत अग्रहीष्यत । अग्राहि अग्राहिषाताम् अग्रहीषाताम् ॥ दृश्यते । ददृशे । दर्शिषीष्ट-दृक्षीष्ट । [illegible] द्रष्टा । [illegible] द्रक्ष्यते । अदर्शि अदर्शिषाताम् अदृक्षाताम् ॥ [illegible] पक्ता । [illegible] । [illegible] ॥

[illegible]

अनिष्टत्वात् । ग्रहीता । ग्राहिष्यते ग्रहाप्यते । 'दिवादावट्' अग्राहिष्यत अग्रहाप्यत । इत्यादीनि ॥ लुङ्लकारे । इण् । वृद्धि । तना लोप । अग्राहि अग्राहिषाताम् अग्रहापाताम् । अग्राहिषत अग्रहापत । इत्यादीनि भवन्ति ॥ दृशिर् प्रेक्षणे । 'यक् चतुः' अनेन यक् । दृश्यते दृश्यते दृश्यन्ते । इत्यादीनि । दृश्येत दृश्येताम् अदृश्यत । इत्यादीनि । लिट्लकारे । 'द्वित्वं' । 'र' । ददृशे ददृशाते ददृशिरे । 'स्वरान्तानाम्०' अनेन इट् । इटो णित्त्वम् । णित्त्वाद्वृद्धेरप्राप्तत्वाद् गुण । दर्शिषीष्ट । इडभावपक्षे । 'छश' अनेन षत्वम् । 'षढो क स' । षत्वम् । कषसंयोगे० । सिस्यो' अनेन गुणनिषेधः । दृक्षीष्ट । अन्यानि सुगमानि । दर्शिता । इडभावे षत्वम् । 'गुण' । 'रारो ह्रस०' द्रष्टा । दर्शिष्यते द्रक्ष्यते । 'दिवादावट्' अदर्शिष्यत अद्रक्ष्यत । इत्यादीनि रूपाणि भवन्ति । लुङ्लकारे । इण् । गुण । तना लोप । अदर्शि अदर्शिषाताम् । इडभावपक्षे । सिस्यो' अनेन गुणनिषेध । षत्वम् । अदृक्षाताम् । अदर्शिषत अदृक्षत । इत्यादीनि भवन्ति ॥ डुपचष् पाके । 'यक् चतुःषु' अनेन यक् । पच्यते । पच्येत । पच्यताम् । दिवादावट्' । अपच्यत । इत्यादीनि रूपाणि भवन्ति तानि सुगमानीति । लिट्लकारे । 'द्वित्व' । 'पूर्वस्य' । लोप पचाम्०' अनेनैत्वपूर्वलोपौ भवत । पेचे पेचाते पेचिरे । इत्यादीनि । 'चो कु' षत्वम् । कषसयोगे क्ष । पक्षीष्ट । 'चो कुः' । पक्ता पक्तारौ पक्तार । पक्ष्यते अपक्ष्यत । लुङ्लकारे । इण् । 'अत उपधायाः' अनेन वृद्धि । तना लोप । अपाचि अपक्षाताम् अपक्षत । इत्यादीनि रूपाणि भवन्ति ॥

तनोतेर्नो वा ॥ तनोतेर्नकारस्य वा आकारो भवति यकि परे॥१०॥
तायते तन्यते । तेने । अतानि । अतानिषाताम्-अतनिषाताम् ॥

(च०) तनु विस्तारे । 'यक् चतुःषु' अनेन यक् ॥ सूत्रम्—'तनोतेर्नो वा' ॥ तनोते न वा अन्ययम् । तनोतेर्धातो नकारस्य वा आकारो भवति यकप्रत्यये परे सति । 'सवर्णे०' तायते । तायेत । तायताम् । अतायत । आत्वाभावपक्षे । तन्यते । तन्येत । तन्यताम् । अतन्यत । इत्यादीनि रूपाणि भवन्ति । लिट्लकारे 'द्वित्व' । 'पूर्वस्य' । लोप पचाम्० अनेनैत्वपूर्वलोपौ भवत । तेने तेनाते तेनिरे । इत्यादीनि । 'स्वरान्तानाम्० । अस्य सूत्रस्य व्याख्यानात् । इट् । वा णित् । तानिता । 'अत उपधाया' अनेन वृद्धि । णित्त्वाभावपक्षे । तनिता । तानिष्यते । तनिष्यते । 'दिवादावट्' । अतानिष्यत अतनिष्यत । इत्यादीनि रूपाणि भवन्ति । लुङ्लकारे । इण् वृद्धि । तना लोप । दिवादावट् । अतानि अतानिषाताम् अतनिषाताम् । अतानिषत अतनिषत । इत्यादीनि रूपाणि भवन्ति ॥ १० ॥

भञ्जो आमर्दने । ना लोप । भज्यते । अकित्त्वात् बभञ्जे । भङ्क्षीष्ट । भङ्क्ता । भङ्क्ष्यते ॥ **भञ्जेरिणि वा नलोपो वाच्य** ॥ ११ ॥
अभाजि अभञ्जि ॥

(च०) भञ्जो आमर्दने । यक् चतुःषु अनेन यक् । ना लोपः' अनेन नकारस्य

लोपः । भज्यते । भज्येत । भज्यताम् । दिवादावट् । अभज्यत । लिट्कारः । अकि-त्वाद्मकारस्य लोपो न भवति । द्विरुक्तादिकं कार्यम् । सवानाम्०' । 'पूर्व ऽ० । बभञ्जे बभञ्जाते बभञ्जिरे । इत्यादानि । भञ्जिसाद इति स्थितः । चो कुः' । सधे०' पत्वम् । कषसंयोगे क्षः । भङ्क्षाद । च्चो कुः' । च्वजेः०' । भङ्क्ता । भङ्क्ष्यते । 'दिवादावट् अभ-ङ्क्ष्यत । लुङ्कारः । इणन्त्य०' अनेन इण् ॥ सूत्रम्— भञ्जे०' ॥ भञ्जेर्धातोरिणि वा नकारस्य लोपो वाच्यः अनेन वा नकारस्य लोपः । अत उपधायाः । इति कारः । अभाजि । नकारलोपाभावपक्षे । अभञ्जि अभङ्क्षाताम् अभङ्क्षत । इत्यादानि ॥ ११ ॥

शम उपशमे । शम्यते मुनिना । धातो प्रेरणे । मितां ह्रस्व । ञे । शम्यते मोहो हरिणा । शमयांचक्रे ॥ ज्यन्तानां मितामिणि णिदिटि च वा वृद्धिर्वाच्या णिदिटि ञिलोपश्च ॥ १२ ॥ अशमि अशामि अशामिषातां अशमिषाताम् । णिद्वादिडभावपक्षे अशमयिषाताम् ॥

(च०) शम उपशमे । धातोः प्रेरणे अनेन ञि । अत उपधायाः अनेन वृद्धिः । मितां ह्रस्वः अनेन ह्रस्वः । 'यक् चतुर्षु' अनेन यक् । ञे अनेन ञिलोपः । शम्यते मोहो हरिणा । शम्यते शम्यताम् । दिवादावट् अशम्यत । कासादि अनेन आम् । अन्यत्सर्वं पूर्ववत् । शमयांचक्रे ॥ सूत्रम्—'ज्यन्तानां०' ॥ ज्यन्तानां मितां धातूनां इणि णिदिटि च वा वृद्धिर्वाच्या । णिदिटि ञेर्लोपो वाच्यः । अनेन ञेर्लोपः । वा वृद्धिः । शामिषाद । वृद्ध्यभावपक्षे । शमिषाद । शामिता शमिता । शामिष्यते शमि-ष्यते । अशामिष्यत अशमिष्यत । लुङ्कारः । इणन्त्य०' अनेन इण् । ञेर्लोपः । वा वृद्धिः । अशामि अशमि । अशामिषाताम् । अशामिषत अशमिषत । इत्यादीनि रूपाणि भवन्ति तानि अनेनैव क्रमेण साध्यानि ॥ १२ ॥

(प्र०) ज्यन्तानामिति । कथं तर्हि—"हर्षदेवकामि पर्कक्रम एवं" इति नैषध काव्ये आइप, उच्यते, निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते इति प्राकृत णिजन्त इण् वाच्य ॥ १२ ॥

गुणोऽर्तिसंयोगाद्योः । अर्यते स्मर्यते ॥

(च०) ऋ गतौ । यक् चतुर्षु अनेन यक्प्रत्ययः । गुणोऽर्तिसंयोगाद्योः अनेन गुणः । अर्यते । अर्येत । अर्यताम् । दिवादावट् । स्वरादीनाम् अनेन द्विताद्यऽऽगमः । सवर्णे० । आर्यत । इत्यादीनि रूपाणि भवन्ति लिट्कारः साधवं पूर्ववत् । आर आरतुः आरुः । इत्यादीनि । आरिषाद अर्षाद । आरिता अर्ता । आरिष्यते आरिष्यत । लुङ्कारः । आरि आरिषाताम् । इत्यादीनि । एवं स्मृ स्मरणे । यक् । गुणोऽर्ति० अनेन गुणः । स्मर्यते । स्मर्येत । स्मर्यताम् अस्मर्यत । लिट्कारः । सस्मरे । स्मारि षीद स्मृषीष्ट । स्मारिता । इत्यादीनि ॥ लुङ्कारः । अस्मारि । अस्मारिषाताम् अस्मृषाताम् । इत्यादीनि ।

यत्कर्मगुणसयोगात्कर्तृत्वेन विवक्ष्यते स कर्मकर्ता । तदुक्तम्—

'क्रियमाण तु यत्कर्म स्वयमेव प्रसिद्ध्यति ।

सुकरै स्वगुणैर्यस्मात्कर्मकर्तेति तद्विदु ॥

तत्राप्येतदेवोदाहरणम् ॥ **कर्मवत्कर्मणा तुल्यक्रियः** । कर्मस्था क्रियया तुल्यक्रिय कर्ता कर्मवद्भवति ॥ १३ ॥ लूयते केदार स्वयमेव । लुलुवे । अलावि अलाविषाताम् ॥ पच्यते ओदन स्वयमेव ॥ भिदि विदारणे भिद्यते काष्ठ स्वयमेव । अभेदि ॥

(च०) अथ कर्मोक्ताधिकार कर्मकर्तृलक्षण तस्योदाहरणं चाह यत्कर्मेति । यत्कर्मापि गुणयोगात् वस्तुमध्यस्थितसुकरतादिमार्दवादिगुणस्य संयोगात् उपचारात्कर्तृत्वेन विवक्ष्यते स कर्मकर्तेत्युच्यते । यत 'क्रियमाण तु यत्कर्म स्वयमेव प्रसिद्ध्यति ॥ सुकरै स्वैर्गुणैर्यस्मात् कर्मकर्तेति तद्विदुः ॥' तत्रापि एतदेव कप्रत्ययान्तस्यवोदाहरणमुच्यते ॥

सूत्रम्—कर्मवत्कर्मणा तुल्यक्रियः ॥ कर्मवत् कर्मणा तुल्यक्रिय । कर्मस्था क्रिया तया क्रियया तुल्यक्रिय कर्ता कर्मवद् भवति । अनेन कर्तु कर्मत्वं भवति । लूञ् छेदने । देवदत्त केदारं लुनाति । स एव वदति नाहं लुनामि किन्तु केदार स्वयमेव लूयते । लूञ्धातो यक्चतुषु' अनेन यक्प्रत्ययो भवति । लूयते । लूयेते । लूयताम् । दिवादावत् । अलूयत । लिट्लकार । 'द्विश्च । 'नुधातो ' । लुलुवे लुलुवाते लुलुविरे । स्वरान्तानां०' अनेन इट । इण् वा णित्त्वम् । णित्त्वात् वृद्धिः । लाविषीष्ट लविषीष्ट । णित्त्वाभावपक्षे । इदं रूपम् । लाविता लविता । लाविष्यते लविष्यते । दिवादावत्' अलाविष्यत अलविष्यत । लुङ्लकार । इण् वृद्धि । तना लोप । अलावि । अलाविषाताम् अलविषाताम् । अलाविषत अलविषत । इत्यादीनि रूपाणि भवन्ति ॥

डुपचष् पाके । पच् त । यक्प्रत्ययो भवति । कश्चिद् वक्ति-देवदत्त ओदन पचति । एवं वदति नाह पचामि किन्तु ओदन स्वयमेव पच्यते । अत्र ओदनस्य स्वयमेव पाकसिद्धौ सामर्थ्यं ततः कर्मकर्तृत्वम् । कर्म एव कर्ता जातः । न पुनस्तृतीयान्त कर्ता भवति । पच्यते । पच्येते । पच्यताम् । अपच्यत । लिट्लकार । 'द्विश्च' 'पूर्वस्य०' । 'एत्व पचो०' । पेचे पेचाते पेचिरे । 'चो कु' । पक्षीष्ट । 'कषसंयोग०' । पक्षीष्ट । पक्ता । पक्ष्यते । अपक्ष्यत । लुङ्लकार । इण । 'अत उपधाया ' । तना लोपः' । अपाचि अपक्षाताम् अपक्षत । इत्यादीनि ॥ भिदिर् विदारणे । कश्चिदेवं वक्ति देवदत्तः काष्ठं भिनत्ति । स एवं वक्ति नाहं भिनद्मि किन्तु काष्ठं स्वयमेव भिद्यते' । यक्चतुर्षु' । भिद्यते । भिद्येते । भिद्यताम् । अभिद्यत । लिट्लकार । द्विश्च 'पूर्वस्य०' । बिभिदे बिभिदाते बिभिदिरे । भित्सीष्ट । भेत्ता । भेत्स्यते । अभेत्स्यत । लुङ् । इण् । गुणः । तना लोप । अभेदि अभित्साताम् अभित्सत ॥ १३ ॥

(प्र०) यत्कर्मगुणेति । अयमर्थः यदा लोकाव्यापारविवक्षा नास्ति किन्तु कर्मव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञा लभन्ते । साध्वसिश्छिनत्ति । काष्ठानि

पचन्ति । स्थाली पचति । पच्यत ओदनेन । भिद्यते काष्ठेन । तनोत्के कर्मकर्त्तरि यथा दिग्विवदिः । पच्यते ओदनः । भिद्यते काष्ठम् । कर्म्मवत्कर्म्मणेति । वाकरण किम् धर्म् । यथा कर्मकर्त्त्वे प्रयुज्यमाना महत्वाद्रः महत्त्वविस्तर्यये वदति तथा कर्मस्तु च्यमानेऽपि कर्म्मवदित्यफलाभाव सत्ये कर्म्मणा तुल्यक्रियः कर्त्ता कर्म्मस्थुच्यमाने कर्म्मसञ्ज्ञक इत्यर्थः स्यात् । तथा हि सति अकर्म्मकत्वगामावादात लकारो न स्यात् किं तु कर्म्मणि स्यात् ॥ १३ ॥

दुहस्नुनमां कर्मकर्तरि यगिणौ न ॥ १४ ॥ दुग्धे स्नुते गौः स्वयमेव । नमते दण्डः स्वयमेव । अदुग्ध । अस्नोष्ट । अस्नाविष्ट । अनस्त ॥

(प्र०) सूत्रम्—'दुहस्नुनमां० ॥ दुह स्नु नम् एतेषां धातूनां कर्मकर्तरि यगिणौ न भवत यथा धातूनां रूपाणि एववत् ज्ञेयानि । आत्मनेपद । दुग्धे दुहाते दुहते । इत्यादीनि रूपाणि ज्ञेयानि ॥ स्नुधातोः । स्नुते स्नुवाते स्नुवते । इत्यादीनि ॥ नमधातोः । नमते नमेते नमन्ते । अद्यतन्यां दुहल्कार । अदुग्ध अधुक्षाताम् अधुक्षत । अस्नोष्ट अस्नाविष्ट । अनंस्त अनंसाताम् अनंसत ॥ १४ ॥

अथ द्विकर्मकाः ॥

दुयाच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥ २५ ॥
ण्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि ।
प्रत्यय यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि ॥ २६ ॥
निन्ये विजनमगारं रजनीमगामि मदमयाचि सम्भोगम् ।
गोपी हास्यमकारि भावमनेनाऽमनन्येन ॥ २७ ॥

(प्र०) अथ द्विकर्मका धातव कथ्यन्ते । द्वे कर्मणी यस्य स द्विकर्मकः । यस्य धातोः कर्मद्वयापेक्षत्वं भवति स द्विकर्मकः ॥ ते धातव श्लोकेन कथिताः ॥

दुयाच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

दुह् । याच् । पच् । दण्ड् । रुधि । प्रच्छि । चि । ब्रू । शास् । जि । मथ । मुष । नी । हृ । कृष । वह् एतेषां धातूनां द्विकर्मकत्वं स्यात् ॥

ण्यादयो ण्य न्तनिष्कर्मगत्यर्था मुख्यकर्मणि ।
प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि ।

ण्यादयः । ण्यन्तनिष्कर्मगत्यर्था धातव मुख्यकर्मणि प्रत्ययं यान्ति । दुह्यादि गौणे प्रत्ययं यान्ति अन्ये तु यथारुचि प्रत्ययं यान्ति । गौणे वा मुख्ये वा । उभयत्रापि वा । तत्र द्विकर्मक कर्मद्वयम् । एकं मुख्यं कर्म । अपरं च गौणं कर्म । यत्रैव क्रिया व्याप्नोतु तद् मुख्यं कर्म । अन्यद् गौणम् । ण्यादीनां मुख्ये कर्मणि प्रथमा । दुह्यादीनां तु गौणे कर्मणि प्रथमा । प्रच्छ्यादीनां तु मुख्य-मुख्ये यानि कर्माणि प्रथमा ।

नित्य विजनमजागरि रजनामगमि मदमयासि संमागम् ॥
गारा हास्यमकार्यत भावप्रीनामनन्तन ॥

अस्य व्याख्या—अनन्तन गाया विजने नित्य । अनन्तन गारा रजनामजागरि । गारा मदमगमि । त्रिशु स्यानतु गाया मुख्यं कर्म । गारा संमोगमयासि । मया हास्यमकार्यत । एतौ भावाः कार्यत ॥

कर्तुरीप्सितम प्रधान कर्म । अन्यदप्रधानम् । नगर नीयते नागरिकैर्वनचर । भोजन याच्यते यजमानो याचकेन । पृच्छ्यते पन्थान पाथकेन पाथ । शिष्येणाचार्यस्तत्त्व पृच्छ्यते । कटश्चिकीर्ष्यते देवदत्तेन । यत्र चोभूय्यते । अनपि च ह्रसात् । पापच्यते । तेन पापचिता अपापाचि । इत्यादि ॥ इति भावकर्मप्रक्रिया ॥

(च०) अथ द्विकर्मकानामुदाहरणानि आह—मूले तु कर्तुरीप्सितं प्रधानं कर्म । अन्यदप्रधानमिति व्याख्यातम् । तदपि समाधानम् । नगरं नीयते नागरिकैर्वनचरः । अत्र वनचरस्य मुख्यत्वम् । नगरस्य गौणत्वम् । तत्र वनचर इति प्रथमा । यदा मुख्ये कर्मणि प्रथमा तदा गौणे द्वितीया । यदा गौणे प्रथमा तदा मुख्ये द्वितीया भवति इति विवेक. ॥ यदा मुख्यामुख्ये द्वे अपि प्रत्यय न अभिधीयते तदोभयत्रापि प्रथमा । भोजनं याच्यते यजमानो याचकेन । अत्र मुख्ये द्वितीया । गौणे प्रथमा ॥ पृच्छ्यते पन्थानं पथिकेन पान्थ । अत्रापि मुख्ये द्वितीया । गौणे प्रथमा । शिष्येणाचार्यस्तत्त्वं पृच्छ्यते । अन्यान्यपि उदाहरणानि यथासम्भवं ज्ञेयानि ॥

सप्रत्ययान्तात् 'कृ' धातोर्यक् । चिकार्ष्यते । चिकीर्ष्येत । चिकार्ष्यताम् । अचिकार्ष्येत । लिटलकार—चिकार्षाचक्रे । चिकार्षिषीष्ट । अचिकार्षि कटः चिकार्ष्यते देवदत्तेन ॥

यङन्तात् भूधातोर्यक् । 'यस्य हलः' अनेन । 'यत' अननाकारलोप । बोभूय्यते । बोभूय्येत । बोभूय्यताम् । 'दिवादावट्' । अबोभूय्यत । बोभूयाचक्रे । इत्यादीनि । लुङ्लकार । अबोभूयिष्ट ॥ यङन्तात् पचधातोर्यक । पापच्यते । पापच्येत । पापच्यताम् । अपापच्यत । 'अनपि च ह्रसात्' अनेन अनपि विषये यहो लोप । पापचाचक्रे । पापचिषीष्ट । पापचिता । पापचिष्यते । अपापचिष्यत । अपापचि । इत्यादीनि रूपाणि भवन्ति तानि सुगमानि । इति भावकर्मप्रक्रिया समाप्ता ॥ ३३ ॥

(प्र०) प्रधानमिति । मतान्तरे तु—साक्षाद्धात्वर्थतावच्छेदकफलशालित्वेन मुख्यकर्मव्यवहार । धात्वर्थतावच्छेदकतावच्छेदकफलशालित्वेन तु गौणव्यवहारः ॥ ३३ ॥

लकारार्थप्रक्रिया ॥ ३४ ॥

अथ लकारार्थप्रक्रिया ॥ स्मठपौन पुन्ययोर्लोण्मध्यमपुरुषैकवचनान्तता निपात्यते सर्वकाले सर्वपुरुषविषये अतीते काले ॥ १ ॥

पुरामवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्निशं दिवः ॥२८॥

(च०) अथ लकारार्थप्रक्रिया कथ्यते । सूत्रम् 'हठपौन पुन्ययो' इत्यत्र-रेऽर्थे पौन- पुन्यार्थे च धातोर्लोडन्तमध्यमपुरुषस्य एकवचनं ततो हि निपात्यते सवकाल सर्वपुरुषविषये भवति काल । अस्योदाहरणानि । पुरामवस्कन्द अस्मिन् श्लोके उक्तानि सुगमानि । तत्र पराध काले लोडन्तमध्यमपुरुषस्यैकवचनान्तानि रूपाणि प्रदर्श्यन्ते । अस्य श्लो- र्थः सुगमोऽस्ति ॥ १ ॥

(प्र०) हठपौनः पुन्ययोरिति । अवश्यं वक्तव्यम् । तच्चनार्थविषये वा क्रियास मभिव्याहारे द्वित्वं तस्यैव धातोरनुप्रयोगश्च । "अनर्कक्रियासमुच्चये वा लोट् तस्य द्वित्वौलकर्मोविषये वा" । समानार्थस्य धातोरनुप्रयोगाभिधानदृष्टः । याहि याहीति याति । एव याव यान्ति । याहि यावः याथ । याव यातेति यूयं याथ । यामि याव- याम । याहि याहीति यास्यति । अयाच्याच्यावत्ययाते । एवमन्यत्रापि । अविषये प्रागवत् । एवं अधाच्यमधीष्वमिति पूर्वसधात्र ॥ सक्तून् पिब धानाः खाद्येत्यभ्यवह रति । पिबत खादत खादतेत्यभ्यवहरथ । अन्ये भुङ्क्ष्व दधिकर्मास्वादयस्वेत्यभ्यवहरत । भुङ्क्ष्वमास्वादयध्वमित्यभ्यवहरथ इति ॥ १ ॥

वर्तमानार्थाया अपि विभक्तेः स्मयोगे भूतार्थता वक्तव्या ॥२॥ आह स्म हारीतः । यजति स्म युधिष्ठिरः ॥

(च०) सूत्रम्— वर्तमानार्थायाः ॥ वर्तमानार्थाया अपि स्मयोगे विभक्तेः स्म इत्यस्य योगे भूतार्थता वक्तव्या । अस्योदाहरणम्—आह स्म हारीतः । अत्र वर्तमाने ऽपि स्मयोगेन भूतार्थता ॥ द्वितीयमुदाहरणम् यजति स्म युधिष्ठिरः । अत्रापि वर्तमाने स्मयोगेन भूतार्थता अस्ति ॥ २ ॥

वैचित्र्यापह्नवयोरल्पकालेऽपि णलादिर्वक्तव्यः ॥३॥ सुप्तो-ऽहं किल विललाप । नाहं कलिङ्गं जगाम ॥

(च०) सूत्रम्—वैचित्र्यापह्नवयोः ॥ वैचित्र्यापह्नवयोरल्पकालेऽपि णलादिः वक्तव्यः । अस्योदाहरणम् । वैचित्र्ये सुप्तोऽहं किल विललाप । अपह्नवे नाहं कलिङ्गं जगा- म । इत्युदाहरणम् ॥ ३ ॥

(प्र०) वैचित्र्येति । अत्र यद्यपि बुद्ध्यादिप्रत्ययानां स्वतन्त्रस्य कर्तुरात्मनः प्रत्यक्षत्वं तथापि मदरूपत्वादिभिः विक्षिप्तं चित्तं कश्चित् स्वव्यापारं न वेत्ति यथास्य भ्रम इत्वा प्रयुङ्क्ते सुप्तोऽहमिति । अपह्नवोऽपलापः । कलिङ्गा नाम देशविशेषः । तस्य तु "अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति" इत्यु क्त्या निषिद्धत्वं प्रसिद्धत्वं च तत्र स्वयं गत्वा स्थितिरित्युक्तः कश्चिद् दम्भेन निषेधात्सत्यापहरण ॥ यत्र तु दम्भेनापि भयादपह्नवं तत्र लङेवादृष्टत्वात् ॥ ३ ॥

यावत्पुरानिपातयोर्योगे भविष्यदर्थे तिपादयः लट् ॥४॥

पुरा करोति । यावत्करोति । करिष्यतीत्यर्थः ॥

(च०) सूत्रम्—'यावत्पुरानिपातयोः' ॥ यावत् पुरा अनयोर्निपातयोर्योगे भविष्यदर्थे [illegible] प्रत्ययो भवति । [illegible] । [illegible] पुरा करोति । करिष्यतीत्यर्थः । यावत्करोति । करिष्यतीत्यर्थः ॥ ४ ॥

स्मृत्यर्थधातुयोगे भूतेऽर्थे लृट् ॥ ५ ॥ स्मरसि मित्र यदुपकरिष्यति । उपकृतवा इत्यर्थः ॥ इति लकारार्थप्रक्रिया समाप्ता ॥

(च०) सूत्रम्—'स्मृत्यर्थधातुयोगे०' ॥ स्मृत्यर्थधातुयोगे सति भूते [illegible] लृट्प्रत्ययो भवति । स्मरसि मित्र यदुपकरिष्यसि उपकृतवा ॥ ५ ॥

इति लकारार्थप्रक्रिया समाप्ता ॥ १४ ॥

धातून् मध्यन्तरस्थापनार्थत्वाच्च सर्वथा ।
अभिधातुमशक्यत्वाद्धात्वाद्यावनेकम् ॥ २९ ॥

इति श्री अनुभूतिस्वरूपाचार्यविरचितायां सारस्वत
प्रक्रियायामाख्यातप्रक्रिया समाप्ता ॥

(च०) [illegible]—धातूनिति । [illegible]

[illegible]

[illegible]

कृदन्तप्रकरणम् ॥ ३५ ॥

निजवनैर्विधिना निखिलापदो झटिति यो विनिवर्तयति स्मृतः ।
जलधिजापरिरम्भणलालसो नरहरिः कुरुतां जगतां शिवम् ॥ १ ॥

अथ कृदन्तप्रक्रिया निरूप्यते ॥ **कृत्कर्तरि च** ॥ वक्ष्यमाणाः प्रत्यया कृत्संज्ञकास्ते च कर्तरि च भवन्ति ॥ १ ॥ चकाराद्भावकर्मणोरपि । **स्वतन्त्रः कर्ता** ॥ *क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्* ॥ शुद्धो धात्वर्थो भावः ॥ कर्तुरीप्सिततमं कर्म । तथायुक्तं चानीप्सितम् । विषं भुङ्क्ते देवदत्तः । अन्नं भुङ्क्ते देवदत्तः ॥

(च०) अथस्याद्यधातुकथनानन्तरं कृत्प्रत्यया निरूप्यन्ते । धातोर्विहितस्य प्रत्ययानां कृत् इति संज्ञास्ति ते निरूप्यन्ते प्रकाश्यन्ते । यद्वा कृदन्तप्रक्रिया निरूप्यते । कृत्संज्ञकाः प्रत्यया अन्ते येषां ते कृदन्ताः शब्दास्तेषां प्रक्रिया निरूप्यते । द्वितीयवृत्तौ धातवः साधितास्ते भवन्त्याद्यन्ताः अत्र तु भ्वादीनां कृत्प्रत्ययप्रयोगेन निष्पन्नाः स्याद्यन्ताः [illegible] साध्यन्ते ॥ सूत्रम्— कृत् कर्तरि० ॥ कृत् प्रथमैकवचनान्तम् कर्तरि [illegible] करोतीति कर्ता तस्मिन् कर्तरि इति अर्थ स्वर०' ॥ अत्र ये प्रत्यया वक्ष्यन्ते ते कृत्संज्ञकाः कृन्नामानो ज्ञेयाः । अत्र 'जातावेकवचनम्' इति वचनाद्वक्ष्यमाणा इति कथितं च कृत्प्रत्यय प्राय. कर्तरि कर्तृकारक भवति । चकारात् विवक्षविधाने भावकर्मणोरिति ॥ १ ॥

(प्र०) कृदिति । उत्सर्गतः कर्तरि बोध्यम् ॥ १ ॥

ण्वुल्तृचौ ॥ धातोर्ण्वुल्तृचौ प्रत्ययौ भवतः ॥ २ ॥ डुपचष् पाके । पच् तृ इति स्थिते । चो कुः । पक्तृ इति स्थिते । 'कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा' इति केचित् इति नामत्वम् । नामसंज्ञायां स्यादिविभक्तिर्भवति । स्तुरार् । सेरा । पचतीति पक्ता पक्तारौ पक्तारः । पक्तारम् । पुल्लिङ्गे पक्ता । स्त्रियां पक्त्री । नपुंसके पक्तृ पक्तृणी पक्तॄणि इत्यादि ॥ डुकृञ् करणे । करोतीति कर्ता । हृञ् हरणे । हरतीति हर्ता । मृङ् प्राणत्यागे । म्रियते इति मर्ता । डुभृञ् धारणपोषणयोः । बिभर्तीति भर्ता ॥

(च०) सूत्रम्— ण्वुल्तृचौ ॥ ण्वुल् तृच् च ण्वुल्तृचौ स्वर० । धातोरेव ण्वुल्तृचौ इत्येतौ द्वौ प्रत्ययौ भवतः कर्तरि । [illegible] । डुपचष् पाके । पच तृप्रत्यय । चो कुः । स्वर० । पक्त इति जातम् । कृत्तद्धितसमासाश्चेति नामसंज्ञायाम् प्रथमैकवचने ऋतुरार । [illegible] इति [illegible] सेरा [illegible] [illegible] । [illegible] । पक्ता । [illegible] । स्वर पक्तारौ पक्तारः । एवं कृ—तृप्रत्यय । [illegible] कर्तृभ्य [illegible] प्रथमैकवचने ऋतुरार् । [illegible] । स्वर० । कर्ता कर्तारौ । [illegible] विभक्तिषु रूपाणि ज्ञेयानि । एवं हृ हर्ता [illegible]

ति पक्ता । करोतीति कर्ता । हरतीति हर्ता । एवं भर्ता भर्तारौ भर्तारः । भोक्ता, दाता पाता, स्याता, माता, गन्ता, वक्ता, मन्ता इत्यादि ॥ स्त्रीलिङ्गे—पक्त्री, 'ऋन् ई' इत्याप । ऋ रम्' ॥ नपुंसकलिङ्गे—पक्तृ पक्तृणी पक्तृणि । इत्यादि ॥ २ ॥

(प्र०) धातोरिति ॥ अधिकारादिदमुक्तमित्याशय ॥ पचतीति वाक्ये पक्तेति॥

कृतः ॥ सेट्धातोः परस्य कृत्प्रत्ययस्य तकारादेरिडागमो भवति ॥ ३ ॥

कृत इदं सूत्रं सेट्धातुविषयम् ॥ भू सत्तायाम् । भवतीति भविता । एधृ वृद्धौ । एधतेऽसौ एधिता ॥

(प्र०) सूत्रम्—कृतः ॥ कृत प्रथमैकवचनान्तम् 'स्वर०' 'धातो०' । एकपदं सूत्रम् । सेट्धातोः परस्य तकारादेः कृत्प्रत्ययस्य इडागमः स्यात् । तम्प्रत्याहार आदौ यस्य तस्यैव कृत्प्रत्ययस्यागमः नत्वन्यस्य । उदाहरणम् भू तृ प्रत्यय । 'कृतः' इति इडागम । 'गुण' । 'आ-अव्' । 'स्वरा०' भवितृ—इत्यस्मात्प्रथमैकवचन कर्तुरित्यादिवत्साधना । भवतीति भविता । एधृ वृद्धौ । एध तृ । 'कृत' एधिता ॥ ३ ॥

गुपू रक्षणे ॥ ऊदितो वा ॥ ऊदितो धातोरिड्वा भवति ॥ ४ ॥

गोपायति गोपिता गोपायिता गोप्ता ॥ षिधू शास्त्रे माङ्गल्ये च । सेधिता सेद्धा ॥ इषुसहलुभरिषरुषामनपि तस्येड्वा भवति । इषु इच्छायाम् । इच्छतीति एषिता-एष्टा ॥ लुभ विमोहने ॥ लुभ् गार्ध्ये । लुभ्यतीति लोभिता । इडभावपक्षे-तथोर्धः । झबे जबाः लुभ्यतीति लोब्धा ॥ रिष् बन्धने । रेषतीति वा रिष्यतीति रेषिता रेष्टा ॥ रुष क्रोधे । रोषतीति रोषिता-रोष्टा ॥ षह मर्षणे । अदे [illegible] सन । होढः । तथोर्धः । ष्टुभिः ष्टुः । ढि ढो लोपः । सहिवहोरोदवर्णस्य । सहतेऽसौ सोढा । वह् प्रापणे । वहति इति वोढा ॥

(प्र०) सूत्रम्—'ऊदितो वा' ॥ ऊत् ऊकारः इत् यस्य स ऊदित् तस्मात् ऊदितः पञ्चम्येकवचनम् स्वर० धातो० वा 'अव्ययम्' । 'इट्' । [illegible] ऊदितो धातोः । गुपू रक्षणे षिधू माङ्गल्ये इत्यादेर्वा इडागमः तम्प्रत्याहारादेः कृत्प्रत्ययस्यैव । उदाहरणम् । गुपू रक्षणे । गुप् । 'गुपूधूपविच्छिपणिपनेरायः' इति [illegible] 'ऊदितो वा' इति इडागमः । स्वर० । तत्प्रत्ययादपि प्रथमैकवचने 'ऋन्तात्' । गोपा । [illegible] स्वर० [illegible] वा—गोप्ता । [illegible]—गोपिता । गोप्ता । षिधू शास्त्रे माङ्गल्ये च । षिधू [illegible] [illegible] [illegible] ऊदितो वा इडभावपक्षे [illegible] 'तथोर्धः' । [illegible] [illegible] । स्वर० । तत्प्रत्ययादपि प्रथमैकवचने [illegible] । [illegible] । स्वर० । [illegible] । सेद्धा । [illegible] इषु इच्छायामित्यस्य [illegible] एषिता । [illegible] [illegible] [illegible] । [illegible] इति [illegible] । [illegible] । [illegible] । [illegible] । ष्टुभिः ष्टुः । ढि ढो लोपः दीर्घश्च । सहिवहोरोदवर्णस्य । सहिवहोः वह् प्रापणे [illegible] [illegible] [illegible] [illegible] भवति [illegible] ।

नत्र तु सर्व सर्वं भारवाद् इत्यादौ भाकारो न भवति । भवन स इत्यत्र सा । सोऽपि ...त्यादेशान्तरे 'स्नुशात्' । सरा । इत्यादि कर्तव्यम् । एवं बद मापणे । बद ...ति वाचा ॥ ४ ॥

पुवो(ण्वो)रनाकौ ॥ णु णु इत्येतयोरन अक इत्येतावादेशौ भवत यथासङ्ख्येन ॥५॥ णित्त्वाद्वृद्धि । अत उपधाया । पचति वा पाचयतीति पाचक पाचकौ पाचका । देवदत्तवत् । पठति वा पाठयतीति पाठक । एवं याचते वा याचयतीति याचक । भवति वा भावयतीति भावक । शृणोति वा श्रावयतीति श्रावक । पुनाति वा पावयतीति पावक । ष्टुञ् स्तवे । स्तौति वा स्तावयतीति स्तावक । यु मिश्रणे । औ आत् । यौति वा यावयतीति यावक । हनो घत् । हन्ति वा घातयतीति घातक । जायते वा जनयतीति जनक । 'जनिवध्योश्च वृद्धि' । वध हिंसायाम् । वधक । 'मितां ह्रस्व' घटते वा घटयतीति घटक ॥ 'आतो युक्' ॥ आकारान्तस्य धातोर्युगागमो भवति ञिति णिति च परे ॥६॥ डुदाञ् दाने । ददाति वा दापयतीति दायक । दैप् शोधने । 'आदेच उपदेशेऽशिति' । दापयतीति दायक ॥

पुणसपुटो हित्वा दरिद्रातेरनण्पालोपो लुङि वा वक्तव्यः ॥७॥ दरिद्रा दुर्गतौ । दरिद्राति वा दरिद्रापयतीति दरिद्रायक । दरिद्रिता । नृतिखनिरञ्जिभ्यो वुनेकान्त । नृती गात्रविक्षेपे । उपधाया लघो । रपरो द्वि । नृत्यतीति नर्तक । नदादि । नर्तकी । खनक खनकी ॥ रञ्जेर्न-लोपो वा ॥८॥ रजक रञ्जक रजकी । णुवारनाकौ इति तद्धितवुरस्यपरस्य नति वक्तव्यम् । तेन ऊमायु ॥

(५) सूत्रम्— णुवारनाकौ ॥ युभ वुभ युव तथा पञ्चाद्विवचनान्तम् 'उभम्' । ...स्वरहान० । स्वाविमर्श । अन्ते । अनम अकम प्रथमाद्विवचनान्तम् 'आमौसा' । भाग भाभिना । । ...स्वर । ...णिपदम् । णु णु इत्यनयो प्रत्ययया क्रमश अन अक इ यान्तो भवत णु इत्यस्य अन णुरस्य भक । उदाहरणम् । पच । णवुलौ इति वग । मकारा वृद्धय । अत उपधाया इति णुवारनाको इति णु इत्यस्य अकार । ...स्वर । पचतीति पाचक प्रथमैकवचन सादि । एवं प ति पाठयति वा ... ह हूक्ष्म कल्प । वुभ य यव । भावाबान्तिम । कार णु इ यस्य भक । ...स्वर कातात कारद त वा क रक । प्रथमैकवचन 'सादित्यम' ॥ एवं न णु वकारस्य भोकारा वृद्धि औ भाव भक । स्वरहान । भवतानि भावक ॥ एवं ...त्र प्रत्यत ...लुनातीति लावक ॥ णु मिश्रण । यौतीति यावक ॥ ...

तावि श्रावक. । एतानि रूपाणि,द्वन्द्ववत्। तदित्थं सर्वं क्युप्रत्ययस्यानादेशा न । तत् ऊमायु । नायु ॥ ६-८ ॥

(प्र०) युचारिति । युश्च वुश्चेति समाहारः । तुमस्त्वनित्यत्वात्र ॥ ६ ॥

नाम्युपधात्कः ॥ (१)नाम्युपधाद्धातोः क प्रत्ययो भवति ॥९॥ ककारो गुणाभावार्थः । क्षिप् प्रेरणे । क्षिपतीति क्षिप ॥ छिदिर् द्वैधीकरणे । छिनत्तीति छिद ॥ भिदिर् विदारणे । भिनत्तीति भिद ॥ दुह प्रपूरणे । द्रव द्रव्यभागानुकूलो व्यापारः प्रपूरणम् । कामान् दोग्धि सा कामदुघा ॥ **दुहः के वा,घो वाच्यः** ॥१०॥ तेन कामदुहा । दुह दुघ ॥ तुद् व्यथने । तुदतीति तुद ॥ विद् ज्ञाने । वेत्तीति विद ॥ द्विष् अप्रीतौ । द्वेष्टीति द्विष ॥ पुर ऐश्वर्यदीप्त्योः । पुरतीति पुरः ॥ शुभ् शोभायाम् । शोभते तत् शुभ कल्याणम् ॥

(च०) सूत्रम्— नाम्युपधात्क' ॥ नामी उपधा यस्य स नाम्युपधस्तस्मात् पञ्चम्येकवचनान्तम् । 'इसिते । सवर्णे०' । कः प्रथमैकवचनान्तम् । धोर्वि०' । नामी अवर्णवर्ज स्वर इकारादि स उपधा यस्य तस्माद्धातोः कप्रत्ययो भवति । ककारो गुणप्रतिषेधार्थ ॥ क्षिप् प्रेरणे । क्षिप् अत्र नाम्युपधात् कप्रत्यय । 'स्वाद्यन्ते' 'धार्वि॰' क्षिप । क्षिपति प्रेरयतीति क्षिप ॥ एवं भिदिर् विदारणे । भिनत्तीति भिद ॥ छिदिर् द्वैधीकरणे । छिनत्तीति छिद ॥९-१०॥

(प्र०) नाम्युपधादिति । कप्रत्ययनाद्-प्रत्ययाधा स्त्रीकवर्गा इत्संज्ञका भवन्ति तद्धितं विना ॥ ९ ॥

जानातेश्च ॥ जानातेर्धातोरपि क प्रत्ययो भवति ॥११॥ जानातेश्चेति चकारात्कॄगॄधृदृप्रीनुवामपि क प्रत्ययो भवति ॥ कॄ विक्षेपे । अत इर् । किरतीति किर । धृञ् धारणे । धरतीति ध्र । प्रीञ् तर्पणे । प्रीणाति वा प्रीणातेऽसौ प्रिय 'नु घ तो' गॄ निगरणे । गिरतीति गिर । 'गिरतेरस्य वा ड स्वरे वाच्य ॥ **गिले परऽगिलस्य** ॥ गिलश्चव्द विहाय पूर्वस्य मुम् वक्तव्य ॥१२॥ तिमिं गिलतीति तिमिंगिल । अगिलस्येति किम्। गिल गिल । नुद् व्यक्तायां वाच । 'नु धातो' ॥ नवीतीति नुव । अतिशब्दा-

(१) (मना)—

न ना च पाणिनाय-कृत्तद्धर्तर्दित तद्धितद्धर्तदस्वाया कककमा इत्य क्यु । तद्धि तद्रामान किम् । तिना क. क्षिप्तादः । कामामदितितदिम्बः गतग० । ति कारा दिन् दल्पत उपान. गिरि इत्यादि ।

रकवारि महेररि क प्रत्ययो भवति । गृह्णातीति गृहम् । तात्स्थ्यात् गृह्णन्ति ते गृहा दारा ॥

(च०) सूत्रम्—'आघाटेश्च' इति ञा भवतावत् इत्यतन्यापि आताः क्प्रत्ययो भवति । ज्ञा । अकित्वात् 'आतोऽनति' इत्याकारलोपः । स्था० । 'कार्वि० । आत्म ताति ज० । धमरात्कृप्रियात्वि क्प्रत्यय । क्रिः । प्रियः ॥ ११ ॥

(प्र०) सूत्रम्— कृत इत् । प्रिय । प्राङ् क्प्रत्ययः । गुणातो० इति इत् ॥

पचिनन्दिग्रहादेरयुणिनि ॥ पचादेर्नन्देर्ग्रहादेश्च अ, यु, णिनि, इत्येते प्रत्यया भवन्ति यथासङ्ख्येन ॥१३॥ पचतीति पच । वपतीति वप । वेदीति वेद । वपतीति वप ॥ चरिचलिपतिवदिहनिपदीनां वा द्विश्च पूर्वस्याऽगागमश्च ॥ १४ ॥ अप्रत्यये परे । इसादिः शेषाभाव । चर गतिभक्षणयो । चरतीति चराचर –चर । चल चलने । चलतीति चलाचल –चल । पत्लृ पतने । पततीति पतापत –पत । वदतीति वदावद । वद ॥ हन्तेघश्च ॥ १५ ॥ हन्तीति घनाघन इन्द्रः । चकारात् घन इन्द्र । घनतीति घनाघन घन । इत्यादि ॥ चर भक्षणे शब्दे । नरतीति नद ॥ पूङ् गतौ । प्लवतेऽसौ प्लव । चरतेऽसौ चर ॥ क्षमूष् सहने । क्षमतेऽसौ क्षमः । एवं दिवु देवट् नदट् इति । टकारानुबन्ध स्त्रीत्वे । दीव्यतीति देवी ॥ षिवु तन्तुसन्ताने । षट् सेवन । सेवतेऽसौ सेव । सीव्यतीति सेव ॥ भष क्षेपे । भष रुचौ । भष दन्द । भषतीति भष ॥ अन प्राणने । प्राणितीति प्राण ॥ दहिर् भ्रंशे । दरतीति दर ॥ सृप्लृ गतौ । सर्पतीति सर्प । भुज् भक्ष । भरते वा भरतीति भर । डुभृञ् धारणपोषणयो । बिभर्ति वा बिभृतेऽसौ भर । सहतेऽसौ सह । एवं विराडादीनां पचादेरप्रत्ययो निरवयवस्यैव ज्ञातव्य ॥ इति पच ८ ॥

(च०) सूत्रम्—'पचिनन्दिग्रहा ल्युणिनि' ॥ पचिश्च इत्यादि [illegible] ग्रहादिश्च स पचिनन्दिग्रहादि[illegible] [illegible] इत्यादि । [illegible] । अयुणिनि । [illegible] । [illegible] । [illegible] । [illegible]
[illegible]

नन्द मद स्कन्द चर जर मर क्षर चद राध कृप वर्ध मृग सर्प भट स्वर इत्यादिरपाद्य ।

(प्र०) पचिमहादेरिति ॥ [illegible] प्रत्ययभिन्नत्वात् ।
अत्र गुण गिनिरचेति समाहारद्वन्द्वः । एते च गणा न धातुपाठे पठ्यन्ते किन्तु नाम-
गणे [illegible] प्रकृतया निर्दिश्यन्ते ॥ १ ॥

अथ नन्द्यादिर्निरूप्यते ॥ टुनदि समृद्धौ । इदितो नुम् । न इति वा
नन्दयतीति नन्दन । नन्दतीति नन्दक ॥ रमु क्रीडायाम् । रमतेऽसौ
रमण ॥ वाम क्रम सहने । वामतीति वामन । क्रामतीति क्रमण ॥ वशु
शब्दे । वासयतीति वासनं ॥ मिता ह्रस्व ॥ मदी हर्षे । मादयतीति वा मद
यतीति मदन ॥ दुष वैकृत्ये ॥ **दुषेर्णौ कृति च दीर्घो वक्तव्यः
॥ १२ ॥** दूषयतीति दूषण । राधृ साधृ संसिद्धौ । राधयतीति वा राधय
तीति राधन साधन. ॥ वृधु वृद्धौ । वर्धयतीति वर्धनः ॥ रु शब्दे ॥
रोर्युण् ॥ रु शब्दे इत्येतस्माद्धातोर्युण् प्रत्ययो भवति ॥ १३ ॥ रौति वा
रावयतीति रावण ॥ **रु शब्दात् युरपि वक्तव्यः ॥१४॥** तेन रवण ॥
अकारान्ताच्च ॥१५॥ युण्प्रत्ययो भवति । करोतीति वा कारयतीति
कारक । कारण ॥ शुभ शोभने रोचने च । शोभयतीति शोभन ॥ रुच
जानाति स्मासौ जीन ॥ भुजो कौटिल्ये । चो कु । भुज्यते स्माऽसौ भुग्न । ओहाक् त्यागे । स्थामी । हीयते स्मासौ हीन ॥ षूङ् दूङ् दीङ् धीङ् रीङ् मीङ् वीङ् लीङ् व्रीङ् एते नव ओदित । षूङ् प्राणिप्रसवे । सूयते स्मासौ सून ॥ दूङ् परित्यागे । दूङ् दुःखे । दूयते स्मासौ दून ॥ डीङ् विहायसा गतौ ॥ **डीङ् इडभावः** ॥१०७॥ डीयते स्मासौ डीन ॥ धीङ् धारणे । धीङ् सामर्थ्ये । धीयते स्मासौ धीन ॥ रीङ् क्षरणे । रीङ् स्रवणे । रीयते स्मासौ रीण ॥ मीङ् प्राणवियोगे । मीङ् हिंसायाम् । मीयते स्माऽसौ मीन ॥ दीङ् क्षये । दीयते स्मासौ दीन ॥ लीङ् श्लेषणे । लीङ् विलपने । लीयते स्मासौ लीन । व्रीङ् वरणे । व्रीयते स्मासौ व्रीण । एते ओदित । ओप्यायी वृद्धौ ॥ **प्याय पी** ॥ प्याय पी आदेशो भवति निष्ठायाम् ॥ १०८ ॥ प्यायते स्मासौ पीन ॥ क्षि क्षये ॥ **क्षियो निष्ठायां कर्तरि दीर्घो वाच्य** ॥ १०९ ॥ **दीर्घादेव क्षियो निष्ठातस्य नो वाच्यः** ॥ ११० ॥ क्षीयते स्मासौ क्षीण । क्षीणवान् । भावकर्मणोस्तु क्षीयते स्म तत् क्षितं तेन । क्षितं कामो मया ॥ **परलवसयोगादेरादन्तान्निष्ठातस्य नो वाच्यः** ॥ १११ ॥ द्रा स्वप्ने । द्रायते स्मासौ द्राण ॥ ग्लै म्लै हर्षक्षये । ग्लायते स्मासौ ग्लान । म्लान ॥ हि गतौ । हीयते स्मासौ हित. ॥

(घ०) सूत्रम्— ल्वाद्योदित ' ॥ लू आदिर्यस्य स ल्वादिः आकार इत् यस्य स आदित् । ल्वादिश्च आदित् च ल्वाद्यादित् तस्मात् पञ्चम्येकवचनान्तम् । ल्वाद्यो° धातु° ल्वाद्या धातुपाठोक्ता । आदितश्च । आहाक् त्यागे । आहाङ् गतौ । ओ प्यायी वृद्धौ । इत्यादयस्तेभ्य परस्य क्तिस्तकारस्य नकारो भवति । उदाहरणम् ॥ लून उदन । ... न । ल्वाद्यादित इति तस्य न. । प्रथमैकवचने धाति° दन ॥ ... क्षय । ... ल्वाद्यादित इति तस्य न । ... ग्लै हर्षक्षये ग्लै ... ल्वाद्यादित इति तस्य न. । धाति° ग्लान । एवं म्लै गात्रविनामे । म्लान ॥ ओहाक् त्यागे । हा ... ल्वाद्यादित इति तस्य न. । हान ॥ ओ प्यायी धातु वृद्धौ । प्याय पी ओप्यायी इत्यस्य धातोः पी इ ... भवति इति प्यायस्थाने पी । ल्वाद्यादित इति तस्य न । पीन । एवं दीन क्षीन दून ॥ १० ... १११ ॥

(ङ) ल्वाद्यादित इति । लू आदिर्यस्य स ल्वादिः । आदितश्च स आदित् । ल्वादिश्च आदिच्च ल्वादित् तस्मात् ॥ १०६ ॥

त्रैङ् पालने ॥ **त्राणाद्या वा ॥** त्रणादीनां नत्वं वा निपात्यते॥११२॥ त्रायते स्मासौ त्राण त्रात ॥ घ्रा गन्धोपादाने । जिघ्रति स्मासौ घ्राण घ्रात ॥ ह्री लज्जायाम् । ह्रीयते स्मासौ ह्राण ह्रीण ॥ नुद् प्रेरणे । नुद्यते स्मासौ नुन्न -नुत्त ॥ विदिर् विचारणे । विद्यते स्मासौ विन्न वित्त ॥

वेत्ति रूप ।विद ज्ञाने विन्ते विदिर् विचारणे ।
विद्यते विद सत्तायां विद्लृ लाभे च वि द्यति ॥ १० ॥

उन्दी क्लेदे । उद्यते स्मासौ उन्न –उत्त ॥ वा गतिगन्धनयो । निवाति स्म वा निवायते स्मासौ निर्वाण –निर्वात ॥ विद् सत्तायाम् । विद्यते स्मासौ विन्न –वित्तः । एते त्राणाद्या ज्ञेया ॥

(म०) त्राणाद्याः शब्दाः [illegible] निपात्यन्ते ॥ [illegible] इत्यस्य त्राणः त्रात । इति रूपद्वयम् । त्रै क्तप्रत्यय । [illegible] त्रात । एवं क्तप्रत्ययेन सहैव त्राण इति निपात्यन्ते ॥ एवं ह्री लज्जायाम् इत्यस्य ह्राण ह्रीणः ॥ वाधातुः गतिगन्धनयोः । निर्पूर्वः । निर्वाणः । एवं घ्राणः घ्रात ॥ विन्नं विन्नम् । उत्तः उन्नः । नुत्तः नुन्नः ॥ ११२ ॥

सम्पर्युपेभ्यः करोतेः सुट् ॥ सं परि उप एभ्य परस्य करोते र्भोतोभूषणेऽर्थे शोभनेऽर्थे च वाच्ये सति सुट् आगमो भवति ॥११३॥ टिरवादौ । संक्रियते स्मासौ संस्कृत । परिक्रियते स्मासौ परिष्कृत । उपक्रियते स्मासौ उपस्कृत । यदा संस्कारविनै तदा संक्रियते स्मासौ संकृत । परिक्रियते स्मासौ परिकृत । उपकृत ॥ भावे घञ् । संक्रियते स्म सो संस्कार । अलङ्क्रियते स्मासौ अलङ्कारः ॥ विद ज्ञाने । विद्यते स्म सौ वित्त । ज्ञात ख्यात ॥

(म०) संपर्युपेभ्य० ॥ सम् परि उप इत्येतेभ्यः परस्य करोतेः [illegible] भूषणार्थे सुडागमो भवति टित्वादादौ । [illegible] । [illegible] क्तप्रत्यय । एवं सुडागम [illegible] संस्कृत परिष्कृत उपस्कृत अलङ्कृत इत्यर्थः ॥ ११३ ॥

दो दत्ति ॥ दा इत्यस्य दत्त भवति किति तादौ परे ॥११४॥ दीयते स्मासौ दत्त । ददाति स्म इति दत्तवान् । त्रिशो नुप ॥

(म०) सूत्रम्— दो दत्ति । [illegible]

(प्र०) दा इत्ति इति ॥ ददातेर्दथादेशः स्यात् किति तकारे । दाप् लवने अत्र तु न व्याख्यानात् प्रयोगाभावाच्च । धान्तोऽयमादेशः । किञ्च यदि तान्त आदेशस्तदा विदत्तमित्यादौ आद्यन्तवदेकस्मिन्निति न्यायेन नाम्यन्तोपसर्गस्येति दीर्घः स्यात् ॥ यदि दान्तस्तदा दत्तस्येति नत्वं स्यात् । यदि धान्तस्तदा तथार्थं इति तस्य धः स्यात् । अतस्तु 'दसे चपा' इति थस्य तः ॥ ११४ ॥

स्वरात्तो वा ॥ स्वरादुत्तरस्य दा इत्यस्य वा तो भवति किति तके परे ॥११५॥ प्रकर्षेण दीयते स्मासौ प्रत्त प्रदत्त । अवदीयते स्मासौ अत्त अवत्त ॥ **नाम्यन्तोपसर्गस्य दीर्घो भवति** ॥११६॥ **ददातेस्तो वाच्यः** ॥११७॥ नितरां दीयते स्म तत् नीत्त निदत्तम् । पर्यो समन्ताद्भावेन दीयते स्म तत् परिदत्तम् ॥ **दधातेर्हिर्निष्ठाया वाच्यः** ॥११८॥ धीयते स्मासौ हित । दधाति स्मासौ हितवान् ॥ **जहातेश्च किति** ॥ जहातेर्धातोः किति प्रत्यये परे हिरादेशः स्यात् ॥११९॥ तेन पूर्वं हित्वा । हीयते स्मासौ हित । अहासीदिति हितवान् ॥ **ध्याख्याप्मूर्छिमदां क्तस्य नत्वाभावो वाच्यः** ॥१२०॥ ध्यै चिन्तायाम् । ध्यायते स्मासौ ध्यात ॥ ख्या प्रकथने । ख्यायते स्मासौ ख्यात ॥ पॄ पालने । पूर्यते स्मासौ पूर्त । पोरुर् । य्वोर्विहसे ॥ मूर्छा मोहसमुच्छ्राययोः ॥ **राल्लोपश्छ्वोः** ॥ रेफादुत्तरयोश्छ्वोर्लोपो भवति किति तकारे परे ॥१२१॥ मूर्छ्यते स्मासौ मूर्त ॥ मदी हर्षे । मद्यते स्म इति मत्त ॥ यज देवपूजासङ्गतिकरणदानेषु । यजे क्त । षत्वम् । ष्टुत्वम् । सम्प्रसारणम् । इज्यते स्म तत् इष्ट इष्टवान् ॥

(च०) सूत्रम्—'स्वरात्तो वा' ॥ स्वरात् पञ्चम्येकवचनान्तम् । 'कसिरत' सवर्णे०' तः प्रथमैकवचनान्तम् । स्वार्वि० । वा प्रथमैकवचनान्तम् । 'अव्यया०' ॥ स्वरादुपसर्गात्परस्य दाधातो न इत्यादेशो वा भवति पक्षे वा दत् इत्यादेशो भवति तकारादौ किति परे । दा प्रपूर्व । एकत्र त एकत्र दत् क्तप्रत्ययः । प्रत्तम् प्रदत्तम् । एवम् अवपूर्वे । अवत्तम् अवदत्तं चेति रूपद्वयम् । प्राशयि इति प्रत्तं प्रदत्तम् । उपात्तम् ॥ यज् देवपूजासङ्गतिकरणदानेषु । यज् क्तप्रत्ययः । 'यजां यवराणां०' इति सम्प्रसारणम् । यकारस्य इकारः । 'व्रश्चभ्रस्जादेः ष' इति षत्वम् । 'ष्टुभिः ष्टुः' इष्टम् । क्तवतुप्रत्यये इष्टवान् ॥११५॥

(प्र०) स्वरात्त इति ॥ स्वरपदं स्वरान्तोपसर्गोपलक्षकम् ॥ तेन दत्त इत्यादौ न ॥ ११५ ॥

टुवप् बीजतन्तुसन्ताने । उप्यते स्म तत् उप्तम् ॥ वह प्रापणे । हो

द । तयोर्ध । टि दो लोपे दीर्घश्च । उद्यते स्मासौ ऊढ मार ऊढोऽन-डुहा पशु ॥ वेञ् तन्तुसन्ताने । ऊयते स्मासौ उत ॥ व्येञ् संवरणे । संवीयते स्मासौ संवीत ॥ ह्वेञ् स्पर्धायां । ह्वेञ् आह्वाने । ह्वेञ् कौटिल्ये । सम्प्रसारण दीर्घ । आहूयते स्मासौ आहूत ॥ वद व्यक्तायां वाचि । सम्प्रसारणम् । उद्यते स्मासौ उदित ॥ वच परिभाषणे । उच्यते स्मासौ उक्त ॥ वसिगुध्योरिट् । वस् निवासे । उष्यते स्मासौ उषित । घसादे प । क्षुध बुभुक्षायाम् । क्षुध्यते स्मासौ क्षुधित ॥ ओव्रश्चू छेदने । वृश्च्यते स्मासौ वृक्ण । ओप्र्श्चू छेदने ॥ वेटो निष्ठाया इट् न ॥ १२२ ॥ स्फोरा योश्च सम्प्रसारणम् । स्वाद्येदित इति नत्वम् । षत्वम् । चो कु । प्रवृश्च्यते स्मासौ प्रवृक्ण ॥ जनेर्जा निष्ठायाम् ॥ जनेर्धातोर्जा आदेशो भवति निष्ठायां परत ॥ १२३ ॥ जन जनने । जन्यते स्मासौ जात ॥ खनेरात्व निष्ठायाम् ॥ १२४ ॥ खन खनने । खन्यते स्मासौ खात ॥

(च०) टुवपू बीजसंताने ॥ अचादित्वपन इत्यर्थः । टुकारः ट्वितो थुच् इति कार्यार्थ । वप् क्तवतुप्रत्यय । यजां यवराणां० इति वस्य उ । स्वादीनां० प्रथमैक-वचने । अतोऽम्' उसे वाऽम् । अत्रापि इत्यर्थः ॥ वह प्रापणे । वह क्तप्रत्ययः । यजां यवराणां० इति वस्य उः । हो ढ ' तथार्थ ढ भिढ ' ढि ढा लोप, ढलोप—ऊकारस्य ऊकारः । प्रथमैकवचने स्वादि० उः । अनुडुहा वृषभेण पशुः सहः पुमान् ॥ व्येञ संवरणे । व्ये सवृत । क्तप्रत्यय । कित्त्वात् । यजां यवराणां इति संप्रसारणम् । सम्प्र-सारणे संप्रसारणे दीर्घे च दीर्घः इति व्य इत्यस्य वा । संवीतः ॥ ह्वेञ आह्वाने । आङ् पूर्व क्तप्रत्यय । संप्रसारणम् । ह्वे इत्यस्य हु । प्रथमैकवचने स्वादि० आहूत । आहूतवान् । आहूयते स्म इत्याहूत । आहूतवान् इत्याहूतवान् ॥ वद व्यक्तायां वाचि । वद क्तप्रत्यय. । क्त इडागमः । कित्त्वात्संप्रसारणम् । वस्य उ । प्रथमैकवचने अतोऽम् उदितम् ॥ वच क्तप्रत्यय । सम्प्रसारणम् । चो कु उक्त ॥

जनेर्जा जनी प्रादुर्भावे इत्यस्य जा इत्यादेश । क्तप्रत्यय जात. ॥ एवं खन इत्य-स्य खा आदेश । खात ॥

पचो व ॥ पचे परस्य क्तस्य वो भवति निष्ठायाम् ॥ १२५ ॥ पच्यते स्मासौ वा पाकक्रियया निवृत्त पक्व । पचति स्मासौ पक्ववान् ॥ क्षायो म ॥ क्षाय परस्य क्तस्य मो भवति निष्ठायाम् ॥ १२६ ॥ क्षै क्षये । स एवक्षयामा । क्षायते स्मासौ क्षाम ॥ शुषः कः ॥ शुष परस्य क्तस्य को भवति निष्ठायाम् ॥ १२७ ॥ शुष शोषणे । शुष्यते स्मासौ

मित्यादि । विषद् इति विविद्वान् ॥ एवं भिदिर् विदारणे । भिद् । क्वसुप्रत्ययः । द्वित्वम् । झपानां जबचपाः ' भस्य ब । गुणं पूर्ववत । बिभिद् इति बिभिद्वान् ॥ छ क्वसुप्रत्यय । वस् णत्वादित्वात् द्वित्वम् । 'र.' इति पूर्वकारस्य अकार । 'कुहोश्चु' । चकुरवसशब्दात् प्रथमैकवचने 'विलो नुम्' "सम्महतः" इति दीर्घ । 'हसप०' संयोगान्तस्य लोप ' चकृवान् चकार इत्यर्थ । नासादौ स्वरे तु वस्य उत्वं कृत 'ऋरम्' स्वरहान०' 'किलात्य स' चक्रुष चक्रुषा इत्यादि । आत्मनेपद कानप्रत्यय । आन । द्वित्वम् र' कुहोश्चु ' 'स्वरहानं०' 'ऋवर्णानां०' प्रथमैकवचने 'सोर्वि' चक्राण चक्रे इत्यर्थ । द्वत्वत ॥ पदृ्दविदारणे । 'आद् ष्ण स्न' सद् आङ्पूर्व । क्वसुप्रत्यय । द्वित्वम् पूर्वस्य इमादि०' इति दलोप । 'आर पचा किय चाम्य' इति पूर्वपदस्य लोप अकारस्य एकार । 'कृ३०' इडागम । स्वरहानं०' प्रथमैकवचन नुमादिकं प्राग्वत् । आसदिवान् आसेदिवासौ इत्यादि । शमादौ 'वसावड' 'निमित्ताभावे नैमित्तिकस्याप्यभाव' इति वचनात इगे लोप । स्वरहीनं' 'क्विलात्य स' आसदुष । आसदुषा आसदिव्यामित्यादि । ण्वम वेऽस्यूद्या । क्वसुप्रत्यय । घस एकस्वरम् । ऋ इण् आकारा ताणानि द् वक्तव्य । जक्षिवान् पचिवान् उपसीवान् ददिवान् विद् इन् गम् हशा वा इट । इह भावे गम्धातामकारस्य नकार । यद्वा 'क्वचिद्पदान्त पि पदान्तवत्' इति 'मा नो धातो' विविद्वान् विविदिवान् जघन्वान् जगन्वान् जग्मिवान् ददृश्विान् ददृश्वान् । वाशब्दा व्यवस्थार्थ । विविश्वान् विविशिवान् ॥ १२६-१३२ ॥

(प्र०) णवेरवदिति । यथा परस्मैपदिभ्यो णप् तथा क्वसु । यथाऽऽत्मनेपदिभ्य ए तथा कान ॥ १२६ ॥

शतृशानौ तिप्तेवत् क्रियायाम् ॥ क्रियापदे गम्यमाने सति धातो शतृशानौ प्रत्ययौ भवत वर्तमानेऽर्थे तौ च तिप्तेवत् परस्मैपदात्मने पदयोर्भवत ॥१३३॥ अदे । पचतीति पचन् आस्ते ॥ **अकारानुबन्धस्य नुमागम एव भवति न दीर्घता वक्तव्या** ॥ १३४ ॥ पठतीति पठन् । तिष्ठतीति तिष्ठन् । गायतीति गायन् । गच्छतीति गच्छन् । पिबतीति पिबन् ॥ **मुगानेतः** ॥ अकारस्य आने परे मुगागमो भवति ॥१३५॥ पचतेऽसौ पचमान पिबति वा पठति ॥ यज देवपूजासङ्गतिकरणदानेषु । यजतेऽसौ यजमान स्तौति ॥ मन ज्ञाने । मन्यतेऽसौ मन्यमान ॥ मनु अवबोधन । तनादेरु । मनुतेऽसौ मन्वान परागच्छति । करोतीति कुर्वन् स । त्वदु । कुरुतेऽसौ कुर्वाण । क्रियतेऽसौ क्रियमाण ॥ **उपसर्गस्थ नकारस्य णो वाच्यः** ॥ १३६ ॥ प्रपीयतेऽसौ प्रपीयमाण ॥ **आसेरान ई** ॥ आसेर्धातो परस्य आन आकारस्य ईकारादेशो

भवति । आस् उपवेशने । आस्तेऽसौ आसीन ॥१२७॥

(च०) सूत्रम्–शतृशानौ लिप्तवत् क्रियायाम् । शतृश्च शानश्च शतृशानौ प्रथमाद्विवचनान्तम् । आ औ औ' तिसैवम् अव्यया०' क्रियायां सप्तम्येकवचनान्तम् । आम् च' दिवौ यद् 'सर्व०' । क्रियायां गम्यमाने प्राप्यमाने धातोः शतृशानौ प्रत्ययौ भवत तौ लिप्तवत् भवत । परस्मैपदिनो शतृ । आत्मनेपदिनो च शानच् । उभयपर्दिनाद्भावपि इत्यर्थः । शकारः शित्कार्यार्थः । ऋकारश्च नुम्विधानार्थः एव शतृ स्वया । भव् । अनुवर्तनात् 'अप् कर्तरि स्वरादौ०' अप् अकारः । स्वर० प्रथमैकवचने सिद्धौ नुम्' 'इत्तर ०' संयोगान्तस्य लोप' भवन् भान्त । एवं पद प्रत्यायाविति । पठन् तिष्ठति । नः नश्ठत । नभावरान्ते०' पदेतिष्ठति । पी शब्द । शतृ प्रत्ययः । अत् अप् कर्तरि एभाप्' स्वरादौ०' 'अद०' सिद्धौ नुम्' 'इतर ०' संयोगान्तस्य०' गायन् गच्छति । एवं कुर्वन् कुर्वाणः । सूत्रम्— मुगानत' । मुक् प्रथमैकवचनान्तम् । इवर्ण:०' आने सप्तम्येकवचनान्तम् । 'अ इ ए अतः षष्ठ्येक वचनान्तम् । स्वरादौ०' व्यादिस०' अकारस्य शानप्रत्ययसम्बन्धिनि आकार परे मुगागमो भवति । ककारः स्थाननियमार्थः । उकार उच्चारणार्थ । कुर्वन् पाक । पच् उभयपदित्वात् शानप्रत्यय । भान । 'णिति चतुर्वत् इति । 'अप् कतरि' मुगागम इति मुगागम । किरशप एव अर्थ म् । स्वरादौ०' प्रथमैकवचन व्यादि०' पचमानः पाकार्थं तिष्ठति । एवं यत्र इत्यनुमानिककरणादेषु । यजमानः यत् पर्ती कुर्वन् मन् स्तौति । मन ज्ञाने । शानप्रत्यय । तनादिभ्य उप्रत्ययः । स्वरादौ० उत्पर स्वरादौ०' प्रथमैकवचने व्यादि० मन्वानः मनुत एति मन्वानः । आस उपवेशने । आस । शतृशानौ लिप्त०' इति शानप्रत्यय अप् कर्तरि 'अदादेर्लुक्' । आसनात् ई आसः पञ्चम्येकवचनान्तम् । दिति इत्य' व्यादि०' आन षष्ठ्येकवचनान्तम् । स्वरादौ० । व्यादि० ई प्रथमैकवचनान्तम् । लोकलिपम् । अनुपदं सूत्रम् । आस उपवेशने इत्यस्य धातोः परस्य आनप्रत्ययसम्बन्धिन अकारस्य ईकारो भवति । स्वरादौ०' आसीनः ॥ १२६-१२७ ॥

(प्र०) शतृशानाविति । परस्मैपदिभ्य शतृ आत्मनेपदिभ्यः शान. उभ यदि उभयम् । पचतिति । विविक्तस्यनुद्धत्मावस्याशमवर्षेव ॥ १२६ ॥

पार्वीषो वा तु ॥ अवर्णान्तस्य शतृप्रत्ययस्य वा नुमागमो भवति ईकारे इति च परे ॥१२८॥ तुद व्यथने । तुदत् इति तुदन् तुदतौ तुदन्त । स्त्रीलिङ्गे तुदति सा तुदन्ती तुदती तुदन्त्यौ-तुदत्यौ तुदन्त्य-तुदत्य । नपुंसके तुदतीति तुदत् तुदन्ती-तुदती तुदन्ति । इत्यादि ॥

(च०) सूत्रम्— पार्वीषो तु ॥ वा प्रथमैकवचनान्तम् आद् एकवचनान्तम् । ईकार सप्त० इत्यत्र ईरै तयोः सप्तम्याद्विवचनान्तम् । अकारा० पञ्चम् यदा अव अदा शतृ पञ्चम्येकवचनान्तम् । अन्ता० अ. लिङ्गाद । अकारान्त

चतु पदम् । अवर्णान्तात्परस्य शतृ न्तृप्रत्ययस्य वा नुमागमो भवति नपुंसके ईसौ इति सूत्रात्प्रन इति पर ॥ तुद व्यथने । तुद न्तृप्रत्यय । अन् । 'तुदादेर' 'स्वरहीन' 'अ,' 'स्वरहीन–' तुदत् । नपुंसकात्स्यमोर्लुक्' द्विवचने तुदत् औ इति स्थिते । ईसौ' औस्थाने ई । 'वा दिपो शतु' इति एकत्र नुमागमः । मिदन्त्यात्स्वरात्परो वक्तव्यः 'नश्चापदान्त' 'स्वरहीन०' तुदन्ती पक्षे तुदती व्याकुले ॥ तु,न्ति तु रति तुदत् तुदन्ती तुदती तुदन्ति । स्त्रीलिङ्गे तुदत् ऋकारानुबन्धत्वात् 'स्त्रियाम्' ईवाप् । 'वादिपो शतु' इति एकत्र नुमागम । तुदन्ती तुदती वा स्त्री वर्तते । तुदन्त्यौ तुदत्यौ तुदन्त्य तुदत्य । एव प्रभृतयऽपि नद्यान्दवत् ॥ १३८ ।

(प्र०) वादीपोरिति ॥ ननु तुदतो इत्यत्र गितिचतुवदित्यनेन कृतस्य तुदादेर स्प्रत्ययस्य अद इत्यनेनान्तरङ्गत्वाल्लोप कृतत्वणात्परत्वाभावान्नुम् न स्यात् । उच्यते । प्रत्ययलक्षणेन तत्परत्वमस्त्येव । न चैवं प्रन्वात्यादावतिप्रसङ्ग लुकि न तन्निमित्तमित्यनेन प्रत्ययलक्षणप्रतिषेधात् ॥ १३८ ॥

अप्ययोरान्नित्यम् ॥ अप्प्रत्ययप्रत्ययसम्बन्धिन अकारात्परस्य शतुर्नित्य नुमागमो भवति ईपो परत ॥१३९॥ भवति इति भवन् भवन्तौ भवन्त । भवति सा भवन्ती भवन्त्यौ भवन्त्य । भवति तत् भवत् भवन्ती भवन्ति । पचतीति पचन् पचन्तौ स्त्री । नपुसके पचति तत् पचत् पचन्ती पचन्ति । दिवु क्रीडादिषु । दीव्यति इति दीव्यन् । दीव्यन्ती स्त्री । नपुसके ॥ दीव्यति तत् दीव्यत् दीव्यन्ती दीव्यन्ति । पठतीति पठन् । पठन्ती स्त्री नपुसके पठत् पठन्ती पठन्ति । हसतीति हसन् । हसन्ती स्त्री । हसत् नपुसके । क्लिप्यतीति क्लिप्यन् । क्लिप्यन्ती स्त्री । क्लिप्यत् नपुसके ॥ जयतीति जयन् जयन्ती स्त्री । नपुसके जयत् ॥ **वादीपोः शतुरित्यत्र वाशब्दात् द्विरुक्तानां जक्षादीनां च शतुर्नित्यं नुम्प्रतिषेधो वक्तव्यः नपुंसके शौ वा** ॥१४०॥ ददातीति ददत्-दधत् ददती दधती । जक्ष भक्षहसनयो । जक्षतीति जक्षत् जक्षती जक्षति जक्षन्ति कुलानि ॥ जागृ निद्राक्षये । जागर्तीति जाग्रत् जाग्रती जाग्रन्ति जाग्रति ॥

(च०) सूत्रम्— अप्ययोरान्नित्यम्' ॥ अप च यश्च अप्यौ तयो षष्ठीद्विवचनान्तम् । 'आसि' ए अय' स्वरहीन० सार्वि०' आत् पञ्चम्येकवचनान्तम् । 'हसिरत' सवर्णे० पश्चात् नामिनार 'स्वर०' नित्यम् प्रथमैकवचनान्तम् । 'अन्यथा०' सम धमा वा स्वरहीन०' ॥ 'अप कर्तरि' इति अप्रत्यय । 'दिवादेर्य' इति यप्रत्यय । एतयो सम्बन्धिन अकारात्परस्य न्तृप्रत्ययस्य नित्यं नुमागमो भवति न तु विकल्पेन इकार इति च पर । मकार स्थाननियमार्थ । भू न्तृप्रत्यय अन् । 'अप् कर्तरि' 'गुण'

औ अव स्वरहीनं० अदि स्वरहीनं० दृप्यत इत्याप्प्रत्यय । अप्ययोरानित्यम्' इति नुमागम । भवन्ता ॥ एवं पचन्ता ॥ दिव । दिवादर्थे श्यप्रत्यय । 'स्वार्विहस' इति दीर्घे ऊ० स्वरहीनं० दृप्यत' 'अप्ययोरानित्यम्' इति नुमागम । दीव्यन्ता दृश्यत ॥ एव क्षिप आलिङ्गन क्षिप्यन्ती ॥ द्विरुक्तानां धातूनां विशेषमाह—'द्विरुक्तानां०' जक्ष भक्ष इसनयो चक्ष जागृ दरिद्रा चकास् शास इत्यादीनां च सम्बन्धिनः शतृप्रत्ययस्य मिनो नुम्' तस्य निषेधो वक्तव्य । नुमागमो न भवतीत्यर्थ । उदाहरणम्—दा दाने शतृप्रत्यय अत । अप् कर्तरि हादिभ्य अपलुक् द्विर्त्वं च । ह्रस्व दा' इत्यालोपः । स्वर०' द्विरुक्तानुम्निषेध । प्रथमैकवचने इसप०' ददत् ददतौ ददत इत्यादि ॥ स्त्रीलिङ्गे—ददती ददत्यौ ददत्य । नपुंसके ददत् ददती ददन्ति । द्विरुक्ता नपुंसके वा नुम् तेन ददति ददन्ति इति रूपद्वयम् ॥ डुधाञ् धारणपोषणयोः । धा शतृ प्रत्यय अप् कर्तरि हादिभ्य अपो लुक् द्विर्त्वं ह्रस्व' झषानां जबचशा' पूर्वस्य धस्य द । स्वरहीनं०' प्रथमैकवचने द्विरुक्तानां०' इति नुम्निषेध । दधत् दधती दधत ॥ एव बिभ्रत डुभृञ् भृ शतृप्रत्यय । अत् 'अप् कर्तरि हादिभ्य' रः' झषानां जबचशा भूर्भो लुकि ऋरम्' स्वरहीनं० ॥ ञिभी भये । ञिभी अत अप हादिभ्यच झषानां० ह्रस्व ' नुधातो '। अनेकस्वरस्य० इति यकार । बिभ्यत् ॥ एवं जुह्वत् बिभ्रत् इत्यादयोऽन्यपि हादिभुक्या यङ्लुगन्ता अपि ज्ञातव्याः ॥ जक्ष भक्ष हसनयोः । जक्ष शतृप्रत्यय । अप कर्तरि अदादेर्लुक्' स्वरहीनं०' जक्षान्त्स्वा नुम् निषेध । इसप०' जक्षत् जक्षतौ जक्षत ॥ जागृ निद्राक्षये । जागृ अत् । अप् कर्तरि अदादेर्लुक्' ऋरम्' स्वरहीनं० प्रथमैकवचने इसप ' जाग्रत् जाग्रतौ जाग्रत ॥ १३९-१४० ॥

(प्र०) अप्ययोरिति ॥ ननु अप्ययोरित्यत्र यथा अत इति अवर्ण वक्तु युक्तम् उच्यते ज्ञापनाथमेव निर्देश ॥ प्रत्यये परत क्वचित् प स्वं भवति । तेन तदित्यादि स्यादि सिद्धम् ॥ १३९ ॥

दरिद्रा दुर्गतौ ॥ **दरिद्रातेरालोपो वक्तव्यः ॥१४१॥** दरिद्रातीति दरिद्रत् दरिद्रन्ता दरिद्रति दरिद्रति । चकास्तीति चकासत् चकासती चकासति चकासति । शास्तीति तत् शासत् । अनुशास्ति तत् अनुशासत् ॥ दाद । ददत् ददती ददति ददति । दधत् । इत्यादि ॥ **विदेर्वा वसु ॥** विदेर्धातो शतृविषये वा वसु प्रत्ययो भवति ॥१४२॥ वेत्तीति विद्वान्—विदन् ॥ **भविष्यदर्थे लिङ्वत् शतृशानौ भवत ॥ १४३ ॥** **अत्र भवत्तत्रभवच्छन्दौ पूज्यार्थे निपात्येते ॥१४४॥** अत्रभवन्तो भट्टमिश्रा । पूज्या इत्यर्थः । तत्रभवद्भिर्भगवत्पादैरभिहितम् ॥

(च०) दरिद्रा दुर्गतौ । दरिद्रा अत् । अदादेर्लुक्' दरिद्रातेरालोपो वक्तव्य इत्याकारलोपः । स्वरहीनं० इसप० दरिद्रत् ॥ चकासृ दीप्तौ । चकास् शतृप्रत्यय । अदादेर्लुक् स्वरहीनं० चकासत् ॥ शास् अनुशिष्टौ । शास् अनुशासत् । दद द्विरुक्तानां

"उगिदचां०" इति नुम्निषेधः । इत्यादि ऊह्यम् । आवश्यकं तत्र ... विभाषा विधान ॥ सूत्रम्—'विदो वा वसुः' ॥ विद् पञ्चम्येकवचनान्तम् । ... 'धातोः' । वा प्रथमैकवचनान्तम् । 'अव्ययाः' । वसु प्रथमैकवचनान्तम् । 'धातो०' सिद्धम् । विद ज्ञाने इत्यस्य धातोः शतृप्रत्ययस्य वा विकल्पेन वसुप्रत्ययः भवति । उदाहरणम्—विद् एतत्र वसुप्रत्ययः । विद्वस् इत्यस्य पुंसि प्रक्रिया । विद् नुम् 'स्वमहतां०' 'संयोगान्तस्य०' विद्वान् विद्वांसौ इत्यादि । द्वितीय तु शतृप्रत्यय पुंसत्यकृदन्तप्रक्रिया । विदन् विदन्तौ इत्यादि ॥ अह पूजायाम् शतृप्रत्यय । अह । अप् । 'अह' 'स्वरहीनं०' प्रथमैकवचन सि नुम् 'संयोगान्तस्य लोपः' इत्य० अर्हन् । अत्रभवान् तत्रभवान् इत्येतौ द्वौ शब्दौ उकारानुबन्धौ पूजार्थे पूज्यत्वार्थकस्य निपातौ । शत्रन्तस्य निपातास्मरथः । पूर्वं तत्रभवानत्रभवानिति भगवानित्यस्य निपातनात् उकारानुबन्धत्वात् सि नुम् 'अत्वसः सौ' इति भवति । अत्रभवान् अत्रभवन्तौ अत्रभवन्तः इत्यादि । अत्रभवन् पूज्यः एवं सम्बोधनम् । एवं तत्रभवान् तत्रभवन्तौ तत्रभवन्तः । तत्रभवद्भिः पूज्यैः भगवत्सदृशैस्माभिः भक्तिः कथितः । शतृप्रत्ययपरिहारवतौ निपातौ ॥ १४१-१४४ ॥

शीले तृन् ॥ धातोस्तृन् प्रत्ययो भवति शीले स्वभावेऽर्थे ॥१४५॥ नकार प्रत्ययभेदज्ञापनार्थ । करोतीत्येवंशील कर्ता । विचरतीत्येवंशील विचारिता ॥ णीञ् प्रापणे । नयतीत्येवंशील नेता । धर्ता । म्रियते इत्येवंशील मर्ता । बिभर्तीत्येवंशील भर्ता । शयिता इत्यादि ॥ इति कृत्वादि प्रक्रिया ॥

(च०) सूत्रम्—'शीले तृन्' ॥ शील सप्तम्येकवचनान्तम् अ इ ए तृन् प्रथमैकवचनान्तम् । 'इसप०' ॥ शील स्वभावार्थे धातोः तृन्प्रत्ययो भवति । नकार प्रत्यय पद भेदाज्ञापनार्थ । कृ तृन्प्रत्यय । गुण । जल्तुम्बिकान्यायेन० । प्रथमैकवचन 'स्तु रात्' 'सेरा' डित्वाट्टिलोप । स्वरहीन० करणशील कर्ता ॥ अन्यम् । हृञ् हरणे । हरणशीलो हर्ता । भरणशीलो भर्ता । इति कृत्वादिप्रक्रिया ॥ १४५ ॥

(प्र०) शीलेतृनिति । शील स्वभावेऽर्थे धातोस्तृन्प्रत्ययो भवति । नकार प्रत्यय पद भेदज्ञापनार्थ ॥ १४५ ॥

शीलार्थप्रक्रिया ॥ ४ ॥

अथ शीलार्थप्रक्रिया ॥ **इष्णुस्नुक्नु** ॥ धातोः शीले स्वभावेऽर्थे इष्णु स्नु क्नु इत्येते प्रत्यया भवन्ति ॥१४६॥ कृञ् अलंपूर्व ॥ **अलंकृञ् निराकृञ् प्रजन् उत्पच् उत्पत् उत्पद् ग्रस् उन्मत् रुच् अप त्रप् वृतु वृधु सह चर भू भ्राज् ज्वल्त एभ्य इष्णु** ॥१४७॥ अलङ्करोतीत्येवंशील अलङ्करिष्णु । निराकरिष्णु । प्रजायते इत्येवंशील

प्रजनिष्णु । उत्पचतीत्येवंशील उत्पचिष्णु ॥ पत्लृ पतने । उत्पततीत्येवंशील उत्पतिष्णु । पद गतौ । उत्पद्यते इत्येवंशील उत्पदिष्णुः ॥ प्रसू अदने । प्रसतीत्येवंशील प्रसिष्णु ॥ उन्माद्यतीत्येवंशील उन्मदिष्णु ॥ रुच दीप्तौ । रोचतीत्येवंशीलः रोचिष्णु ॥ त्रपूष् लज्जायाम् । अपत्रपति वा अपत्रपते इत्येवंशील अपत्रपिष्णु ॥ वृतु वर्तने । वर्तते इत्येवंशील वर्ति ष्णु ॥ वृधुङ् वृद्धौ । वर्धते इत्येवंशील वर्धिष्णु ॥ सहति सहते वेत्येवं शील सहिष्णु ॥ चरतीत्येवंशील चरिष्णु । भविष्णु ॥ भ्राजृ दीप्तौ । भ्राजते इति भ्राजिष्णु ॥ **इष्णुप्रत्यये परे ण्यन्तानां णिलोपा भावो वाच्यः ॥१४८॥** कारयतीत्येवंशील कारयिष्णु ॥ एते इष्णु प्रत्ययान्ताः ॥

(च०) सूत्रम्— इष्णुस्नुक्नु' ॥ इष्णुश्च स्नुश्च क्नुश्च इष्णुस्नुक्नु प्रथमैकवचनान्त म् । नपुंसकत्वमार्षम् । ताच्छील्ये इष्णु स्नु क्नु एते त्रय प्रत्ययाः भवन्ति यथायोग्यम् ण्यन्त भ्राज, भू, सह रुच् चर् वृध वृत, प्रजन् अपत्रप् अलंकृञ् निराकृञ उन्मद्, उत्पच् उत्पत एभ्यः इष्णु । उदाहरणानि । कृ अलंपूर्वः । अलंकर्तुं शीलोऽलंकरिष्णु, इष्णुप्रत्यय । गुण स्वरहीनं० निराङ्पूर्वः । निराकरिष्णु निराकर्तुं शीलमस्येति नि- राकरिष्णु । भ्राजुरप्येवम् । प्रस अदने । प्रसिष्णुः उन्मदिष्णु इत्यादि ॥ १४५ ॥

(प्र०) इष्णुरिति । ण्यन्तभ्राजभूसहचरवृधवृतप्रजनरुच्यपत्रपालंकृञ्निराकृञुत्प तोन्मद इष्णु ॥ १४६ ॥

ग्ला जि स्था भू म्ला चि पच् पज् परिमृज् एभ्य स्नुः ॥१४९॥ ग्लै हर्षक्षये । ग्लायतीत्येवंशीलः ग्लास्नु । जयतीत्येवंशी ल जिष्णु । भवतीत्येवंशील भूष्णु ॥ **जिभ्वोः स्नौ गुणाभावो न इट् ॥१५०॥ षेश्च तथा ॥१५१॥** तिष्ठतीत्येवंशील स्थास्नु । क्षि क्षये । क्षयतीत्येवंशील क्षिष्णु । पचतीत्येवंशील पक्ष्णु । मृजूष् शुद्धौ ॥ **मृजेर्गुणनिमित्ते प्रत्यये परे वृद्धिर्वाच्या ॥१५२॥** परिमार्ष्टीत्येवं शील परिमार्क्ष्णुः ॥

(च०) स्था म्ला ग्ला पच् परिमृज जि, भू, एभ्य स्नुः जिभुवोर्गुणः इत्यभा वः । जि जय स्नु स्थप । स्थित्यात्व० अवर्णोपा० पत्व ष्ट । जिष्णुः एवं भूष्णुः स्थास्नु ग्लास्नु पक्ष्णु मार्क्ष्णु ॥

त्रिप त्रस् गृध धृष् क्षिप एभ्य क्नुः ॥ १५३ ॥ विष्लृ व्याप्तौ । वेवेष्टि इत्येवंशील विष्णु । त्रसी उद्वेगे । त्रसी भय । त्रस्यती

नमतीत्येवशील नम्र ॥ कपि चलने । कम्पतीत्येवशीलः कम्प्र ॥ स्मिङ् ईषद्धसते । स्मयते इत्येवशील स्मेर ॥ जसु मोक्षणे । जस् गतिनिवृत्तौ । दिवादि । न जस्यतीत्येवशील अजस्रम् ॥ कामयते इत्येवशील कम्र ॥ हिसि हिंसायाम् । हिनस्तीत्येवशील हिंस्र ॥ दीपी दीप्तौ । दीप्यते इत्येव शील दीप्र ॥

(च०) 'नमादे र' ॥ नम् आदिर्यस्यासौ नमादिः तस्य षष्ठ्येकवचनान्तम् । 'ङिति' 'ङस्य' 'घावि०' प्रथमैकवचनान्तम् । 'सार्वि०' मध्य । 'नामिना र' 'रिकाश दीर्घश्च' ॥ नम् कम् स्मिङ् अजस् कम्प दाप् हिंस् एभ्यो रप्रत्यय । णम् प्रह्वाभाव । 'आदे' ष्ण स्न' नम् रप्रत्यय । 'स्वरहीन०' 'सार्वि०' नमशाला नम्र ॥ एवं कमु कान्तौ कम्र । स्मेर अजस्रम् कम्प्र दीप्र हिंस्र ॥ १६१ ॥

घसादेः क्मरः ॥ घस् सृ अद् एभ्यः क्मर प्रत्ययो भवति शीलेऽर्थे ॥१६३॥ घस्लृ अदने । घसतीत्येवशील घस्मर ॥ सृ गतौ । सृ सरणे । सृ हिंसायाम् । सरतीत्येवशील सृमर ॥ अद् भक्षणे । अत्ती त्येवशील अद्मर ॥ **भिदि छिदि विदि एभ्यः कुरच्वाच्यः शीलेऽर्थे** ॥१६४॥ भिनत्तीत्येवशील । भिदुर ॥ विद् ज्ञाने । वेत्तीत्येव शील विदुर ॥ छिदिर् द्वैधीकरणे । छिनत्तीत्येवशील छिदुर ॥ **भासा देर्घुरः** ॥ भास् भञ्ज भिद् एभ्यो घुर प्रत्ययो भवति शीलेऽर्थे ॥ १६५ ॥ घकारो घित्कार्यार्थं ॥ भासृ दीप्तौ । भासते इत्येवशील भासुर ॥

(च०) सूत्रम्—'घसादेः क्मर' ॥ घस आदिर्यस्यासौ घसादि तस्य षष्ठ्येक वचनान्तम् । क्मर प्रथमैकवचनान्तम् । 'सार्वि०' घसादेर्धातो आदेश क्मरप्रत्ययो भवति शीलार्थे । ककारो गुणनिषेधार्थ । घस्लृ अदने घस् क्मरप्रत्ययः । 'स्वरहीन०' 'सार्वि०' ॥ सृ गतौ । मरप्रत्यय । प्रथमैकवचने 'घावि०' समरः ॥ अद भक्षणे अद् मरप्रत्ययः । 'स्वरहीन० अद्मर ॥ 'भासादेर्घुरः' भास दीप्तौ भञ् भिमिदा स्नेहन एभ्यो धातुभ्यो घुरप्रत्ययो भवति शीलेऽर्थे । घकारो घित्कार्यार्थः । भास् उरप्रत्ययः । 'स्वरहीन० प्रथमैकवचन 'सार्वि० भासनशीला भासुर । भञ्जो आमर्दने भज् 'भापाद० इति उरप्रत्ययः ॥ १६३-१६५ ॥

(प्र०) भासादेरिति ॥ आदिपदात् भञ्जादिग्रहणम् । भङ्गुर इति । भञ्जेः कर्मे कर्तरि । अभिधानस्वाभाव्यमत्र हेतु । छिदुर इति कर्मकर्तर्यपि कश्चित् । भाष्य तु न तथा । एवमाद्या अपि प्रागुक्त एव मुख्यकर्तरि । तथा च माघ— त्रियतमाय वपुर्गुरुमत्सर च्छिदुरयाऽदुरयाचितमङ्गना इति ॥ १६९ ॥

चजोः कगौ घिति ॥ धातोश्चकारजकारयो ककारगकारौ भवतः

षिति प्रत्यये परे ॥१६६॥ भञ्जो आमर्दने। भनक्तीत्येवंशील भङ्गुर। ञिमिदा गात्रविक्षेपे। मेद्यते इत्येवंशील मेदुर ॥

(च)'भञ्जोः कगौ घिति' इति जस्य ग। 'स्यादीनां०' प्रथमैकवचने स्यादि०' भङ्गुर स्वयमेव भज्यत इत्येवंशाला भङ्गुरः। मृदु मृदुर। ञिमिदि विदौ कुरु' ककारो गुणनिषेधार्थ। ञिदुरः भिदुरः विदुर। एते सर्वे प्रत्ययाः शालार्था॥१६६॥

यङ ऊक ॥ यज् जप् दश् वद् एभ्यो यङ्प्रत्ययान्तेभ्य ऊक प्रत्ययो भवति शीलेऽर्थे ॥१६७॥ यङो लुक्। तत्सन्नियोगेन धातोर्द्विवचनम् ॥१६८॥ यज देवपूजासङ्गतिकरणदानेषु। अतिशयेन यजति वा इज्यते इत्येवंशील ॥ अप ॰यवकार्था वाचि। अमजपो लुक्। जञ्जपूक ॥ दश दशने। दंदशूक ॥ वावद्यते इत्येवंशील वावदूक ॥

(च) सूत्रम्—यङ ऊक ॥ यङ' पञ्चम्येकवचनान्तम्। स्यादीनां०' स्यादि०' ऊक प्रथमैकवचनान्तम्। स्यादि० अतिशयार्थे यङ् प्रत्ययान्तेभ्यः शालार्थे ऊक प्रत्ययो भवति। यज् जप् जपू वद् एभ्य इति वक्तव्यम्। यङन्तस्य प्रयोगानुसरणावश्यकत्वात्। अयङन्तस्यापि आगते ऊकप्रत्ययो भवति ॥ सूत्रम्—यङो लुक् ॥ यङ पञ्चम्येकवचनान्तम्। लुक् प्रथमैकवचनान्तम्। इतश्च तस्य ऊकस्य संनियोगे यङ् प्रत्ययस्य लुक् भवति। यायजूकम्। यज देवपूजा०। यज्। अतिशयेन यजतात्येवंशाला यायजूक। अतिशयेन इत्यादयः द्विरवम्। पूर्वस्य इत्यादि०' आत इत्यकारस्य अकारः। यायज्य इति स्थिते ऊकप्रत्यय। यङो लुक्' इति यङो लुक्। स्यादीनां०' स्यादि०' ॥ दश दशने। दश् अतिशयेन दशतीत्येवंशाला इति विग्रहे यङ्प्रत्ययः। ‡ आप द्विरवम्। 'पूर्वस्य इत्यादि' चय। अमजपो लुक नकारागमः दन्दश्यय। लुक् इति यङो लुक्। दंदशूकः सर्पः ॥ जप व्यक्तायां वाचि। जञ्जपूकः। वावदूक ॥ १६७–१६८ ॥

जागर्तेरूको वाच्यः ॥१६९॥ जागर्तीत्येवंशील जागरूक ॥

इण्नशजिसर्त्तिभ्यः क्वरप् वाच्यः ॥१७०॥ इण् गतौ। इस्वस्य पिति। एतीत्येवंशील इत्वर ॥ णश अदर्शने। नश्यतीत्येवंशील नश्वर। जयतीत्येवंशील जित्वर ॥ सरतीत्येवंशील सृत्वर ॥ गत्वरो निपात्यते शीलेऽर्थे ॥ १७१ ॥ गच्छतीत्येवंशील गत्वर ॥ भियः क्रुक्लुकौ वक्तव्यौ ॥१७२॥ बिभेतीत्येवंशील भीरु। भीरुक ॥ इषेः इष्णुश्च ॥ इष्णु प्रत्ययो भवति धान्वादेशश्च ॥ १७३ ॥ इच्छतीति इष्णु ॥ वर ॥ स्था ईश् भास् पिस् कस इभ्यो वर प्रत्ययो भवति शीलेऽर्थे ॥१७४॥ तिष्ठतीत्येवंशील स्थावर ॥

कारकान्वया भवत्येव । तथा च भट्टि —"राघवस्य ततः कार्यं कारुर्वानरपुंगवः । सर्वा नरसनानामादृत्वागमनमादिशत्" ॥ इति । "विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिना" इति मेदिनी । कारुशिल्पिनि कारक इति धरणी । पायुरिति । 'गुदं त्वपानं पायुर्ना' इत्यमरः । पातीति विग्रहे रक्षकोऽपि पायुः । वयति अभिभवति रोगान् इति वायुः । औषधम् । 'भेषजौषधभैषज्यान्यगदो जायुः' इत्यमरः । मायुरिति । 'मायुः पित्तं कफः श्लेष्मा' इत्यमरः । स्वादुरिति । साधुरिति । एतौ त्रिलिङ्गौ । आशुरिति । आशुर्व्रीहिः पाटलः स्यात् । शीघ्रार्थोऽव्ययम् । सनुरिति । सनुराखौ स्त्रियां पुमान्' इत्यमरः । 'सनुर्वाला कुमारकः' इति मेदिनी । आखुरिति । "आखुर्विडालो मार्जारः०" इत्यमरः । क्रोष्टा शृगालः ॥

अवतेर्मुक् ॥ अवतेर्धातोर्मुक्प्रत्ययो भवति ॥ ४ ॥ अवतीति अव रक्ष पालने । कित्त्वात्सम्प्रसारणमुकारः ॥ ओम् ओमौ ओमः ॥ **अतिवृंहिभ्यां मनिण्** ॥५॥ अत सातत्यगमने । सततं अततीति आत्मा वा अतति अखिलजनान्तर्निवासित्वेन सुकृतदुष्कृतकर्माणि पश्यतीति आत्मा ॥

(च०) अव रक्ष पालने । अवधातु रक्षधातुश्च द्वावपि पालने । अव मुक्प्रत्ययः कित्त्वात्सम्प्रसारणम् । कित्त्वकरणसामर्थ्यादेव व्यञ्जनस्यापि वकारस्य सम्प्रसारणं भवति वस्य उ । उ ओ' 'मोनुस्वारः' ओम् । अवतीति ओम् । जनपूर्वः जनान् अवतीति जौनम् । विश्वमवतीति विश्वौम् । जनौ जनौमौ जनौमः जनौममित्यादि । यद्वा । अवतीति ओम् । अव्ययमेतत् । अतधातु सातत्यगमने । निरन्तरगमन इत्यर्थः । अतति सातत्येन गच्छति तांस्तान् भावानित्यात्मा । अत मनिण्प्रत्ययः इकार उच्चारणार्थः । णकारो वृद्ध्यर्थः । मन् 'अत उपधायाः' 'स्वरहीनं०' आत्मन् प्रथमैकवचने 'नोपधायाः' इति दीर्घः । 'हसपः०' । नाम्नो नो०' ॥ ४-६ ॥

बृहि वृद्धौ ॥ **मन्युपधाया ऋ र** ॥ मनिप्रत्यये परे उपधाया ऋकारस्य रेफो भवति ॥ ६ ॥ बृंहतीति ब्रह्मा ॥ **घृधृपदो म** ॥ ७ ॥ घृ क्षरणे दीप्तौ च । घरतीति वा घ्रियते इति घर्मः ॥ धृ धारणे । धरतीति वा ध्रियतेऽसौ धर्मः ॥ पद गतौ । पद्यते तत् पद्मम् ॥ **ऋ स्तु सु हु हु मृ क्षि क्षु भा मा या वा जक्ष रै नी इयैङ् पद् एभ्यो म.** प्रत्ययो भवति ॥८॥ ऋ गतौ । ऋच्छतीति अर्मः नेत्ररोगः ॥ स्तौतीति स्तोमः ॥ षूङ् प्रसवे । सूतेऽसौ सोमः । हुमः ॥ जुहोतीति होमः ॥ म्रियते इति मर्मः ॥ क्षि निवासगत्योः । क्षयतीति क्षेमः ॥ टुक्षु शब्दे । क्षौतीति क्षोमः ॥ भातीति भामः ॥ मातीति मामः ॥ यातीति यामः ॥ वातीति वामः ॥ जक्ष भक्ष हसनयोः । जक्ष्मः । रायतीति रामः ॥ नेमः ॥ इयैङ्

दीप्तौ । श्यायतीति श्याम ॥ पम ॥ भीष्वोर्षा मक् ॥ ९ ॥ बिभेत्य स्मादिति भीम । धूयतेऽसौ धूमः ॥ ध्वादेरुलिक् ॥ ध्वादेर्धातोरुलिक् प्रत्ययो भवति ॥ १० ॥ धूनोति वा धूयतेऽसौ धूलि । अगि लगि रघि गत्यर्थाः । इदितः । अङ्गते सा अङ्गुलि ॥

(च०) दृहि दृहि वृद्धौ । दृह् दृह् । दृंहति वर्धते ब्रह्म । मन्प्रत्ययः । 'मन्युप धाया ऋरः' मनि परे उपधासम्बन्धिन ऋकारस्य रो भवति । दृहस्यस्य न । ब्रह्मणिति सिद्धम् । प्रथमैकवचने नपुंसका०' नाम्नो नो०' पुंलिङ्गे ब्रह्मा स्वयं ब्रह्मत्वात् अन्येषां दृहत्त्वात्प्रापकत्वाद्वा ब्रह्मा । आगमजमनित्यमिति न्यायात् 'इदिता०' इति नुम् न ॥ धम् धारणे च मप्रत्यय । गुणः' रायणा द्विः जलतुम्बिका० । प्रथमैकवचने 'घार्दि०' धारणात् धर्मः ॥ 'ध्वादेरुलिक्' ध्वादेर्धातो उलिक्प्रत्ययो भवति किच । धूञ् कम्पने । धू उलिप्रत्ययः सवर्णे०' धूलिः धूयते वातादिना इति धूलिः । अगि रगि लगि गत्यर्थाः । अग् उलिप्रत्ययः । इदिता०' इति नुमागमः । नश्चापदान्त०' 'स्वरहीनं०' प्रथमैकवचने 'घार्दि०' अङ्गुलिः ॥ ९-१० ॥

(प्र०) ब्रह्मेति । 'ब्रह्म तत्त्वतपो वेदे न द्वयोः पुंसि वेधसि ऋत्विग्योगभिन्ने विप्र' इति मेदिनी । शास्त्रत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापति इत्यमरः ।

भविष्यदर्थे णिनि ॥११॥ आगमिष्यतीति आगामी । भविष्यतीति भावी शसादेः करणे त्रक् ॥ शसादेर्धातोः करणेऽर्थे त्रक् प्रत्ययो भवति ॥१२॥ सर्वधातुभ्यष्ट्रमनो ॥१३॥ शस् हिंसायाम् । शसति वा शस्यते अनेनेति शस्त्रम् । शास् अनुशिष्टौ । शिष्यते अनेनेति शास्त्रम् । असु क्षेपणे । अस्यते अनेनेति अस्त्रम् । पा पाने । पीयते अनेनेति पात्रम् । नीयते अनेनेति नेत्रम् । दाप् लवने । दायते अनेनेति दात्रम् ॥ [(१)युवह्यगिभ्यो नि ॥ १४ ॥ एभ्यो धातुभ्यो नि प्रत्ययो भवति ॥ यु मिश्रणे । यौतीति योनि । वहतीति वह्नि । अङ्गतेऽसौ अग्नि ॥ इदिचदिशकिरुदिभ्यो रः ॥ एभ्यो रप्रत्ययो भवति ॥ १५ ॥ इदि परमैश्वर्ये । चदि आह्लादने दीप्तौ च ॥ इन्दत्यसौ इन्द्रः । चन्दतेऽसौ चन्द्र । शक्नोतीति शक्र । रोदितीति रुद्र ॥ पुष्पादेरः ॥ पुष्पादेर्धातोर प्रत्ययो भवति ॥१६॥ पुष्प विकसने । पुष्पति तत् पुष्पम् । फल निष्पत्तौ । फलति तत् फलम् । मूल व्याप्तौ । मूलति तत् मूलम् ॥ रघ सामर्थ्ये ॥ उप्रत्ययः ॥ १७ ॥ रघते शास्त्राणां शत्रूणां च अन्ते गच्छति प्राप्नोतीति रघु ॥

---

(१) अस्य व्याख्यानमग्रे पृष्ठायां विद्यते ॥

मन ज्ञाने । मन्यते इति मन्त्र ॥ यम उपरमे । यच्छतीति यन्त्र ॥ छदि संवरणे । ण्यन्तः । छादयतीति छत्रम् ॥ क्रियते तत्कर्म ॥ वृञ् आच्छादने वृणोतीति वर्म । मर्म । दाम । धर्म । छादयतीति छद्म ॥ **धनार्तिचक्षिङ्तपिवपितपिजनिपयजिभ्य उस् प्रत्ययो भवति ॥ ३१ ॥** धन शब्दे । धनतीति धनु ॥ ऋ गतौ । गुण । अरु ॥ चक्षिङ् व्यक्तायां वाचि । चष्टे इति चक्षुः । पिपर्तीति परु । वपतीति वपु । तपतीति तपु । जायते इति जनुः । यजतीति यजु ॥ **अवतृस्तृतन्त्रिकण्ठिभ्य. ई. ॥ ३२ ॥** अवतीति अवीः । तरतीति तरी स्तृञ् आच्छादने । स्तृणोतीति स्तरी । तन्त्रि धारणे । तन्त्रयति वा तन्त्र्यते सा तन्त्री । कण्ठ अवधारणे । कण्ठयतीति कण्ठीः ॥

(ध०) 'वचादसुन्' ॥ वच् असुप्रत्यय । 'स्वरहीनं०' प्रथमैकवचने 'नपुंसकात्स्यमोर्लुक्' 'सार्वि' वच वचसी वचांसि । एवं मह दीप्तौ । महः । उच्यत इति वचः । मह्यत इति महः ॥ कादीनामिः । कु शब्दे । इप्रत्ययः । कवीति कविः । पुनातीति पविः । हरतीति हरिः । मनेरुच्च' मन ज्ञाने इत्यस्य इप्रत्ययः अकारस्य चाकारः । मनुते तत्त्वमिति मुनिः ॥ मुहो रः मुराद्देशश्च । मुह्यतीति मूर्खः ॥ 'पुरः कुषन्' पृ पालनपूरणयोः इत्यस्य कुषन् प्रत्यय । पृ उप्रत्ययः । पारः' पिपर्ति पूर्यते वा पुरुषः ॥ माप्रभृतिभ्य स । मायत इति मास । ददात्यस्मात् वासः ॥ माप्रभृतिभ्यो यः । मातीति माया । जायते अपत्यमिति जाया । जनजादेशः । 'दधातर्य नुट्' दधाति स्थापनाति धान्यम् ॥ पतिचण्डिभ्यामालच । वृद्धिः पतत्यस्मिन्निति पातालम् । चण्डि कोपे चण्डालः ॥ भजादिभ्यः ऊः । भज व्यथने । भजूः ॥ वहश्च । वहति गृहभारं वधूः । अवितृस्तृतन्त्रिभ्य ईः । अवी तरी तन्त्री ॥ ऊतियूतिजूतिसातिहेतिकीर्तयश्च निपात्यन्ते । अवनम् ऊतिः । यु मिश्रणे । यूतिः । हन्यत अनयेति हेतिः । कीर्तनं । कीर्तिः ॥ नृतिशृभ्यां शः । शृ हिंसायाम् । हिंसनशीलः शरारुः । वन्दनशीलो वन्दारुः । वर आदेश यश । इन्निडा० इति नुम् स्वरहीनं० ॥ भृमादिभ्यः पण् । बुभूषु पशुर्घ्यय । वृद्धि । उपन्तुभिर्कार० । भ्रियत इति भार्या । एवं श्रु गतौ । भार्या धारयति ॥ हुवहशक्तिभ्यो नि वानि वह्नि अग्नि ॥ इगुपधशकिभ्यः ः । इन्द्रः शक्रः । वज्र इत्यादि ॥ ४१ ३० ॥

(प्र) यथ इति । भाव स्यात् धारणाया इति मदिनी । मंथतीति । 'स्यात् मान्नगर्भपार्थिव' इत्यमरः । ख्यातीति । ख्याति प्रायिकाले सम्प्रदाय इत्यमरः । हविर्नवम् ।

सोऽकप् केलिन ॥३३॥ शुभन मिपत यद् निर्देशिन वा मेघु

सुकर भिदेलिम । किं ' काष्ठम् । सुखेन पच्यन्ते इति पचेलिमा आढक्य वा पक्तु सुकरा पचेलिमा के ' तण्डुला ॥

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥ १ ॥
उणादयोऽपरिमिता येषु सङ्ख्या न गम्यते ।
प्रयोगमनुसृत्यादौ प्रयोक्तव्यास्ततस्ततः ॥ २ ॥

इति कृदन्ते उणादिप्रक्रिया ॥ ५ ॥

(च०) 'सौकर्ये केलिम ' ॥ सुखेन क्रियते इति सुकरम् तस्य भावः सौकर्यं तस्मिन्नर्थे केलिमप्रत्ययो भवति । ककारो गुणनिषेधार्थः । एलिम इति । भिदिर् विदारणे । सुखेन भिद्यते इति विग्रहे एलिमप्रत्यय । स्वरहीनं०' प्रथमैकवचने अतोऽम्' भिदेलिमं काष्ठम् । एवं एलिमप्रत्ययः स्वरहीनं०' 'आपतः स्त्रियाम्' प्रथमाबहुवचने जस् । 'पच धातुं०' सुखेन पच्यन्ते इति पचेलिमा' आढक्यः आढकी धान्यविशेषः ॥ उणादयः [illegible] उणादय प्रत्ययाः अपरिमिताः संख्यारहिता इत्यर्थः । ये एव प्रयोगाः संभवन्ति तत्र तं प्रयोगमनुसृत्यादौ वा प्रयोगानुसारेण प्रयोक्तव्या इत्यर्थः ॥१॥ इत्युणादयः॥५॥

(प्र०) सौकर्येति । धातोः कर्मणि केलिमः प्रत्ययः स्यात् ॥ ११ ॥

इति पूर्वकृदन्ते प्रसादचन्द्रकीर्त्त्युणादिप्रक्रिया ॥ ५ ॥

भावाधिकारप्रक्रिया ॥ ६ ॥

तुम् तदर्थायां भविष्यति ॥ धातोर्भविष्यति काले तुम् प्रत्ययो भवति तदर्थायां क्रियायां प्रयुज्यमानायाम् ॥१॥ भुज पालनाभ्यवहारयोः । भोक्ष्यत इति भोक्तु व्रजति । पठिष्यतीति पठितु इष्टे । स्तोष्यतीति स्तोतु ईहते । स्थातु ईहते ॥ तुमर्थे णुण् वा कर्मणः ॥२॥ द्रक्ष्यतीति द्रष्टुम् । कृष्णं द्रष्टु व्रजति । कृष्णदर्शको व्रजति ॥

(च०) 'तुम् तदर्थायां भविष्यति' ॥ तुम् प्रथमैकवचनान्तम् । स एवार्थो यस्या सा तदर्था तस्यां सप्तम्येकवचनान्तम् । [illegible] भविष्यति सप्तम्येकवचनान्तम् । स्वरहीनं ॥ धातोर्भविष्यति काले तुम्प्रत्ययो भवति [illegible] तुम्प्रत्ययो भवति स एव [illegible] यस्या सा तस्यां [illegible] क्रियायां [illegible] ॥ भुज पालनाभ्यवहारयोः । भुज तुम्प्रत्यय । [illegible] तुम्प्रत्ययान्तोऽव्ययम् । । [illegible] व्रजति [illegible] क्रिया प्रयु

[illegible] इति सर । [illegible] इति [illegible] । 'पुष्प' [illegible] [illegible] ॥ ६ ॥

मदादेः ॥ मदादीनां अ[illegible] भवति [illegible] कर्तरि [illegible] [illegible] । [illegible] मदन मद । [illegible] मनेनेति मदः । [illegible] [illegible] सा [illegible] । [illegible] पान पन ॥ [illegible] । [illegible] [illegible] ॥ [illegible] । [illegible] इति [illegible] । [illegible] ॥ [illegible] । [illegible] इति [illegible] । [illegible] [illegible] ॥ [illegible] ॥ सिद्धे वर्णविपर्ययश्च ॥१०॥ [illegible] । [illegible] सिद्ध ॥

([illegible]) [illegible]—'मदादेः' [illegible] [illegible]

[illegible]

[illegible]

भप्रत्ययः । यतान्तः । 'अरे' स्वराद्यन्तो० प्रथमैकवचने 'सार्वि०' कठिनं दधि दधिघनः । परिच्छिन्नमवावस्त्वार्क वा सैन्धवं सैन्धवघनः ॥ १२ ॥

ट्वितोऽथुः ॥ ट्वितो धातोरथु प्रत्ययो भवति भावादौ ॥१३॥ टुवेपृ कम्पने । वेप्यते अनेनेति वेपथु ॥ टुनदि समृद्धौ । नन्द्यते अनेनेति नन्दथुः ॥ टुवप् बीजतन्तुसन्ताने । उप्यते इति वेपथु ॥ टुक्षिप्र क्षेपणे । क्षिप्यते अनेनेति क्षेपथु । टुओश्वि गतिवृद्ध्यो । श्वयथु । टुक्षु शब्दे । क्षुयते इति क्षेपथु । टुवम् उद्गिरणे । वमथु ॥

(च०) सूत्रम्—'ट्वितोऽथु' ॥ टु इत्यस्य स ट्वित्, तस्मात् पञ्चम्येकवचनान्तम् । स्वराद्यन्तो० सार्वि०' अथुः प्रथमैकवचनान्तम् । सार्वि०' अतोऽस्तु' उ आ' पुरातोऽत ॥ टु इत्यस्य स तथा धातो अथुप्रत्ययो भवति भाव । टुवेपृ कम्पन । वप् अथुप्रत्यय । स्वराद्यन्त०' प्रथमैकवचने सार्वि०' वेपथु ॥ एवं क्षिप प्रेरण । क्षेपथुः ॥ टुणदि समृद्धौ । नन्थु दवथुः ॥ टुक्षु शब्द । क्षवथुः ॥ टु ओश्वि गतिवृद्ध्या । श्वयथु ॥ टुवम् उद्गिरण । वमथु ॥ १३ ॥

ड्वितस्त्रिमक् तत्कृते ॥ ड्वितो धातोस्त्रिमक् प्रत्ययो भवति तेन धात्वर्थेन कृतेऽर्थे वाच्ये सति ॥१४॥ क्रियया निर्वृत्त कृत्रिम घट । सभारेण सम्भृत वा निवृत्त सम्भृत्रिम युद्धम् । पाकेन निवृत्त पक्त्रिम फलम् । याचनेन निर्वृत्त याचित्रिम किं ? विग्रघनम् ॥

(च०) सूत्रम्—'ड्वितस्त्रिमक्' ॥ ड्वित पञ्चम्येकवचनान्तम् । स्वराद्यन्तो०' सार्वि० त्रिमक् प्रथमैकवचनान्तम् । इसप' तत्कृते सप्तम्येकवचनान्तम् । ड इ प ॥ डु इत अनुबन्धो यस्य स ड्वित् तस्माद्धातो त्रिमक् प्रत्ययो भवति तेन धात्वर्थेन साधनभूतेन कृत निष्पन्नेऽर्थे वस्तुनि वाच्य सति । कृ । क्रियया कारणेन निवृत्तो निष्पन्न इति कृत्रिम अस्वाभाविका घटः । अत्र कृधातोरर्थे कर्म तेन कृतो निष्पन्नो यो घटस्तदर्थे पदार्थस्तस्मिन् वाच्य सति त्रिमक् प्रत्यय । ककारो गुणनिषेधाय प्रथमैकवचने सार्वि० ॥ एव डुभृञ् धारणपोषणयो । सम्पूर्व त्रिमकप्रत्यय । प्रथमैकवचने 'अतोऽम्' संभारेण जनसमूहेन निवृत्त संभृत्रिमं युद्धम् ॥ डुपचष् पाके । पच त्रिमकप्रत्यय । चो कु स्वराद्यन्तो० प्रथमैकवचने । अतोऽम् पाकेन निवृत्त निष्पन्नं पक्त्रिमं फलम् । एवं पवित्रिम आम्र ॥ १४ ॥

(प्र०) तत्कृत इति । तेन धात्वर्थेन कृतस्तत्कृतस्तस्मिन्नित्यर्थः ।

नङ्कौ ॥ धातोर्नङ्की इत्येतौ भवत भावादौ ॥१५॥ यज् याच् यत् विच्छः प्रच्छ स्वप् एभ्यो नङ् प्रत्ययो भवति ॥ १६ ॥ स्नौ श्चुभि श्चु । असम्प्रसारणम् । इज्यते अनेनेति यज्ञ । याच्यते सा याच्ञा । यती प्रयत्ने यत्यते तत् यतन यत्न ॥

[illegible]

... इति कृदन्ते भावाधिकारप्रक्रिया ॥ ६ ॥

[illegible]

कृदन्तप्रक्रिया ॥ ७ ॥

अथ कृदन्तप्रक्रिया ... [illegible]

[illegible]

(प्र०) तव्यानीयावितिि। कृत्याः पञ्च समाख्याताः [illegible] भावकर्म तव्यानीयौ स्वरायश्च कल्पिताः कर्मकर्तरि' ॥ १ ॥

स्वराद्यः ॥ स्वरान्ताद्धातोर्य प्रत्ययो भवति भावादौ ॥ २ ॥ [illegible] वा चेतुमर्हं चेयम्। नेयम्। जेयम् मीयते तत् मेयम् ॥ असरूपोऽपवा[illegible] प्रत्ययोऽस्त्रिया वा बाधकः सरूपस्तु नित्यम् ॥ ३ ॥ ची[illegible] वा चेतुमर्हं चतव्य चयनीयम्। चिकीर्ष्यते वा चिकीर्षितुमर्हं चिकीर्षम्[illegible] दातुमिच्छतीति दित्सति वा दित्स्यते इति दित्स्यम् ॥ क्षय्यजय्यौ श[illegible] क्यार्थ निपात्येते ॥४॥ क्षेतु शक्य क्षय्यम्। जेतु शक्य जय्यम्। मन्य[illegible] क्षेय पाप जेय मन। क्षय्यजय्यौ चेति चकारादजर्यमिति निपात्यते। [illegible] जीयतीत्यजर्यं सगतम् ॥

(च०) सूत्रम्— स्वराद्यः ॥ स्वरात् पञ्चम्येकवचनान्तम्। [illegible] य प्रथमैकवचनान्तम्। सो० [illegible] [illegible] विम वचने। यप्रत्यये गुण प्रथमैकवचने [illegible] गुणकारः [illegible] प्रापणे। [illegible] भावप्रत्यय। गुण [illegible] निपात्यत। क्षेतुं शक्यं [illegible] वा क्षय्यम्। जेतुं शक्यं [illegible] वा जय्यम्। [illegible] स्यत। कश्चित्तु क्षय्यजय्यौ निपात्यौ [illegible] क्षेतुं शक्यं [illegible] जेतुं शक्यं [illegible] म्। पक्षे जेयं जयम् ॥ १–३–४ ॥

(प्र०) स्वराद्य इति। [illegible] [illegible] इति [illegible] । अत्र स्वरपदस्य [illegible] । [illegible] स्वरान्तत्वाभाव। यदि तु [illegible] [illegible] इति च [illegible] स्वरग्रहणम्। [illegible] [illegible] [illegible] ॥ ० ॥

इदन्ताम ॥ अकारा[illegible] धातो[illegible] प्रत्यय भवति [illegible] ॥ ५ ॥ दीयते वा दातुमर्हं देयम्। [illegible] धीयते तत् [illegible] पातुमर्हं पेयम् धीयते तत् धेयम् ॥

(च०) सूत्रम्— इदन्ताम [illegible]

[illegible]

पुरस्कात् ॥ [illegible]

ओरावश्यके घ्यण् ॥ उवर्णान्ताद्धातोरावश्यकेऽर्थे घ्यण् प्रत्ययो भवति ॥११॥ **ओदौतोर्यः प्रत्ययः स्वरवत् ॥** धातोरोकारौकारयो र्निमित्त वा सम्बन्धी य प्रत्यय स स्वरवत् स्यात् ॥१२॥ समासे अवश्य मादीनामन्तलोपमिच्छन्ति शाब्दिका ॥

लुम्पेदवश्यम कृत्ये तुकाममनसोरपि ।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ॥ १ ॥

लूञ् छेदने । लूयते वा लवितु योग्य लाव्य । अवश्य लाव्यो मत श्यलाव्य । भोक्तु कामो यस्य स भोक्तुकाम । श्रोतु मनो यस्य स श्रोतु मना । सम्यक्प्रकारेण हित सहित सहितम् । सतत सततम् । मांसस्य पचन मांसपचनम् । युड्घञो पचि परे मांसस्याकारो वा लुम्पेत् । मांसस्य पचन मांसपचनम् । मांसस्य पाक मांस्पाक मांसपाक ॥

(च०) 'ओरावश्यके घ्यण् ॥ ओ पञ्चम्येकवचनान्तम् । 'ङिति' 'हस्व 'स्वार्वि०' आवश्यक सप्तम्येकवचनान्तम् । स्वरहीनं०' ॥ उवर्णान्ताद्धातो आवश्यक ऽर्थे घ्यण्प्रत्ययो भवति भावादौ । लू घ्यण्प्रत्यय । य णकारो वृद्ध्यर्थ । लौ अवश्यं पूर्व । 'आगौतोर्य प्रत्यय स्वरवत्' आश्च औश्च ओदौत् तस्मात् । आकारौकाराभ्या परो यप्रत्ययस्य यकार स्वरवत् ज्ञेय । स्वरवत्त्वात् 'औ आव्' 'स्वरहीनं०' अवश्यं भाव्यम् । एव लूञ् छेदने । अवश्यं लाव्यम् । मकारलोपमाह—समासे सति अवश्या दीनाम् अवश्य, तुम्, सम्, मांसानां मलोपमिच्छन्ति । मश्च अश्च म । इति समास स्तेन मकारलोप । यद्वा अन्तलोपमिच्छन्तीति पठन्ति । श्लोकार्थ—लुम्पेदिति । कृत्य प्रत्यये परे अवश्यशब्दस्य षष्ठ्यानिर्दिष्टस्येति अन्त्य मकार लुम्पेत् । व्याख्या । तव्य, अनीय, य, घ्यण, क्यप, एतेषां पञ्चप्रत्ययानां कृत्यसंज्ञा ॥ तथा काममनसो शब्दयो परयो तुम्शब्दस्यान्त्य मकारं लुम्पेत् । तुमिति षष्ठ्यन्तमव्ययम् ॥ हिततत एतयो परयो सत सममित्यस्य मकार वा लुम्पेत् ॥ युट्प्रत्ययसहित घञ्प्रत्ययसहित च पचि धातौ परे मांसशब्दस्य अन्त्य मकारं वा लुम्पेत् विकल्पेन ॥ कृत्यसंज्ञायां संगतिमाह—तव्या० । पाणिनीयाना मते तव्यादीना कृत्य इति संज्ञा । अवश्यं लाव्यमित्यत्र तव्य-प्रत्ययपरत्वात् अवश्यशब्दस्य मकारलोप । अवश्यलाव्यमिति सिद्धम् । अवश्यं निश्च यन लवितुं योग्योऽवश्यलाव्य ॥ तथा भुज तुम्प्रत्यय । उपधायाश्च' गुण । चो कु । स्वरहीनं० भोक्तुं कामोऽभिलाषो यस्य स भोक्तुकाम ॥ तथा श्रु श्रवणे । तुम् प्रत्यय । गुण श्रोतु मनो यस्य स श्रोतुमनाः । अत्रोभयत्रापि काममनसो सतो तुमो मकारलोप ॥ डुधाञ् गतौ । सम्पूर्व । 'क्तक्तवतू' इति क्तप्रत्यय । 'स्थामि' इकार सहितम् । समो वा इति विकल्पेन समो मकारलोपः सहितम् । तनु विस्तारे । क्त प्रत्यय । 'लोपस्त्वनुदात्त०' सम्पूर्व । स तत सततम् । अत्रापि ततशब्दे परे विकल्पेन

स्मात् मकारलोपः ॥ पच् पुरुषस्य च। पुरुषस्यकौ 'प्स्वरादीनं०' मांसपुरुः। पुरुषस्य च सहिते पचिधातौ परे विकल्पेन मांसशब्दस्याकारलोपः। मांसपचनं मांस्पचनम्। पुनः पच 'घञ् भावे' इति घञ प्रत्ययः। अ वृद्धिः। 'चजोः कुगौ घिति' 'प्स्वरादीनं०' पाक मांसपूर्वे। अत्र घञप्रत्ययसहिते पचि धातौ परे विकल्पेन मांसशब्दस्याकारलोपः। मांसपाकः मांस्पाकः इति रूपद्वयम् ॥ केचित्तु मांसशब्दस्य मकारस्य तथास्यस्याकारस्य स्वर्गमिच्छन्ति। यथा मांस्पाकः ॥ इति ॥ ११—१२ ॥

(प्र०) आदीतारिति। धातितार्थेऽस्यापि कश्चिद् प्रयोगो दृश्यते अतश्च प्रत्यना दारादिस्यत आह—अवरपकाश्वमिति।

ऋदुपधात् क्यप् ॥ ऋकारोपधाद्धातो क्यप् प्रत्ययो भवति भाव कर्मणोः ॥१३॥ कृती छेदने। कर्तितुमर्हं कृत्यम्। नितरां कर्तितुं योग्य निकृत्यम्। वृद्धयम्। वृत्यते तत् वृत्यम् ॥ कृपिचृत्योर्न क्यप् ॥१४॥ कृप् सामर्थ्ये। कृपो रो लः। कल्पितुं योग्य कल्प्यम्। चृत दीप्तौ। चर्त्यम् ॥ मृजो वा क्यप् ॥१५॥ मृज्य मार्ग्यम् ॥ ह्रस्वाच्च क्यप् ॥ ह्रस्वान्ताद्धातोर्भावे क्यप् प्रत्ययो भवति ॥१६॥ तस्य प्रहणे तद्-तस्य प्रहणम्। क्रियते तत्कृत्यम् ॥ कृञः क्यपि वा रिङ् वक्तव्य तुगभावश्च ॥१७॥ कृत्या क्रिया ॥ ङिदनेकाच्चरोऽप्यादेशस्तदन्तस्यैव च वक्तव्यः ॥१८॥ गुपगुहो क्यप् ॥१९॥ गोप्तुं योग्य गुप्यम्। गूहितुं योग्य गुह्यम् ॥ वदेः क्यप् भावादौ ॥ वदेर्धातो क्यप् प्रत्ययो भवति भावादौ ॥ २० ॥ मृषा उद्यते इति मृषोद्यम्। ब्रह्मणा उद्यते या कथा सा ब्रह्मोद्या ॥ गृहे क्यप् ॥ अर्जुनगृह्या सेना ॥२१॥ भुवो भावे क्यप् ॥ नाम्नि उपपदे भुवः भावे क्यप् प्रत्ययो भवति ॥२२॥ ब्रह्मणो भाव ब्रह्मभूय गत। ब्रह्मणा भूयत तत् ब्रह्मभूय गत। नाम्नि किम्। भवितव्य भव्यम् ॥ (१)स्यै ष्ट्यै शब्दसङ्घातयोः। स्त्यायतेर्ड्रट् ॥२३॥ डित्वाट्टिलोप। सयोगान्तस्य लोप। टित्वान्ङीप्। स्त्यायति समूहं करोति सा स्त्री। लक्ष दर्शनाङ्कनयो ॥ लक्षेरी मुट् च ॥२४॥ लक्षतर्धातोरी प्रत्ययो भवति तस्य मुडागमश्च। लक्ष्यते पुमाननया सा लक्ष्मी ॥

(च) सूत्रम्— ऋदुपधात्क्यप् ॥ ऋत् ऋकार उपधा यस्य स ऋदुपधस्तस्मात् पञ्चम्येकवचनान्तम्। इसिरन्त सवर्णे क्यप प्रथमैकवचनान्तम्। इमप ऋकारोपधात् वृतु वर्तने इत्यादेर्धातो क्यप्प्रत्ययो भवति भावादौ। ऋकारो गुणनिषेधार्थ। कृती छेदने। कृत् क्यप्प्रत्यय। स्वादीन प्रथमैकवचन अतोऽम् नि पूर्वे।

(१) पाठोऽयमुणादिप्रक्रियायाः।

नि.कृत्यं नितरां कृत्यते नि कृत्यम् ॥ चृतु वतन । वृत्य नृत्यम् । 'ह्रस्वाच्च' क्यप्प्रत्ययः भवति' पित्त्वात् 'ह्रस्वस्य पिति कृति तुक्' इति तुगागम । ष्टुञ् स्तु क्यप्प्रत्ययः । ह्रस्वस्य पिति कृति तुक्' कृत्यं स्तुत्यम् । 'भुवो भाव क्यप्' भूधातोर्भावे शब्दप्रवृत्तिनिमित्ते क्यप्प्रत्ययो भवति । कित्त्वाद्गुणो न । क्यप्प्रत्यय । ब्रह्मपूर्व । प्रथमैकवचन 'अतोऽम्' ब्रह्मभूयं ब्रह्मणो भाव । ब्रह्मत्वं गत प्राप्त इत्यर्थ । एव देवभूयं देवत्वम् ॥ २२ ॥ ['स्त्यायतेड् ट्' स्त्यायतधातो स्त्रीत्व वाच्ये ड्रट्प्रत्ययो भवति । डकारष्टिलोपार्थे । ष्ट्यै स्त्यै शब्दसंघातयो । शब्दार्थे समूहार्थे च स्त्य ड्रट्प्रत्यय । डित्वाट्टिलोपः 'संयोगान्तस्य०' इति यलोप । 'स्वरहीन०' 'द्विरस्त' इताप् । प्रथमैकवचने 'हसे०' स्त्री 'लक्षेरी मुट् च' लक्षधातो इप्रत्ययो भवति तस्य च मुडागम । लक्ष दर्शनाङ्कनयो । लक्ष इप्रत्यय । मुट् । टित्वादादौ । 'स्वरहीन०' 'ग्रोर्वि०' लक्ष्यत इति लक्ष्मी । अत्र ईबन्तत्वाभावात्सलोपो न ॥ २४]

इण् स्तु धृ दृ भृ शास् जुष् खन् एभ्यः क्यप् वाच्यः ॥२५॥ तुक्, ईयते इति इत्य । स्तुत्य । वृत्य. । दृङ् आदरे । दृत्य । भृत्य । शासेरि शिष्य । जुष् प्रीतिसेवनयो । जुष्य ॥ **खन एत्वं क्यपि वाच्यम् ॥२६॥** ख यते इति खेयम् ॥ **भिद्योद्ध्यौ नदे निपात्येते ॥२७॥** भिनत्ति कूलमिति भिद्य । उज्झ उत्सर्गे । उज्झति जलमिति उद्ध्य नद । नदे किम् । भेत्ता उज्झिता ॥ **कृवृष्योर्वा क्यप् ॥२८॥** क्रियते तत् कृत्यम् । कर्तुं योग्य कार्यम् । वृष वृष्टौ । वृष्यम् । वर्ष्यम् ॥ **य एते भावकार्ययोर्विहितास्तव्यादयस्तेऽर्हविधौ च वक्तव्याः ॥२९॥** दृशो प्रेक्षे दृशाम् । दर्शनार्हो द्रष्टव्य । द्रष्टुमर्ह दर्शनीय दृश्य । इङ् अध्ययने । स्वाध्यायोऽध्येतव्यः । स्वाध्यायो नाम वेद । श्रु श्रवणे । श्रवणार्हः श्रोतव्य । श्रोतु योग्य श्रवणीयम् । मान पूजायाम् । मानितु योग्यो मानितव्य माननीय । ध्यै चिन्तायाम् । ध्यानार्हो ध्यातव्य । ध्यातु योग्यो ध्यानीय । मन ज्ञाने । मननार्हो मन्तव्य । मन्तुं योग्यो मननीय ॥ **सन्प्रत्ययान्तादपि एते प्रत्यया भवन्ति ॥३०॥** निदिध्यासितव्य । ध्यातुमेष्टव्यो निदिध्यासितव्य । भवितुमेष्टव्यो बुभूषितव्य बुभूषणीय । तव्यानीयौ क्यप्ध्यण्यताः ॥

कृत्या पञ्च समाख्याता ध्यण्क्यपौ भावकर्मणोः ।
तव्यानीयौ स्वराद्यश्च शब्दशास्त्रविचक्षणैः ॥ २ ॥

॥ इति कृत्यप्रक्रिया ॥ ७ ॥

(३०) निष्पादयितिनि । घस्र निरासम् ।

स्त्रीप्रत्ययाधिकार ॥ ८ ॥

अथ स्त्र्यधिकार ॥ **स्त्रियां यजां भावे क्यप्** ॥ यजादेर्धातोः स्त्रियां भावे क्यप् प्रत्ययो भवति ॥१॥ यज् व्रज् समज् निषद् निपत् मन् नम् विद् षुञ् शाङ् भृञ् इण् कृ इषु परिसर परिचर अटाट्य आस् चर् जागृ हन् एते यजादय ॥ किस्वात्सम्प्रसारणम् ॥ इज्यते सा इज्या । स्त्री त्वाटाप् ॥ व्रज्यते सा व्रज्या ॥ अज गतौ क्षेपणे च । समज्यते सा समज्या शिविका ॥ प्रकर्षेण व्रज्यते अस्यामिति प्रव्रज्या ॥ षद् विशरणगत्यवसाद- नेषु । निषद्यते सा निषद्या ॥ निपत्या ॥ मन ज्ञाने । मन्यते सा मन्या ॥ नम्या । विद्यत सा विद्या । सुत्या ॥ **शीङोऽपद् क्ङिति ये वक्तव्य** ॥२॥ शय्या । भृत्या । ईयते सा इत्या । कृत्या ॥ **कृञो यक् वा वाच्य** ॥३॥ 'अयांकि' । क्रियते सा क्रिया ॥ **इषेश्छान्तादेशो यलोपश्च** ॥ ४ ॥ इष्यते सा इच्छा ॥ **सरतेर्गुण** ॥ ५ ॥ परिसर्या ॥ परिचर्या । अटाट्या । आस्या । चर्या ॥ **जागर्तेर्गुण** ॥६॥ जागर्या । हन्यते सा हत्या ॥ **हन्तेस्तः** ॥ हन्ते र्नकारस्य तकारादेशो भवति क्यपि स्त्रियाम् ॥७॥ ब्रह्म हन्यते इति ब्रह्महत्या ॥ हनस्तकारान्तादेशो हिंसायामर्थे ।

(च०) सूत्रम्—'स्त्रियां यजां भावे' ॥ स्त्रियां सप्तम्येकवचनान्तम् । यजां यजा बहुवचनान्तं भावे सप्तम्येकवचनान्तम् । यज् अज् हन शाङ् मज् विद् आस् मन् चर् भृ अटाट्यानिषद् निपत् इत्यादयोधातवः स्त्रीलिङ्गे भावे क्यप् प्रत्ययो भवति । ककार. संप्रसा रणार्थ. । यजवभिज्या क्यप्प्रत्यय । 'यजो यवराण्या०' इति सम्प्रसारणम् यस्य इ । स्वरहीनं० स्त्रीत्वात् 'आप्त स्त्रियाम्' 'सवर्णे० प्रथमैकवचने आप'। अज गतौ क्षेपणे च । अज संपूर्वं । 'स्वरहीनं०' क्यप्प्रत्यय. । स्वरहीनं०' स्त्रीत्वादाप् । समज्या परि षद् । हन महापूर्व. । क्यप् । आपस्त्वनुदात्ततनात् इति गुणकार्य सत्राभावेऽपि नक र्स्य आप हस्वस्य पिति० 'स्वरहीनं० महाहत्या । महत्तो ब्राह्मणस्य हनने महाहत्या । शाङ् दाम्या व्रज व्रज्या विद् विद्या षद्ल निषद्या आस्या मन्या चर्या भृत्या अटाट्या । कृञो वा० रिङ । कृत्या क्रिया ॥ १-७ ॥

(प्र०) स्त्रियामिति । बहुवचनमाद्यर्थमत आह—यज इत्यादि ।

स्त्रियां भावे क्ति ॥ धातो स्त्रियां भावे क्ति प्रत्ययो भवति॥८॥ क्रियते सा कृति । बुध्यते सा बुद्धि । स्मृद् चिन्तायाम् । स्मर्यते सा स्मृति । पच्यते सा पक्ति । पचि विस्तारे । पञ्च्यते तत् पञ्चन पङ्क्ति । सम्प्रसारणम् । उद्यते सा ऊढि । सविद्यते संविदि ॥

(च०) सूत्रम्—'स्त्रियां भावे क्तिः'। धातोः क्तिप्रत्ययो भवति स्त्रियां भावे। ककारो गुणनिषेधाय संप्रसारणार्थश्च। डुपचष् पाके पक्तिः। पचि विस्तारे। पच् क्तिप्रत्ययः। ति। 'चोः कुः' 'स्वरहीनं०' 'इदितः०' इति नुम्। 'नश्चापदान्ते०' 'धार्त्ति०' पचनं पङ्क्तिः श्रेणिरित्यर्थः। वह प्रापणे क्तिप्रत्ययः। 'हो ढः' 'तथोर्धः' 'ष्टुभिः ष्टुः' 'यजां यवरामां०' इति संप्रसारणम्। वस्य उः। 'ढि ढो लोपः' [illegible] ढलोपे उकारस्य ऊकारः। प्रथमैकवचने 'धार्त्ति०' ऊढिः। विद् संभूत०। क्तिप्रत्ययः। 'खसे चपा झसानाम्' इति दस्य तः। 'स्वरहीनं०' संवित्तिः॥

(प्र०) क्तिरिति। धातोः स्त्रियां भावादौ क्तिप्रत्ययः स्यात् यथा—[illegible]

शमां दीर्घः॥ शमादीनां दीर्घो भवति क्तिप्रत्यये परे ॥९॥ शम्यते सा शान्तिः। दम्यते सा दान्तिः। गम्यते सा गतिः। हन्यते सा हतिः। भ्रमु चलने। भ्रम्यते सा भ्रान्तिः। अनुभूयते तत् अनुभवनं अनुभूतिः। विशिष्टा भूतिः विभूतिः। प्रभूतिः। भवनं भूतिः। शुच शौचे। शोचनं शुद्धिः॥

(च०) शम् क्तिप्रत्ययः॥ 'शमां दीर्घः' 'नश्चापदान्ते०' 'धार्त्ति०' शान्तिः भ्रान्तिः। ग्लै संख्याशब्दानाम् ग्ला क्तिप्रत्ययः। 'स्वाद्यादितः' तस्य नः। ग्लानिः। म्लै म्लानिः। भू क्तिप्रत्ययः। भूतिः। अनुपूर्वः। अनुभवनमनुभूतिः। प्रथमैकवचने 'धार्त्ति०'॥ गमनं गतिः। नमनं नतिः। 'लोपस्त्वनुदात्ततनां०' इति मलोपः॥

ईङ्शीङोर्वरक्तिप्रत्ययौ नेड्गुणश्च॥ ईङ्शीङोर्वरक्तिप्रत्ययौ स्तो वरप्रत्ययस्य क्तिप्रत्ययस्य च इट् न। शीङो गुणोऽपि न भवति ॥१०॥ ईष्टेऽसौ ईश्वरः। सशय्यते तत् सशयनम् सशीतिः। ही गतौ। हीयते हीतिः। जागरणं जागृतिः। निगृह्यते सा निगृहीतिः। कुच सङ्कोचने। कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कुचतिः। निकुचितिः। निरुठितिः। ष्णिह् आस्कन्दने। उपस्निहितिः। निरतितिः। विशसनं धियते सा विधृतिः॥ ग्लाम्लाज्याहाभ्यस्तत्वतरिष्कर्थे निः प्रत्ययो भवति ॥११॥ ग्लायनं सा ग्लानिः। ज्यानिः। हानिः। [illegible]॥ तृष्णतृषस्य उत्व वाच्यम्॥ १२॥ तृष्यते सा तृषिः॥ ऋल्वादिभ्यश्च क्तार्थे निः प्रत्ययो भवति॥ १३॥ कृञ् हिंसायाम्। कायनं सा कार्णिः। धूनिः। लूनिः। पूर्णिः॥ सम्पदादिः क्विप् वा वाच्यः ॥१४॥ सम्पत् सम्पत्तिः॥

(च०) —[illegible] गुणाभावार्थः पदस्य। ईङ्शीङोर्वरक्तिप्रत्ययौ नेड्

गुणश्च' ॥ संनीतिः । बुध् अवगमने । बुध् क्तिप्रत्ययः तथाच' 'सवे जवा' 'स्वर दादि०' बुद्धिः ॥ अनुभूतिरित्यादौ 'इट्' इत्यागमे प्राप्ते सन्निपाते द्विवस्त्यानेट्' इति सूत्रं पठन्ति कश्चित् । इकारवकारादेः प्रत्ययस्य क्तिप्रत्यये इटा निषेधः । महारस्तु कमन्यथ इटो न निषेधः । गृहाति भणितिरित्यादिः ॥ १०-१४ ॥

कर्तरि क्विश्च सञ्ज्ञायाम् ॥ कर्त्रर्थे धातो क्ति प्रत्ययो भवति सञ्ज्ञायां विषये ॥१५॥ डुकृञ् करणे । प्रकुरुते सा प्रकृति । धृञ् धारणे । विपूर्वः । विशेषेण धरतीति विधृति ॥

(वृ०) कर्तरि क्तिश्च' ॥ कर्त्रर्थेपि क्तिप्रत्ययो भवति ॥ तन् क्ति संज्ञायां । [illegible] स्वनुनाथ०' सततानोति कुकमिति संततिः ॥ एवं कृ क्तिप्रत्ययः । प्रपूर्वः । प्रकुरुते इति प्रकृतिः प्रधानं पुरुषः । धृञ धारणे विपूर्वः । क्तिप्रत्ययः । विधृतिः ॥ धन् क्तिप्रत्ययः । प्रथमैकवचने धातो० धृतिः ॥ १५ ॥

षिद्भिदादिभ्योऽङ् ॥ षितो धातोर्भिदादेश्च स्त्रियामङ् प्रत्ययो भवति भावादौ ॥ १६ ॥ पच्यते सा पचा । मृज्यते सा मृजा ॥ जृष् वयोहानौ ॥ **जरादौ सानुबन्धरहितः अः प्रत्ययो भवति** ॥ १७ ॥ जार्यते अनया सा जरा ॥ इषु इच्छायामिति निर्देशाज्ज्ञापकादिच्छा इति निपात्यते । इच्छा । **इषादेरकर्म युट्** ॥ १८ ॥ एषणमिति एषणा । भिद्यते अनया सा भिदा । छिद्यतेऽनया सा छिदा । क्षिपा ॥ गुहू संवरणे । गुहा ॥ मेधृ हिंसायाम् । मेधृ वधमेधासङ्गमेषु । मध्यत इति मेधा ॥ कृपा ॥ पीड बाधायाम् । पीडा ॥ बाध पीडायाम् । बाधा ॥ क्षपा वाधि ॥

(वृ०) सूत्रम्—'षिद्भिदादिभ्योऽङ्' । षित्त्व भिदाद [illegible] स्वम् । [illegible] भावे [illegible] ॥ [illegible]

(वृ०) विभूतिरित्यादि [illegible]

गुरोश्च हलः । [illegible]

मावादौ न क्ति ॥ १९ ॥ ईह चेष्टायाम् । ईह्यते सा ईहा ॥ ऊह्यते सा ऊहा ॥ ईक्ष दर्शनाङ्कनयोः । ईक्ष्यते तत् ईक्षणं ईक्षा ॥ एध्यते सा एधा । गुरोः किम् । भक्तिः ॥ हसात् किम् । नीतिः ॥ लिख् रिख् लेखने । लिख्यते तल्लेखनं लेखा । रिख्यते तद्रेखणं रेखा ॥ गुध परिवेष्टने । गुध्यते इति गोधा ॥ धेट् पाने । सुष्ठु धीयते इति सुधा ॥ डुधाञ् धारणपोषणयोः । श्रद्धीयते सा श्रद्धा ॥ **क्तिरापादिभ्यः** ॥ २० ॥ आप्तिः । दीप्यते सा दीप्तिः । राध्यते सा राद्धिः । प्रशस्तिः ॥

(च०) सूत्रम्—'गुरोर्हसात्' ॥ गुरुशब्दस्य पञ्चम्येकवचनान्तम् । 'ऐतेः' 'ङस्य' इत्यलोपः । 'सार्वि०' हसादिति पञ्चम्येकवचनान्तम् । हसितः 'सवर्णे' पश्चात् 'नामिनार' गुरुमतः गुरूपधात् हसान्ताद्धातोः अप् कर्तरि भावे च अप्रत्ययो भवति । उदाहरणम्—एध वृद्धौ । एध् । गुरूपधत्वात् हसान्ताच्च अप्रत्ययः । स्त्रीत्वात् टाप् । प्रथमैकवचने 'आपः' एधा ॥ ईहा ईह वाञ्छायाम् ॥ ऊह वितर्के । ऊहा ॥ ईक्ष दर्शनाङ्कनयोः । ईक्षा ॥ एवं रेखा लेखा ॥

(प्र०) गुरोरिति । हसन धातोर्विशेषणात् तदन्तलाभ इत्याह—हसन्तादिति । तथा च तादृशसमुदायो न गुरुर्भवितुमर्हति । इति गुरुर्वर्णविशेषकमित्याशयेनाह—गुरुमत इति । प्रेमार्थरूप इत्यादिनिर्देशाद्विषम्यथापि नाम्यः ॥ १९ ॥

प्रत्ययान्तात् ॥ प्रत्ययान्ताद्धातोः स्त्रियामङ् प्रत्ययो भवति भावादौ ॥२१॥ चिकीर्ष्यते सा चिकीर्षा । आत्मनः कर्तुमिच्छा चिकीर्षा । आत्मनः पुत्रेच्छा वा पुत्रीयते सा पुत्रीया । अशितुमिच्छा अशनीया । लोलूयते सा लोलूया । अटाट्या । कण्डूञ् गात्रविघर्षणे । कण्डूयते सा कण्डूया । मुमूर्षणं मुमूर्षा ॥

(च०) सूत्रम्—'प्रत्ययान्तात्' ॥ पञ्चम्येकवचनान्तम् । 'हसितः' 'सवर्णे०' सादय प्रत्यया अन्ते यस्य स प्रत्ययान्तस्तस्मादपि धातोः अप्रत्ययो भवति । उदाहरणम् । कृ । इच्छायामात्मनः सः 'ऋत इर्' द्वित्वं पूर्वस्य 'हसादिः शेषः' 'कुहोश्चु' 'र्वोरुपधाया दीर्घ इकः' इति दीर्घः । किकीर्ष स०' कर्तुमिच्छा० चिकीर्ष इति जातम् । तत्र 'प्रत्ययान्तात्' इति अप्रत्ययः । 'यत' इत्यकारः । 'स्वरहीनं०' 'आपतः स्त्रियाम्' आप् कर्तुमिच्छा चिकीर्षा । एवं जिहीर्षा बुभूषा । 'पुत्र नाम्नो य इ चास्य' इति यप्रत्ययः । तत्संनियोगे अकारस्य ईकारः पुत्रीय इति जातम् । 'स धातुः' ततः प्रत्ययान्तात् इति सूत्रेण अप्रत्ययः । 'यत' इत्यकारः । 'स्वरहीनं०' 'आपतः स्त्रियाम्' प्रथमैकवचने 'आप' आत्मनः पुत्रेच्छा पुत्रीया । एवं पुत्रकाम्या कण्डूया इत्यादि ॥२१॥

(प्र०) प्रत्ययान्तादिति । कण्डूयते । कण्ड्वादियगन्तात् कथमत्र क्तिरिति । कण्डूतिः ।

(च०) 'पूर्वकाले क्त्वा' ॥ पूर्वकाले सप्तम्येकवचनान्तम् । 'अ इ क' ॥ क्त्वा प्रथमैकवचनान्तम् । 'अव्यया०' ॥ धातो समानकर्तृके एककर्तृके धातौ क्रियान्तरे अत्र प्रयुज्यमाने सति पूर्वकाले प्रथमकाले क्त्वाप्रत्ययो भवति । उदाहरणम्—ष्णा शौचे । 'अ इ ष्ण स्न.' स्ना क्त्वाप्रत्यय त्वा इति । 'अव्यया०' 'क्त्वाद्यन्तं च' इत्यव्ययसंज्ञा। स्नात्वा भुङ्क्ते अत्र स्नानभोजनक्रियाद्वयमध्ये स्नानक्रियाया पूर्वकालीनत्वात् त्वाप्रत्यय. भुज पालनाभ्यवहारयो । भुज् क्त्वाप्रत्यय । त्वा 'चो कु.' 'स्वरहीन०' प्रथमैकवचने 'अव्यया०' भुक्त्वा व्रजति । अत्र भोजनार्थे व्रजनक्रियामध्ये च भोजनस्य प्रथमकालीनत्वात् त्वाप्रत्यय । पूर्वं कृत्वा दत्त्वा । 'दो दद्' इति सूत्रेण दद् आदेश. । ज्ञात्वा शयित्वा सुप्त्वा उक्त्वा गृहीत्वा भङ्क्त्वा । णश् अदर्शने । नष्ट्वा हित्वा ज्ञात्वा इत्यादि ॥ १ ॥

(प्र०) पूर्वकाले । धातोरिति । पूर्वकालक्रियावचनादित्यर्थः । समानकर्तृके धातौ प्रयुज्यमाने यस्माद्धातो क्त्वा विधीयते तत्क्रिया कर्त्ता यस्य धातो कर्त्ता तस्मिन् प्रयुज्यमाने क्त्वाप्रत्ययो भवति—इत्यर्थः । स्नात्वा भुङ्क्ते इत्यत्र स्नानभोजनक्रिययोरेक एव कर्त्ता । स्नानक्रियाया पूर्वभावित्वेन स्नाधातो क्त्वा । यद्यपि शक्ति कारकं सा च प्रतिक्रियं भिद्यते तथापि शक्तिशक्तिमतोरभेदादेककर्तृकत्वमुक्तम् । एवमेककर्तृकायामपि नत्वा स्तुत्वा व्रजति । न तु चात्र सर्वपूर्वाया एव भविष्यति । यथामात्यो विप्रास्ता एव आनीयतामित्युक्ते सर्व एव आनीयते । अत्राहु —आख्यातवाच्याया क्रियाया प्राधान्यम् । तत तामेव प्रति सर्वासां विशेषणत्वात् परस्परेण सम्बन्ध । न हि भिक्षुको भिक्षुकान्तरं याचते किन्तु सर्व एव प्रभुमिति यथा तथा स्तुतेरिह व्रज्याया एव पौर्वकाल्यमिति । पूर्वं भुङ्क्ते ततो व्रजति इत्यत्र तु पूर्वशब्देनैव कालस्योक्तत्वान्न क्त्वाप्रत्यय । आस्यते भोक्तुमित्यपि भवति । आसित्वा भोक्तुमिति न भवति अनभिधानात् किन्त्वासित्वा भुङ्क्ते इत्येव ॥ १ ॥

न क्त्वा सेट् कित् ॥ सेट् क्त्वा किन्न भवति ॥२॥ वर्तित्वा । शयित्वा । भवित्वा । सेट् किम् । कृत्वा ॥ **रलो व्युपधाद्धलादेः सश्च** ॥ उश्च इश्च वी ते उपधे यस्य तस्माद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्त ॥३॥ विद ज्ञाने । विदित्वा वेदित्वा ॥ लिखित्वा । द्युतित्वा । व्युपधात्किम् । वर्तित्वा । रल किम् । सेवित्वा । हलादे किम् । एषित्वा । सेट् किम् । भुक्त्वा ॥ **मृडमृदगुधकुषक्लिशवदवसः क्त्वा** ॥४॥ सेट् किद् भवति । मृड सुखने । मृडित्वा । मृद

सम्भवतो यानायनाद्-धात्वर्थयोरिति । निर्धारणे षष्ठीसप्तम्यौ वा । धात्वर्थयोर्मध्ये पूर्व कालो यस्य धात्वर्थस्य तस्मिन् विद्यमानादित्यर्थः । व्यत्ययो निर्धारणे विभक्तिरेव पूर्वकाल इत्यस्य बहुव्रीहित्वप्रतीतिरिति फलितम् ।

क्षरे । मूदित्वा । गुभ् रोचने । गुध् रोष । गुधित्वा । गुह रोगे । गुह् संवरणे । गुहित्वा । कुष् निष्कर्षे । कुषित्वा । क्लिश् विबाधने । क्लिशित्वा । वद् व्यक्तायां वाचि । उदित्वा । वस् निवासे । उषित्वा । मुषित्वा । गृहीत्वा ॥ नोपधात्थफान्ताद्वा किन् ॥६॥ नकारोपधात् थफान्ताद्धातोः सेट् क्त्वा वा किद्भवति ॥ मन्थ सद्भे । नो लोप । मथित्वा मन्थित्वा ॥ गुम्फ ग्रन्थने । गुफित्वा गुम्फित्वा । इत्यादि ॥ अलंखल्वोः प्रतिषेधे क्त्वा ॥९॥ प्रतिषेधार्थयोरलंखलुशब्दयो पूर्वपदयोः सतो पूर्वकाल विनापि क्त्वा प्रत्ययो भवति ॥ अत्रालंखलुशब्दौ निषेधार्थौ तयोरुपपदत्वात् । अलं भुक्त्वा न भोक्तव्यम् । भोजनं मा कुरु इत्यर्थ । खलु पक्त्वा न पक्तव्यम् ॥

(च०) सूत्रम्— न क्त्वा सेट्॥ न प्रथमैकवचनान्तम् । 'अव्यया०' । क्त्वा प्रथमैकवचनान्तम् । अव्यया०' । सेट् प्रथमैकवचनान्तम् । इत्य ०' । कित् प्रथमैक०। इडन्वित क्त्वाप्रत्ययो विकल्पेन कित्संज्ञो भवति । कित्त्वाभावे गुणनिषेध । कित्त्वाभाव गुण । विद ज्ञाने । क्त्वाप्रत्यय. । कृत ' इडागमः । एकत्र कित्त्वात् गुण । द्वितीय कित्त्वाभावे 'उपधाया लघ्वा इति गुण 'स्वरहानि० प्रथमैकवचने अव्यया० विदित्वा वेदित्वा । वृतित्वा वर्तित्वा ॥ अलंखल्वा प्रतिषेधे क्त्वा' अलं खलु एतयो पूर्वपदयो पूर्वकाल विनापि निषेधार्थे धातोः क्त्वाप्रत्ययो भवति । भुज क्त्वाप्रत्यय । 'चोः कु.' 'खसे चपा० अर्द्धपूर्वः । स्वरहान० अव्यया०' । अलं भुक्त्वा भोजनेन अलं । भोजन मा कुर्वित्यर्थ ॥ वच् परिभाषणे । वचू क्त्वाप्रत्ययः । यजादिवचादीनां० इति संप्रसारणम् । 'चो कु. स्वरहानि० खलुपूर्व । सवर्ण० खलूक्त्वा वचनेन अलं मास्त्वित्यर्थः ॥ २-६ ॥

उदितः क्त्वा वेट् ॥ उदितो धातो परस्य क्त्वाप्रत्ययस्य वा इडागमो भवति ॥७॥ एषित्वा इष्ट्वा । अमु चलने । अमित्वा आन्त्वा । अदो जधु । जग्ध्वा ॥

(च) सूत्रम्— उदितः क्त्वा वेट् ॥ उदित पञ्चम्येकवचनान्तम् । स्वरहाने धातोर्वि । क्त्वा षष्ठ्येकवचनान्तम । अव्यया० । वा प्रथमैकवचनान्तम । इट् प्रथमैकवचनान्तम् । इत्य ० ॥ उत् उकार इत्यस्य स उदित् तस्मात् उदित । उदितो धातो परस्य क्त्वाप्रत्ययस्य इडागमो भवति । इषु इच्छायाम् । इष क्त्वाप्रत्यय । उदित क्त्वा वे० इत्यनेन इडागम । स्वरहानि इपधाया लघ्वा इति गुण । इडभाव कित्त्वा न गुण । इषि ष्टु प्रथमैकवचन अव्यया एषित्वा इष्ट्वा ॥ ७ ॥

समासे यपः ॥ समास सति पूर्वकाले यप्प्रत्ययो भवति तत्कर्तृक धातौ प्रयुज्यमाने ॥८॥ ह्रस्वस्य पिति कृति तुक् ॥ डुभृञ् धारणपोषणयो

स भूत्वा करोतीति सम्भूय करोति । णमु प्रह्वत्वे शब्दे च । प्रकर्षेण काय-वाङ्मनोभिर्नत्वा इति प्रणम्य गच्छति । अनञ्पूर्वे इत्येके । अकृत्वा जल्पति । अकृत्वा गच्छति ॥

> अजित्वा शात्रवान्सर्वानकृत्वा विमलं यशः ।
> अदत्त्वा वित्तमर्थिभ्यः कथं जीवति भूभुजः ॥ १ ॥

(च०) सूत्रम्—'समासे०' ॥ सप्तम्येकवचनान्तम् । 'अ इ ए' । क्यप् प्रथमैकवचनान्तम् । 'हसेप ०' ॥ समासे सति उपसर्गपूर्वकत्वे सति धातोः पूर्वकाले क्त्वाप्रत्ययो भवति स एव कर्ता यस्य स तत्कर्तृकः तस्मिन् तत्कर्तृके एककर्तृके धातौ प्रयुज्यमाने सति उदाहरणम् डुभृञ् भृ क्यप्प्रत्ययः । 'ह्रस्वस्य पिति' संपूर्व । स्वर०' 'अव्य०' संभृत्य सिद्धित्वा सः सम्यक् प्रकारेण भृत्वा करोति ॥ अत्र समुपसर्गेण समासः अत्र सम्भारकरणक्रिययोः एक एव कर्ता । ततः सम्भारक्रियायाः पूर्वकालीनत्वात् क्यप्प्रत्ययः ॥ णमु प्रह्वीभावे । 'आदेः ष्णः स्नः' नम् प्रपूर्वे । क्यप्प्रत्ययः । 'प्रादुश्च तथा तौ०' इति नस्य णः । 'स्वरहीन०' प्रथमैकवचने 'अव्यया०' अत्र प्रकर्षेण नत्वा प्रगम्यति समासः क्यप् । देवदत्तः प्रणम्य गच्छति । अत्र प्रणामगमनरूपद्वयोः क्रिययोः एक एव कर्ता यत्र स एव प्रणन्ता स एव गन्ता इत्येककर्तृत्वम् । ततः प्रणामस्य पूर्वकालीनत्वात् क्यप्प्रत्ययः ॥ अनञ्पूर्वे इति । नञ्पूर्वकत्वे क्यप्प्रत्ययो न भवति इत्येके वदन्ति । यथा कृ नञ्पूर्वः । क्त्वाप्रत्ययः । 'ना' इति सूत्रेण नस्य आकारादेशः । अकृत्वा गच्छति । अत्र नञ्पूर्वकत्वात् क्यप्प्रत्ययोनायात । किंतु क्त्वाप्रत्यय एवायात ॥ ७ ॥

क्यपि लघुपूर्वात् ॥ क्यपि लघुपूर्वस्य णेरयादेशोऽपि वाच्यः ॥९॥ परिणमयित्वा इति परिणमय्य भुङ्क्ते । विगमय्य । विगणय्य ॥ अलघुपूर्वस्य न । तेन णेर्लोपो वाच्यः । प्रतार्य । सम्प्रधारयित्वा इति सम्प्रधार्य । विचार्य करोति । आप्लृ व्याप्तौ । आप्नोतेर्वा । प्रापय्य । प्राप्य ॥ **दादीनां क्यपि क्त्वाभावो वाच्यः** ॥ १० ॥ क्यपि 'स्थामी' इति इकारो न भवति ॥ दो अवखण्डने । प्रदाय । प्रसाय । प्रमाय । प्रस्थाय । उप समीपे स्थित्वा इति उपस्थाय ॥ पिबतेवा प्रपाय प्रपीय । लोपस्त्वनुदात्ततनाम् ॥ **नमस्व क्यपि वा लोपः** ॥११॥ प्रकर्षेण नत्वा इति प्रणम्य प्रणत्य । आसमन्तात् ग्रामे आगम्य आगत्य ॥ **विपूर्वस्य दधातेः करोतेरर्थे क्यप्** ॥१२॥ विधाय । प्रहाय ॥ **तत्कालेऽपि क्यप् दृश्यते**॥१३॥ नेत्रे निमील्य हसति । मील सम्मीलने । मील सङ्गमे उभयपदी । अक्षिणी

समीक्षित्वा इति आक्षिपी सम्भाव्य हसति। चक्षुषी सम्मील्य हसति। मुख व्यादाय स्वपिति ॥

(ख०) 'क्त्वापि प्रागुणश्च' ॥ क्त्वाप्रत्यये परे नियमेन गुणो भवति। णम् परिपूर्वः। धातोः वेरत्र विभाषया। 'प्रत्ययान्ताद्' इति समासे क्त्वाप्रत्ययः। परिक्लिश्य इति स्थितः। 'क्त्वापि चेटोंश्च अचिरस्वरस्यकाराः स्वाहोरे०' अन्यथा० परिक्लिश्य भुङ्क्ते परिक्लिश्य समासस्वर समस्थितः परिक्लिश्य पूर्वभुक् परिपाकं प्राप्य भुङ्क्ते इत्यर्थः। एवम् उभयत्र आकलय्य ॥ 'तत्कालेऽपि द्वयोः क्रिययोः समकालत्वेऽपि क्त्वाप्रत्ययो भवति। मीळ मीलने आङ् संपूर्व। क्त्वाप्रत्ययः। स्वाहोरे०। प्रथमैकवचने 'अन्यथा०' नवे संमाल्य हसति समकालमेव संमाल्य हसति च। अथ नञ्समासेनहसन योः समकालत्वात्पूर्वकाले विनापि तत्कालेऽपि क्त्वाप्रत्ययः ॥ डुदाञ् दाने। विभाङ् पूर्व। क्त्वाप्रत्ययः। इ ये स्वारो वि आङ्पूर्वकः दाधातुः मुखप्रसारणार्थे। तत्र मुखं व्यादाय प्रसार्य स्वपिति। अत्रापि मुखप्रसारणस्वापनयोः युगपत्कालत्वात् समानकाले क्त्वाप्रत्ययः। क्वचिदेककर्तृकेऽपि क्त्वाप्रत्ययो दृश्यते— मरणमुनिमनागत्यागच्छति खलु दृश्यतां इति। मरणादिकर्मयुक्तामत्र अपाय ला द्वयमम् इत्यादि ॥९-१३॥

पौनःपुन्ये णम् पदं द्विश्च ॥ समानकर्तृकेषु धातुषु प्रयुज्यमानेषु पूर्वकाले पौनःपुन्यार्थे धातोर्णम् प्रत्ययो भवति णमन्तस्य पदस्य द्विर्वचनं भवति ॥१४॥ भावो यथा। पीत्वा पीत्वा इति पायं पायं गच्छति। आदर वीप्सायां द्विर्भावः ॥ भुक्त्वा भुक्त्वा इति भोजं भोजं व्रजति। स्मृत्वा स्मृत्वा इति स्मारं स्मारं नमति शिवम् ॥ कथमादिषु स्वार्थे कृञो णम् ॥१५॥ कथं इत्थं अन्यथा एवं एतेषु प्रयुज्यमानेषु स्वार्थे कृञो णम् प्रत्ययो भवति ॥ कथंकारं इत्थंकारं अन्यथाकारं एवंकारं पठति। एवं पठतीत्यर्थः ॥ समूलाकृतजीवेषु हन्कृञ्ग्रहां णम् वाच्यः स्वार्थे तेषाम् अनुप्रयोगश्च ॥१६॥ समूलघात इति। अकृतकारं करोति। जीवं गृहीत्वा इति जीवग्राहं गृह्णाति इत्यादि ॥

(ख) सूत्रम्— पौनःपुन्ये णम् पदं द्विश्च ॥ पुनः पुनर्भवनमिति पौनःपुन्यं तस्मिन्। सप्तम्येकवचनान्तम्। अ इ प। णम् इत्येव। पदं प्रथमैकवचनान्तम्। अतान्तम्। द्वि प्रथमैक। अव्ययम्। च प्रथमैक। अव्ययम्० ॥ पौनःपुन्यं वारं वारार्थं धातोः पूर्वकाले णम्प्रत्ययो भवति तस्य च णमन्तस्य पदस्य द्वित्वं भवति समानकर्तृकेषु धातुषु प्रयुज्यमानेषु स सु। पा पाने। पा णम्प्रत्यय। अम्। आतो युक् स्वाहोरे० मा तुम्बार द्वित्वम्। प्रथमैकवचनं अव्ययं पायं पायं गच्छति। पीत्वा पीत्वा गच्छतीत्यर्थः एवं वारं वारं स्मारं स्मारम्। [अपि चकारात्—समूलघातं हन्ति जीवग्राहं गृह्णाति कृत्वाग्रं पुष्णाति इत्यादावपि णम्प्रत्ययः एषु पूर्वपन्न

स्वार्थे कथमादानामेवार्थे कृञ् धातोर्णम्प्रत्ययो भवति । णित्त्वाद्वृद्धिः । कृ कथंपूर्वः । णम्प्रत्ययः । अम् । 'धातोर्नामिनः' इति वृद्धिः । 'स्वरहीनं०' प्रथमैकवचनं 'अव्यया०' कथंकारं कथमित्यर्थः इत्थंकारम् । इत्थमित्यर्थः ॥ १६ ॥

(प्र०) पीन पुन्ये इति । पीन पुन्य धात्वः समानकर्तृकयोः पूर्वकाले धातोर्णम् स्याच्चकारात् क्त्वा णमन्तस्य द्वित्वञ्च । णमन्तस्य नामत्वात्स्याद्यौ पदत्वम् ।

वर्णात्कारः ॥ वर्णमात्रात्कारप्रत्ययो भवति ॥ १७ ॥ क इति वर्णः ककारः । व इति वर्णो वकारः । अ इति वर्णः अकारः । वर्णसमुदायादपि कारो दृश्यते । अहङ्कारः । ओंकारः । टकारः । पकारः । तकारः । इत्यादि ॥

(च०) 'वर्णात्कारः' ॥ वर्णनिर्देशे वाच्ये सति वर्णात् अकारादिक्षकारान्तात् अर्थे कारप्रत्ययो भवति । क अर्थे कारप्रत्ययः । ककारः खकारः गकारः अकारः इकारः । अत्र बहुलमित्यनुवर्तते तेन अ इ उ ऋ लृ हयवरल इत्यादौ कारप्रत्ययो न । वर्णनिर्देशे यथा । अः कृष्ण इः काम कः ब्रह्मा खमाकाशमित्यादौ न ॥ १७ ॥

(प्र०) वर्णात् कार इति । प्रयोगस्यैवगवाचिनः कारप्रत्ययः । अत—'अकारान्त विरिञ्चे वा' इत्यादौ प्रयोगस्यवर्णप्रतिपादकत्वाभावात् कारप्रत्ययो नेति कैश्चिदुक्तम्, तन्न युक्तम्, 'अकारो वासुदेवः स्यात्' इत्यादौ इसम्वरसमुदायस्योच्चारणमात्रत्वात् कारप्रत्ययो न स्यात् । अतो वर्णनिर्देशेन इत्यनुवर्त्य वर्णमात्रानुकरणे इत्यर्थे अकारस्योच्चारणार्थत्वाद् वर्णमात्रस्यैवानुकार्यत्वात् लघुभाष्ये तु न एव नकार इत्यादौ समुदायात् कारप्रत्ययाभावेन करोतेरुच्चारणार्थत्वात् करणं कार इति व्युत्पत्त्यैव सिद्धेरेव मकारादिसिद्धौ वर्णात् कार इति वार्तिकं व्यर्थमित्युक्तम् । यत्तु अकारकरणं न सिद्ध्येत् । करोतेः पौनरुक्त्यादिरेतदर्थं वार्तिकमिति कृष्णपण्डितेनोक्तम् । तदर्द्ध वक्तव्यम् । अकारमित्यत्र घञन्तकरोतेरुच्चारणार्थत्वेन पौनरुक्त्याभावात् ॥ १७ ॥

रादिफो वा ॥ १८ ॥ र इति वर्णः रेफः रकारः ॥

> रकारादीनि नामानि रामत्रस्तस्य रावण ।
> रत्नानि च रमण्यश्च सत्रास जनयन्ति मे ॥ २ ॥
> रकारादीनि नामानि शृण्वतो मम पार्वति ।
> मनः प्रसन्नतामेति रामनामाभिशङ्कया ॥ ३ ॥

(च०) रादिफो वा ॥ रात् रकाराक्षरात् वा विकल्पेन इफप्रत्ययो भवति । र अर्थे इफप्रत्ययः । र इफ रेफः रेफशब्दात् प्रथमैकवचने धातोर्णि० । पक्षे कारप्रत्ययः ॥ रकार

प्रथा समतिमाह—रकारादीनानि श्लोक । हे पार्वति रकारादीनि रकार आदिर्येषां तानि नामानि शृण्वतः सतो मम मनः प्रसन्नतां प्रसन्नभावं समीचीनं सौम्यत्वं प्रति प्राप्नोति । कथा । रामनामाभिशङ्कया रकारादीनि नामान्युच्चरन् कश्चिद्रामनामापि उच्चारयिष्यतीत्याशङ्कया इत्याशङ्कया ॥ १८ ॥

लोकाच्छेषस्य सिद्धिर्यथा मातरादेः ॥ अस्य सारस्वतव्याकरणस्य ये शेषप्रयोगास्तेषां लोकात् च व्याकरणान्तरेभ्यो सिद्धिर्भवति यथा मातृ पद । इत्यादिप्रयोगानुसारेण बोद्धव्यम् ॥ १९ ॥

(च०) अथ ग्रन्थसमाप्तिमुपमाह—'लोकाच्छेषस्य०' । लोकात् पञ्चम्येकवचनान्तम् । शिष्यते 'शेष०' । षष्ठ्येकवचनान्तम् । 'शेषस्य' । सिद्धिः प्रथमैकवचनान्तम् । यथा० 'मात०' इत्यादेः पदस्यास्य शेषस्य । अत्र व्याकरणेऽनुक्तस्य सिद्धिः साधनं लोकाद्व्याकरणान्तरात् ज्ञातव्या । माता च पिता च पितरौ इत्यादीनां सिद्धिर्लोकाज्ज्ञेया ॥

शास्त्रान्ते च मङ्गलाचरणं युज्यते अतो मातृपित्रोर्नामग्रहणेन मङ्गलमप्याचरितम् ॥ १९ ॥

स्वरूपान्तोऽनुभूत्यादि शब्दोऽभूद्यत्र सार्थकः ।
स मस्करी शुभां चक्रे प्रक्रियां चतुरोचिताम् ॥ २ ॥

(च०) अथ कविः स्वनामगर्भमलंकारश्लोकमाह—स्वरूपान्त इति । स मस्करी मस्करः वेणुदण्डोऽस्यास्तीति मस्करी संन्यासिकः प्रक्रियां शुभामृज्वीं चक्रे कृतवान् । कथंभूतां प्रक्रियां चतुरोचितां चतुराणां सुबुद्धीनां पुरुषाणामुचिता योग्या तां । स कः । यत्र यस्मिन् मस्करिणि अनुभूत्यादि अनुभूतिः इति आदौ यस्य सः अनुभूत्यादिः तथा स्वरूपान्तः स्वरूप इति शब्दोऽन्ते यस्य स अर्थात् अनुभूतिस्वरूपनामवाचक शब्दः सार्थकः । अनुभूतिर्ज्ञानमेव स्वरूपं यस्येत्यर्थः । सहितोऽभूदित्यनेन अनुभूतिनामा संन्यासिक इमां प्रक्रियां शुभामृज्वीं सरलां चक्रे । शुभामित्यनेन स्वकपोलकल्पमानिरासः कृतः ॥

आचार्याद्वो हयग्रीवः कमलाकर ईश्वर ।
सुरासुरनराकारमधुपापीतपङ्कज ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽनुभूतिस्वरूपाचार्यविरचितायां
रूद्‌धप्रक्रियायां वत्वादिप्रत्ययप्रक्रिया समाप्ता ॥ ९ ॥

(प०) अथ पाठकश्रोतॄणामभीष्टसिद्धये इष्टदेवताशिषमाह–अवतादिति । हयग्रीव ईश्वरो वो युष्मान् शिष्यान् अवतात् रक्षतु । हयस्य ग्रीवा इव ग्रीवा यस्य सः । अर्थात् पुरुषशरीरः अश्वमुखः चतुर्विंशत्यवतारमध्यस्थ एको भगवतोऽवतारः । उक्तं च भागवतेऽष्टादशाध्याये पञ्चस्कन्धे । 'यद्वान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरङ्गविग्रहः । प्रत्याददे वा कवयेऽभियाचते तस्मै नमस्ते वितथेहिताय ।' साम्प्रतं तु तां हयग्रीवमूर्तिं भद्राश्वखण्डे धर्मपुत्रो राजाभद्रश्रवाः पूजयन्नस्ति इति पुराणोक्तिः । कथंभूतो हयग्रीवः । कमलाकरः कमलां लक्ष्मीं करोतीति । यद्वा कमलाया लक्ष्म्या आकरः । पुनः कथंभूतः ? ईश्वरः ईष्टे ऐश्वर्यं करोतीति ईश्वरः । पुनः कथंभूतः ? । सुरासुरनराकारमधुपापीतपत्कजः । कं पानीये जातं कजे, पादावेव कजे कमले पत्कजे, सुराश्च असुराश्च नराश्च त एव आकारा येषामीदृशा ये मधुपा भ्रमरास्तैरापीते अत्यादरेणावलोकिते पत्कजे चरणकमले यस्य सः ॥

इति कृत्प्रक्रिया ॥

श्रीनागपुरीयतपागच्छाधिराजभट्टारकश्रीचन्द्रकीर्तिसूरिविरचिता
सारस्वतव्याकरणस्य दीपिका समाप्ता ॥

(प्र०) लोकाच्छेषस्य सिद्धिरिति । यस्य शब्दस्य सिद्धिर्निष्पत्तिर्लोका दमरादिवृद्धशब्दप्रयोगात् ज्ञातव्येत्यर्थः । सिद्धिशब्दो मङ्गलवाचकत्वादन्ते प्रयुक्तः । आदिमध्यावसानेषु मङ्गलमाचरणीयमित्युक्तेः ॥ ११ ॥

सारस्वतस्योत्तरार्द्धं प्रसादाख्यया व्यपूरयत ।
व्याख्यया नवकिशोरः वासुदेवः करशर्मणा ॥

इति–वासुदेव–श्रीनवकिशोरकरविरचिता सारस्वत
व्याकरणस्योत्तरार्द्ध प्रसाद टीका समाप्ता ॥

॥ लिङ्गानुशासनप्रक्रिया ॥ ३६ ॥

लिङ्गराजं नमस्कृत्य मत्वा पूर्वमुनेर्वचः ।
सारस्वतप्रक्रियायां कुर्वे लिङ्गानुशासनम् ॥ १ ॥

अथ लिङ्गानुशासनम् ॥ १ ॥

❀ चक्रधरा ❀

ग्रन्थ विघ्नविघाताय कृतं मङ्गलं निष्पतिषार्थे निबध्नाति—लिङ्गराजमिति । लिङ्गयतेऽनेनेति लिङ्गं निराकृतिविशेषः । लिङ्गि गत्यर्थात् धातोः घञ् । लिङ्गं चिह्नं शुभाने च साकल्यव्याप्तावपि निरमूर्तिविशेष च माहन पि मनुसकमिति मदिना । तस्मिन् राजति लिङ्गराजः, उक्तमनिरमूर्तिविशेष, तत्प्रामकनिरा वा । राजाह सखिभ्यष्ट् इति ष्टच्प्रत्ययः । तं नमो नति कृत्वेति नमस्कृत्य, कृञ समासे क्त्वो ल्यप् इति समासे ल्यप् । गुणमपि गुरु । वाचस्पत्यादित्वाद्विसर्गस्य स । पूर्वमुनः पाणिनेर्वचः सूत्रात्मकं वचनं मत्वा ज्ञात्वा । मन ज्ञाने पूर्वकाले क्त्वा । सारस्वतप्रक्रियायामस्मिन् ग्रन्थे लिङ्गानां शब्दानामनुशासनं स भिन्नं प्रकरणं कुर्वे । कुरुकुकरिति न दार्थे अहमिति कर्तृपदम् अध्याहार्यम् ॥ १ ॥

लिङ्गानुशासनं प्रकुर्वाणो ग्रन्थकर्ता सूत्रमारचयति—अथेति । अथशब्दोऽधिकारवाचकः । अनुशिष्यते व्याख्यायते अनेनानुशासनम् । लिङ्गानाम् अनुशासनं लिङ्गानुशासनम् ॥ १ ॥

वृत्तिः ॥ आधिकारसूत्रं एतत् ॥ २ ॥

(चक्र०) अधिकारसूत्रम् इति । अथशब्दाधिकारसूत्रमपि लिङ्गानुशासनमित्यस्य आपरिसमाप्तेः, स्वाति तावत्—इति यावदिति विवक्षा । अत्रापि लिङ्गं त्रिविधं विवक्षितम् । तस्यापनिवृत्तम्, तस्यार्थं विशेषः । शब्दानां केषाञ्चित् सर्वलिङ्गप्रतिपादकता कस्यचित् एकलिङ्गप्रतिपादकता कस्यचित् द्विलिङ्गप्रतिपादकता चेति ॥ २ ॥

ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः ॥ ऋकारान्ता एते पञ्चैते शब्दाः स्त्रीलिङ्गाः ॥ ३ ॥

(चक्र०) ऋकारान्ता इति । [illegible]

[illegible]

[illegible] ॥ ४ ॥

(चक्र०) [illegible]

अवनि । 'अत्यादेरनि' इत्यनि । वधू । 'वहा धश्च' । इत्यू ॥ ४ ॥

अशनिभरणपरणयः स्त्रीपुंसयोः ॥ अशन्यादयः स्त्रियां पुंसि च भवन्ति ॥ पूर्वस्यापवादः । इयमयं वा अशनिः ॥ ५ ॥

(चक्र०) अशनिभर ॥ पूर्वसूत्रापवादोऽयम् ॥ ५ ॥

मिन्यन्तः ॥ मिनिप्रत्ययान्तः स्त्रियां स्यात् ॥ भूमि ॥ ६ ॥

(चक्र०) मिन्यन्त । भूमि । 'नियो मि' इत्यत्र मिनित्यनुवर्त्य विहितो 'भु वकिच्चेति' मिक् । ग्लानि । 'वहादर्नि' इति नि. ॥ ६ ॥

वह्निवृष्ण्यग्नय पुंसि ॥ वह्न्यादयः पुंसि स्युः । पूर्वसूत्रापवादः । निप्रत्ययान्ता अप्येते पुंसि स्युः ॥ ७ ॥

(चक्र०) वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह—वह्निवृष्णि । वृष्णि । 'घ्रादर्नि किद्' इति नि । अग्नि । 'अङ्गेर्नलोपश्च' इति नि. । वह्नि । 'वहादर्नि' इति नि ॥ ७ ॥

श्रोणियोन्यूर्मयः स्त्रीपुंसयोः ॥ इयमयं वा श्रोणि, योनि, ऊर्मि ॥८॥

(चक्र०) श्रेणियोन्यूर्मयः । श्रोणि । योनि । 'वहादर्नि.' इति नि । ऊर्मि । 'अर्तरुच्च' इति मि ॥ ८ ॥

क्त्यन्तः ॥ क्तिप्रत्ययान्तः स्त्रियां स्यात् ॥ कृतिरित्यादि ॥९॥

(चक्र०) क्त्यन्त । क्तिप्रत्ययान्तः स्त्रियां स्यात् । कृतिः । स्त्रियां क्तिरिति क्ति. ॥९॥

ईश्च ॥ ईप्रत्ययान्तः स्त्री स्यात् ॥ लक्ष्मी ॥ १० ॥

(चक्र०) ईश्च । अत्र ईकार प्रत्यय एव । पूर्वोत्तरसाहचर्यात् । लक्ष्मी । 'लक्षे मुट्च' इति सूत्रे 'अवितृस्तृतन्त्रिभ्य ई' इत्यत ईरित्यस्यानुवृत्त्या ईप्रत्ययः । एवमन्या दिधातुभ्य ईकारप्रत्ययेऽपि स्त्रीत्वम् । तद्यथा अवनी तरी तन्त्री, तारा लक्ष्मी धूम. … ॥ १० ॥

ऊङाबन्तौ ॥ ऊङ् च आप् च तदन्तौ च स्त्रियां भवतः ॥ कुरूः । विद्या ।

(चक्र०) ऊङाबन्तौ । 'उत ऊ' इत्यू । आबग्रहणेन डाबादीनामपि ग्रहणम् । कुरूः । विद्या ॥ ११ ॥

ईयन्तमेकाक्षरम् ॥ ईप्रत्ययान्तमूप्रत्ययान्तमेकाक्षरं च स्त्रियां स्यात् ॥ धीः । भूः । एकाक्षरं किम् । पृथुश्रीः ॥ १२ ॥

(चक्र०) ईयन्तमेकाक्षरम् । ईकारो न प्रत्ययः ऊकारसाहचर्यात् । धीः । भूः । एकाक्षरं किम् । पृथुश्रीः ॥ १२ ॥

विंशत्याद्या नवत्यन्ताः ॥ आनवतेर्विंशत्यादयः स्त्रियां स्युः ॥ इयं विंशतिः त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, अशीति, नवति ॥ १३ ॥

(यक्ष०) विद्युत्प्रावृषावित्यादि । विद्युदादयः सूत्रनिर्दिष्टाः ॥ १३ ॥

दुन्दुभिरक्षेषु ॥ अक्षेषु बोधनार्थेषु दुन्दुभिः स्त्रियां स्यात् । इयं दुन्दुभिः । अन्यत्राय दुन्दुभिर्वाद्यविशेषोऽसुरो वा ॥ १४ ॥

(यक्ष०) दुन्दुभिरक्षेषु । अक्षेषु बोधनार्थेषु यो दुन्दुभिशब्दः प्रयुज्यते स स्त्रियां स्यादित्यर्थः ॥ १४ ॥

नाभिरक्षत्रिये ॥ क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् । इयं नाभिः ॥ १५ ॥

(यक्ष०) नाभिरक्षत्रिये । क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यादित्यर्थः ॥ दुन्दुभिनाभिशब्दयोर्विषयान्तरे च पुंसि भवति । अयं नाभिः क्षत्रियः । कथं तर्हि सद्गुणस्यपद्मनाभस्यैवादिकमपुरुषाविनाभिमिरिति भारविः । उच्यते । … सामान्ये नपुंसकं वाच्यम् । वस्तुतस्तु … भाष्यात्पुंस्त्वमपि साधु । अत एव नाभिर्मुख्यनृपे चक्रमध्यस्य … पुमान् द्वयोः प्राणितकं स्यात्, स्त्रियां कस्तूरिकामदे । इति मेदिनी ॥ … । मुख्यनृपे क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे इति । … वाच्यम् ॥ १५ ॥

तान्तः ॥ तप्रत्ययान्तं स्त्रियां स्यात् । ब्राह्मणस्य भावो ब्राह्मणता, देव एव देवता, जनानां समूहो जनता ॥ १६ ॥

(यक्ष०) तान्तः । भावे तत्र्यम्, इति सूत्रविहितः (तल्) प्रत्ययान्तः स्त्रियां स्यात् । ब्राह्मणस्य भावो ब्राह्मणता ॥ १६ ॥

भूमिविद्युत्सरिल्लतावनिताभिधानानि ॥ इयम् । भूमिर्भूः । विद्युत् सौदामिनी । सरित् नदी । लता वल्ली । वनिता वधूः ॥ १७ ॥

(यक्ष०) भूमिविद्युदिति । अभिधानानां भूम्यादिशब्दानां … ॥ १७ ॥

यादो नपुंसकम् ॥ पूर्वस्यापवादः । याद इत्येतत् सरिद्वाचकमपि नपुंसकं स्यात् ॥ १८ ॥

(यक्ष०) यादो नपुंसकम् । पूर्वस्यापवादः ॥ १८ ॥

भा स्रुक् स्रग् दिग्उष्णिगुपानहः ॥ एताः स्त्रियां स्युः । इयं भा इत्यादि ॥ १९ ॥

स्थूणोर्णे नपुंसके च ॥ एते नपुंसके स्तः चात् स्त्रियाम् ॥ स्थूणम् ऊर्णम् स्थूणा ऊर्णा ॥ २० ॥

(यक्ष०) स्थूणोर्णे नपुंसके च । चकारात् स्त्रियामित्यस्यानुकर्षणार्थः … । स्थूणा काष्ठमयी … । ऊर्णा तु स्त्रियाम् ॥ ॥

अवनि । 'अत्यादयति' इत्यनि । वर्‌ । 'वहा धश्च' । इत्यू ॥ ४ ॥

अशनिभरण्यरणयः स्त्रीपुंसयोः ॥ अशन्यादय स्त्रियां पुंसि च भवन्ति ॥ पूर्वस्यापवाद । इयमय वा अशनि ॥ ५ ॥

(चन्द्र०) अशनिभर ॥ पूर्वसूत्रापवादोऽयम् ॥ ६ ॥

मिन्यन्त ॥ मिनिप्रत्ययान्त' स्त्रियां स्यात् ॥ भूमि ॥ ६ ॥

(चन्द्र०) मिन्यन्त । भूमि । 'नियो मि' इत्यतो मिनित्यनुवर्त्य विहिता 'बकिच्चेति' मिक्‌ । ग्लानिः । 'वह्यर्तनि' इति नि ॥ ६ ॥

वह्निवृष्ण्यग्नय पुंसि ॥ वह्न्यादय पुंसि स्यु । पूर्वसूत्रापवाद । निप्रत्ययान्ता अप्येते पुंसि स्यु ॥ ७ ॥

(चन्द्र०) वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह—वह्निवृष्णि । वृष्णि । 'स्वर्तनि' कित्' इति नि । अग्नि । 'अङ्गेर्नलोपश्च' इति नि । वह्निः । 'वहार्तनि' इति नि ॥ ७ ॥

श्रोणियोन्यूर्मयः स्त्रीपुंसयोः ॥ इयमय वा श्रोणि, योनि, ऊर्मि ॥८॥

(चन्द्र०) श्रोणियोन्यूर्मयः । श्रोणि । योनि । 'वहा.नि.' इति नि । ऊर्मि । 'अर्तेरुच' इति मि ॥ ८ ॥

क्त्यन्तः ॥ क्तिप्रत्ययान्त स्त्रियां स्यात् ॥ कृतिरित्यादि' ॥९॥

(चन्द्र०) क्त्यन्तः । क्तिप्रत्ययान्तः स्त्रियां स्यात् । कृतिः । कीर्तिरिति क्ति ॥९॥

ईश्च ॥ ईप्रत्ययान्त स्त्री स्यात् ॥ लक्ष्मी ॥ १० ॥

(चन्द्र०) ईश्च । अत्र ईकार प्रत्यय एव । पूर्वोत्तरसाहचर्यात् । लक्ष्मीः । 'लक्षेर्मुट् च' इति सूत्रे 'अविस्तृस्तृतन्त्रिभ्यः ई' इत्यत ईरित्यस्यानुवृत्त्या ईप्रत्ययः । एवमन्यत्रापि धात्वनुबन्ध ईकारप्रत्ययस्य स्त्रीत्वम् । तथा अवान्तरी स्तन्त्री, तरी, लक्ष्मी, धूम, तन्त्रीणामादिगुण ॥ १० ॥

ऊङाबन्तौ ॥ ऊङ् च आप् च तौ स्त्रियां भवत ॥ कुरू । विद्या ।

(चन्द्र०) ऊङाबन्तौ । ऊत ऊ' इत्यू । आब्ग्रहणेन डाबादीनामपि ग्रहणम् । कुरू । विद्या ॥ ११ ॥

यन्तमेकाक्षरम् ॥ ईप्रत्ययान्तमेकाक्षरमूप्रत्ययान्तमेकाक्षरं च स्त्रियां स्यात् ॥ धी । भ्रू । एकाक्षरं किम् । पृथुश्री ॥ १२ ॥

(चन्द्र०) यन्तमेकाक्षरम् । ईकारोऽत्र प्रत्यय ऊकारसाहचर्यात् । धीः । भ्रूः । एकाक्षरं किम् । पृथुश्री ॥ १२ ॥

विंशत्याद्या नवत्यन्ताः ॥ आनवतेर्विंशत्याद्य स्त्रियां स्यु ॥ १४ विंशति त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, अशीति, नवति ॥ १३ ।

(चक्र०) पिप्पल्यादिरिति । पिप्पल्यादयः सूत्रनिर्दिष्टाः ॥ १३ ॥

दुन्दुभिरक्षेषु ॥ अक्षेषु बोधनाये दुन्दुभि स्त्रियां स्यात् । इयं दुन्दुभिः । अन्यत्र दुन्दुभिर्वाद्यविशेषोऽसुरो वा ॥ १४ ॥

(चक्र०) दुन्दुभिरक्षेषु । अक्षेषु बोधनायेषु यो दुन्दुभिशब्दः प्रयुज्यते स स्त्रियां स्यादित्यर्थः ॥ १४ ॥

नाभिरक्षत्रिये ॥ क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् । इयं नाभिः ॥ १५ ॥

(चक्र०) नाभिरक्षत्रिये । क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यादित्यर्थः ॥ दुन्दुभिर्नाभिश्चाक्षविषयान्यत्र पुंसि भवति । अयं नाभिः क्षत्रियः । कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिरिति भारविः । उच्यते । स्तम्भितास्विद्यताविव कोमलैरिति सामान्ये नपुंसकं बाध्यम् । वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात्पुंस्त्वमप्याह साधु । अत एव नाभिमुख्यनृप चक्रमध्यक्षत्रियया पुमान्, द्वयोः प्राणिप्रतीकस्थाने स्त्रियां कस्तूरिकामदे । इति मेदिनी ॥ रभसोऽप्याह । मुकुन्दात् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे इति । एवमन्यविधेऽन्यत्रापि बोध्यम् ॥ १५ ॥

तान्तः ॥ तप्रत्ययान्तः स्त्रियां स्यात् । ब्राह्मणस्य भावो ब्राह्मणता, देव एव देवता, जनानां समूहो जनता ॥ १६ ॥

(चक्र०) तान्तः । भावे तल्प्रत्ययः इति सूत्रविहितत (ल्) प्रत्ययान्तः स्त्रियां स्यात् । ब्राह्मणस्य भावो ब्राह्मणता ॥ १६ ॥

भूमिविद्युत्सरिल्लतावनिताभिधानानि ॥ स्पष्टम् । भूमिर्भूः । विद्युत् सौदामिनी । सरिन्नदी । लता वल्ली । वनिता योषित् ॥ १७ ॥

(चक्र०) भूमिविद्युदिति । अभिधानानि । भूम्यादिपर्यायशब्दाः स्त्रियाम् । बहुवचनपरत्वेन प्रयमकानां स्त्रीत्वादिति ॥ १७ ॥

यादो नपुंसकम् ॥ पूर्वस्यापवादः । यादः शब्दः सरिद्वाचकोऽपि नपुंसकं स्यात् ॥ १८ ॥

(चक्र०) यादो नपुंसकम् । पूर्वस्यापवादः ॥ ॥

भाः स्रुक् स्रग् दिग्उष्णिगुपानहः ॥ एते स्त्रियां स्युः । इयं भाः इत्यादि ॥ १९ ॥

स्थूणोर्णे नपुंसके च ॥ एते नपुंसके स्तः चात् स्त्रियाम् ॥ स्थूणम् ऊर्णम् स्थूणा ऊर्णा ॥ २० ॥

(चक्र०) स्थूणोर्णे नपुंसके च । चकारात् । स्त्रियां चानुक्तसमुच्चयार्थः । स्थूणा काष्ठमयी स्तम्भिका । ऊर्णा तु मेषादिलोम । ।

असुराः दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः समुद्रोऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरा मार्गणः । पङ्कः कर्दमः । इत्यादि ॥ ७ ॥

(चक्र०) देवासुरा० । अत्र पङ्कान्तशब्दद्वन्द्वं कृत्वा तस्य पङ्कान्तनामाभिधायकशब्देन कर्तव्यः । अभिधानशब्दः करणव्युत्पत्त्या वाचकशब्दपरः, तेन दैत्यादिशब्दवाच्यवाचकदैत्यादि पूर्ववद्ग्राह्यम् । शब्दस्वरूपापेक्षया च नपुंसकत्वम् इति ॥ ७ ॥

त्रिविष्टपत्रिभुवने क्लीबे ॥ त्रिविष्टपत्रिभुवनशब्दौ नपुंसके भवतः ॥ तृतीयं विष्टपं त्रिविष्टपम् । त्रिभुवनम् ॥ ८ ॥

(चक्र०) त्रिविष्टपमिति ॥ स्वर्गाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भः । अत एवामरसिंहः—'क्लीबे त्रिविष्टपम्' इति ॥ ८ ॥

द्यौः स्त्रियाम् ॥ स्पष्टम् , इयं द्यौः ॥ ९ ॥

(चक्र०) द्यौः स्त्रियाम् । अस्य स्वर्गाभिधानत्वात्पुंस्त्वे प्राप्तेऽयमारम्भः ॥ ९ ॥

इषुबाहू स्त्रियां पुंसि ॥ इषुबाहू स्त्रियां पुंसि च स्याताम् ॥ १० ॥

(चक्र०) इषुबाहू । शरभुजपर्यायाविमौ ॥ १० ॥

बाणकाण्डौ नपुंसके च । चात्पुंसि ॥ ११ ॥

(चक्र०) बाणकाण्डौ । शराभिधानोऽयम् ॥ ११ ॥

नान्तः । नान्तप्रत्ययान्तः पुंसि स्यात् । राजा । तक्षा । नहि चर्मवर्मादिष्वतिव्याप्तिः, नपुंसकप्रकरणे वक्ष्यमाणत्वात् ॥१२॥

(चक्र०) नान्तः । नान्तप्रत्ययान्त इत्यर्थः ॥ १२ ॥

क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । एते पुंसि भवन्ति ॥ क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो वारिदः ॥१३॥

अभ्रं नपुंसकम् । पूर्वस्यापवादः ॥ १४ ॥

(चक्र०) अभ्रं नपुंसकमिति । मेघाभिधानविषये पूर्वस्यापवाद इत्यर्थः ॥१४॥

उकारान्तः । उकारान्तः पुंसि स्यात् । प्रभुः । इक्षुः (क) ॥१५॥

धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् । धेन्वादयः स्त्रियां स्युः ॥ १६ ॥

(क) हनुहद्दविलासिन्या नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे इति मेदिनी । करेणुरिभ्यां स्त्री नेभे इत्यमरः । एवं जातायकविलिङ्गवचनानामा तेषु प्रकृतसूत्रस्य विषयः । उक्तं च लिङ्गानुशासनविधिव्यापी विशेषैर्यद्यबाधितः इति एवमन्यत्रापि ॥

समासे रज्जुः पुंसि च ॥ कर्कटरज्ज्वा, कर्कटरज्जुना ॥१७॥

श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ॥ एतानि नपुंसके स्युः । वसु चार्थवाचि । अर्थवाचि इति किम्, वसुर्मयूखा-ग्निधनाधिपेषु ॥ १८ ॥

(चक्र०) वसु चार्थवाचि । अर्थवाचि वसुशब्दो नपुंसके द्रष्टव्य ॥ १८ ॥

मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च ॥ एतानि नपुंसके स्युश्चात् पुंसि । अयं मद्गुः । इदं मद्गु ॥ १९ ॥

रुत्वन्तः ॥ रुत्वन्तः पुंसि स्यात् । मेरुः । सेतुः ॥ २० ॥

(चक्र०) रुत्वन्त । उकारो मकारोत्तरंशकः । मेरु । सेतुरित्यत्र स्यादिति तु । पूर्वावाचकः प्रथमः ॥ २० ॥

दारुकशेरुजतुवस्तुमस्तूनि नपुंसके ॥ इदं दारु । इत्यादि ॥२१॥

(चक्र०) दारुकशेरु । रुत्वन्तापवादा एते ॥ २१ ॥

सक्तुर्नपुंसके च ॥ चात्पुंसि ॥ सक्तु । सक्तुः ॥ २२ ॥

अदन्ता कटणथनपभमयरषसोपधाः ॥ अदन्ता एते पुंसि स्युः ॥ क । स्तबक । कल्क । ट । घट । पट । ण । गुण । गण । पाषाण । थ । रथ । न । इन । फेन । प । यूप । दीप । भ । स्तम्भ । कुम्भ । म । सोमः । भीम । य । समय । हय । र । क्षुर । अङ्कुर । ष । वृष । वृक्ष । स । वत्स । वायस । महानस ॥ २३ ॥

(चक्र०) अदन्ता इति । कोपधोऽकारान्त टोपधोऽकारान्त णोपधोऽकारान्त थोपधोऽदन्त, नोपधादन्त, पोपधान्त भोपधादन्त मोपधादन्त, योपधोऽन्त रोपधान्त षोपधादन्त सोपधोऽदन्तश्च पुंसि स्यात् ॥ उदाहरणं मूले उक्तम् ॥ २३ ॥

चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि क्लीबे ॥ पूर्वसूत्रापवाद ॥ २४ ॥

कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि क्लीबे च ॥ चात्पुंसि । अयं कण्टकः-इदं कण्टकम् । इत्यादि ॥ २५ ॥

(चक्र०) कापवादापवादमाह-चिबुकमित्यादि ॥ २४ ॥

किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि क्लीबे । किरीटम् । इत्यादि ॥ २६ ॥

(चक्र०) मूत्राण्यतानि मोपधापरादकानि ॥ ४८ ॥

रश्मिदिवसाभिधानानि । एतानि पुंसि स्युः । रश्मिर्मयूख । दिवसो घस्र ॥ ४९ ॥

दीधितिः स्त्रियाम् । पूर्वस्यापवाद ॥ ५० ॥

दिनाहनी नपुंसके । इदमप्यपवादकम् ॥ ५१ ॥

(चक्र०) दिनाहनी । दिवसाभिधानाविमौ ॥ ५१ ॥

मानाभिधानानि । एतानि पुंसि स्यु । कुडवः । प्रस्थ ॥५२॥

द्रोणाढकौ नपुंसके च । इद द्रोणम्–अय द्रोण ॥५३॥

खारीमानिके स्त्रियाम् । इय खारी । इय मानिका ॥ ५४ ॥

(चक्र०) खारीमानिके । मानाभिधानत्वात्पुंस्त्व प्राप्तस्यापवाद ॥ ५४ ॥

दाराक्षतलाजासूना बहुत्वे च । इमे दारा ॥ ५५ ॥

(चक्र०) बहुत्वे च । चकार पुंस्त्वस्य समुच्चायक ॥ ५५ ॥

नाड्यपजनोपपदानि व्रणाङ्गपदानि । यथासङ्ख्य नाड्याद्युपपदानि व्रणादीनि पुंसि स्यु । अय नाडीव्रण । अपाङ्ग । जनपद । व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम् ॥ ५६ ॥

मरुद्गरुत्तरदृत्विज । अय मरुत् ॥ ५७ ॥

ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनय । एते पुंसि स्यु । अयमृषि ॥ ५८ ॥

ध्वजगजमुञ्जपुञ्जाः । एते पुंसि ॥ ५९ ॥

हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः । एते पुंसि । अमरस्तु 'मुहूर्तोऽस्त्रियाम्' इत्याह ॥ ६० ॥

(चक्र०) अमरस्त्विति । एव च तन्मतेऽर्धर्चादिष्वयं द्रष्टव्य ॥ ६० ॥

षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः । अय षण्ड ॥ ६१ ॥

वंशांशपुरोडाशाः । अय वंश । पुरो दाश्यते पुरोडाशः । कर्मणि घञ् ॥ ६२ ॥

ह्रदकन्दकुन्दबुद्बुदशब्दा । अय ह्रद ॥ ६३ ॥

अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगा । अयमर्घ ॥६४॥

पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्ग

न्धरस्कन्धमृदङ्गमङ्गलसमुद्गपुङ्खाः । अयं पलाण्डुः । अयं पल्लवः इत्यादि ॥ ६५ ॥

सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः । एते पुंसि । अयं सारथिः ॥ ६६ ॥ इति पुंलिङ्गाधिकारः ॥

(चक्र०) अयं सारथिरिति । इति पुंलिङ्गाधिकारः ॥

॥ नपुंसकाधिकारः ॥ ३ ॥

नपुंसकम् । अधिकारोऽयम् ॥ १ ॥

भावे ल्युडन्तः । हसनम् । भावे किम् । पचनोऽग्निः । इध्मप्रव्रश्चनः कुठारः ॥ २ ॥

(चक्र०) भावे ल्युडन्तः । इदं च सूत्रं यद्यपि नपुंसके भावे क्त ल्युट् च इत्यनेन गतार्थं तथापि स्पष्टार्थमुपात्तम् । एवम् अग्रेऽपि बोध्यम् । इध्म प्रव्रश्चन इति । अत्र करणे ल्युट् ॥ २ ॥

क्तश्च । भावे यः क्तप्रत्ययस्तदन्तं क्लीबं स्यात् । हसितं गीतम् ॥ ३ ॥

(चक्र०) क्तश्चेति । इदमपि सूत्रं नपुंसके भावे क्त इत्यनेन गतार्थम् । प्रत्ययग्रहणे तदन्तस्य ग्रहणात् ॥ ३ ॥

त्वष्यञौ तद्धितौ च । शुक्लत्वम् । शौक्ल्यम् ॥ ४ ॥

(चक्र०) त्वष्यञौ तद्धितौ । भावे इत्यनुवर्तते । यद्यपि 'भावे त्वतलौ' इति सूत्रे भावशब्दः प्रकृतिजन्यबोधप्रकारतावाचकः । 'भावे ल्युडन्त' इत्यत्र तु भावशब्दो भावनावाचक इति भेदस्तथापि इह भावशब्दः शब्दाधिकारेण ग्राह्यः ॥ चकारात् कर्मण्यपि ब्राह्मणादिगुणवचनेभ्यो बोध्यम् । तत्र ब्राह्मणस्य कर्म ब्राह्मण्यम् ॥ एवञ्च चकारान्वानुक्ततद्धितादिगतप्रत्ययान्तानि क्लीबानि बोध्यानि । तत्र स्तेयम् । सख्यम् । कापेयम् । आधिपत्यम् । भौष्मम् । द्वैहायनम् । पितापुत्रकम् । अच्छावाकीयम् । अभिहित । इत्यादिविवेच्यम् ॥ ४ ॥

द्वन्द्वैकत्वम् । पाणिपादम् ॥ ५ ॥

(चक्र०) द्वन्द्वैकत्वमिति । 'प्राणितूर्य' इत्यादिना येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नपुंसकाभिधायका बोध्या इत्यर्थः ॥ ५ ॥

हेमन्तशिशिरावहोरात्रे चाभाषायाम् । स्पष्टम् ॥ ६ ॥

अनल्पेच्छाया । स्वच्छायम् ॥ ७ ॥

राजामनुष्यपूर्वा सभा । इनसभमित्यादि ॥ ८ ॥

सुरासेनाच्छायाशालानिशाः स्त्रियां च । सुरम् ॥ ९ ॥

(चक्र०) स्त्रियां चेति । चेन नपुंसकमित्यनुकर्षः ॥ ९ ॥

परवत् । अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् ॥ राजाङ्गाहाः पुंसि ॥ १० ॥

(चक्र०) परवदिति । 'द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गमिति सूत्रार्थ इत्यर्थः ॥ परपदस्य लिङ्गमिति सूत्रस्य स्मारकमिदम्, न तु अर्थम् ॥ १० ॥

अपथपुण्याहे नपुंसके ॥ ११ ॥

सङ्ख्यापूर्वा रात्रिः । त्रिरात्रम् ॥ सङ्ख्यापूर्वेति किम् । सर्वरात्रः ।

(चक्र०) संख्यापूर्वा रात्रिः । संख्यापूर्वं रात्रं क्लीबमित्यस्यानुवादः ॥ १२ ॥

द्विगुः स्त्रियां च । व्यवस्थया । पञ्चमूली । त्रिभुवनम् ॥ १३ ॥

(चक्र०) द्विगुः स्त्रियां च । चान्नपुंसकमिति संबध्यते ॥ १३ ॥

इसुसन्त । हविः धनुः ॥ १४ ॥

(चक्र०) इसुसन्तः । 'अच्यादरिम्' 'जनादरम्' एतयाद्रसाध पर्वो ॥ १४ ॥

अर्चिः स्त्रियां च । इसन्तत्वेऽपि अर्चिः स्त्रियां क्लीबे च स्यात् ॥ इयमिदं वा अर्चिः ॥ १५ ॥

छदिः स्त्रियामेव । इयं छदिः ॥ १६ ॥

(चक्र०) छदिः स्त्रियामेवेति । यद्यपि छदिरित्यस्येसन्तत्वेन नपुंसकत्वं प्राप्तं विधेयोपादानेन स्त्रियामित्यनेनैव नित्यस्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः तथापि 'पटलं छदिः' इत्यमरग्रन्थदर्शनेन साहचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः ॥ १६ ॥

मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि । एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम् । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम्, कार्मुकं शरासनम् । विवरं विलम् ॥ जलं वारि ॥ हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् । १७ ॥

सीरार्थौदना पुंसि ॥ १८ ॥

(चक्र०) सीरार्थौदना । सीरशब्दो हलाभिधानः । अर्थशब्दस्तु धनशब्दस्य पर्यायः । ओदनशब्दोऽन्नवाची । भिस्साभिस्सटशब्दौ तु दग्धान्नपराविति तयोः स्त्रीत्वेऽपि न क्षतिरिति ॥ १८ ॥

वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । वक्त्रः । वक्त्रम् । नेत्रः । नेत्रम् । अरण्यः । अरण्यम् । गाण्डीवः । गाण्डीवम् ॥ १९ ॥

अटवी स्त्रियाम् ॥ २० ॥

(चन्द्र०) अटवी स्त्रियाम् । अयं वनाभिधानः ॥ २० ॥

लोपधः । कुलम् । कूलम् । स्थलम् ॥ २१ ॥

तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि । अयं तूलः ॥ २२ ॥

शालमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च । पुंसि चकारान्नपुंसके । शीलम्–शीलः । इत्यादि ॥ २३ ॥

शतादिः सङ्ख्या । शतम् । सहस्रम् । शतादि इति किम् ? एकः, द्वौ, बहवः । सङ्ख्या इति किम् ? शतशृङ्गो नाम पर्वतः ॥ २४ ॥

(चन्द्र०) सङ्ख्येति । संख्यावाचकशब्दः ॥ २४ ॥

शतायुतप्रयुताः पुंसि च । अयं शतः–इदं शतम् । इत्यादि ॥

(चन्द्र०) शतायुत० । अयं शतशब्दः [illegible] ॥ २५ ॥

लक्षा कोटिः स्त्रियाम् । इयं लक्षा । इयं कोटिः । 'वा लक्षा नियुतं च तत्' इत्यमरात् लक्षमपि लक्षणम् ॥ २६ ॥

(चन्द्र०) लक्षा कोटिः । [illegible] ॥ २६ ॥

शङ्कुः पुंसि ॥ २७ ॥

(चन्द्र०) शङ्कुः पुंसि । [illegible] ॥ २७ ॥

सहस्रः क्वचित् । अयं सहस्रः–इदं सहस्रम् ॥ २८ ॥

(चन्द्र०) सहस्रः क्वचित् । [illegible]

मन्द्व्यच्कोऽकर्तरि [illegible] चर्म । वर्म । [illegible] किम् ? ददाति इति दामा । [illegible]

(चन्द्र०) मन्द्व्यच्कः । [illegible] चर्म । [illegible]

[illegible]

णिमादौ त्विट् । दामस्यत्रापि 'मन्धातो' इत्यनेनैव मन् । परन्त्वयं निगत् । उणादि प्रत्ययान्तानां संज्ञाशब्दपरत्वेन यादृशी व्युत्पत्तिर्यत्रोचिता, सा कल्पनायति कर्त्तव्येति प्रत्ययः सम्भवतीति ॥ २९ ॥

ब्रह्मन्पुंसि च । अयं ब्रह्मा—इदं ब्रह्म ॥ ३० ॥

(चक्र०) ब्रह्मेति । 'बृंहेर्नेस्य अः' इति मन्प्रत्यय, नुमा नस्य अकार रत्वञ्च ॥ ३० ॥

असन्तो द्विस्वरकः । यशः । मनः । तप । द्विस्वरकः किम् । चन्द्रमाः ॥ ३१ ॥

(चक्र०) असन्तो द्विस्वरक । 'धातोरसु' इति विहितोऽसु । तस्य अमार्थ मानुवृत्तिस्तदन्ता अपि योज्याः ॥ 'चन्द्रे माङो न्तिः' इति विहितासिप्रत्ययान्तच न्द्रमस्शब्दोपि असन्तः ॥ छन्दग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । एवमप्सर शब्दोऽपि ॥ ३१ ॥

अप्सराः स्त्रियाम् । एता अप्सरस । प्रायेणाय बहुवचनात् ॥ ३२ ॥

त्रान्तः । पत्रम् । छत्रम् ॥ ३३ ॥

(चक्र०) त्रान्तः । त्रप्रत्यान्तो नपुंसक स्यात् ॥ 'धातोस्त्र' इति त्रप्रत्यय ॥ ३३ ॥

यात्रामात्राभस्त्रादंष्ट्रावरत्रा स्त्रियामेव ॥ ३४ ॥

(चक्र०) यात्रामात्रेति । एवकारो न्यायसिद्धबाध्यबाधकभावानुवादक ॥ ३४ ॥

भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्रा पुंसि । अयं भृत्रः । न मित्रममित्र । 'तस्य मित्राण्यमित्रास्ते' इति माघ' । 'स्यातामामित्र मित्रे च' इति च ॥ ३५ ॥

(चक्र०) भृत्रामित्र । पूर्वस्यापवाद ॥ ३५ ॥

पत्रपात्रपवित्रसूत्रच्छत्रा पुंसि च ॥ ३६ ॥

बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि । बल वीर्यम् ॥ ३७ ॥

पद्मकमलोत्पलानि पुंसि च । पद्मादय शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्यु । अमरोऽप्याह 'वा पुंसि पद्मं नलिनम्' इति ॥ ३८ ॥

(चक्र) कुसुमाभिधायित्वेऽपीति । वस्तुत कुसुमाभिधायित्वेऽपीत्यर्थः ॥ यदि तु कुसुमविशेषाभिधायकोऽयं न तु कुसुमशब्दवाच्यतावच्छेदकावच्छिन्नवाचक इति तदानन्तपूर्वमवामयलिङ्गत्वाभिधानमिति । मता तरण जलजशब्दस्य जलजातकु सुमान्तराभिधायकत्वमित्यभिप्रायकमता तरणत्यर्थं ॥ ३८ ॥

आहवसङ्ग्रामौ पुंसि ॥ ३९ ॥

(चक्र०) आहवसमामौ पसि । एतयार्युद्धाभिधायकत्वात्नपुंसकत्वे प्राप्ते । एवमाजिशब्दोऽपि ॥ ३९ ॥

आजिः स्त्रियामेव ॥ ४० ॥

फलजातिः ॥ फलजातिवाचिशब्दो नपुंसके स्यात् । आमलकम् । आम्रम् ॥ ४१ ॥

(चक्र०)फलजातिरिति । फलवाचकानामृक्षाणामामलकाशब्दस्यस्त्रीत्वऽपि न क्षति ॥ ४१ ॥

वृक्षजातिः स्त्रियामेव । कापिदेवेदम् । हरीतकी ॥ ४२ ॥

(चक्र०) हरीतकीति । हरीतक्याः फलानि हरीतक्यः ॥ ४२ ॥

वियज्जगत्सकृच्छकन्पृषच्छकृद्यकृद्दशिवत ॥ एते पक्षवा भवति ॥ ४३ ॥

नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि ॥ ४४ ॥

श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यस्यास्पदाकाशकण्वबीजानि ॥ एतानि क्लीबे स्युः ॥ ४५ ॥

दैव पुंसि च ॥ दैवम्—दैव ॥ ४६ ॥

(चक्र०) दैवमिति । चारुकोर ।

धा याऽयससहपरूप्यपर्णधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि ॥ इद धान्यम् । इत्यादि ॥

द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि ॥ ४८ ॥

अक्षमिन्द्रिये ॥ इन्द्रिये किम् । रथाङ्गाक्षौ मा भूत् । इति नपुंसकाधिकार ॥ ४९ ॥

(चक्र०) रथाङ्गादावपीति । आदिना रथाङ्गपरिग्रह इति ॥
नपुंसकाधिकार ॥

ॐ अथ स्त्रीपुंसाधिकार ॐ ४ ।

स्त्रीपुंसयोः अधिकारोऽयम् ॥ १ ॥

(चक्र०) स्त्रीपुंसयोः । अधिकारोऽयम् ॥ १ ॥

गोमणियष्टिमुष्टिपाटलिबस्तिशाल्मलित्रुटिमसिमरीचय ॥ इयमयं वा गौ ॥ ॥

मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः ॥ इयमयं वा मृत्यु ॥ ३ ॥

उकारान्तगुणवचनं नपुंसकं च ॥ त्रिलिङ्गम्, इत्यर्थः । पटु'–पटु–पट्वी ॥ ४ ॥

अपत्यार्थकस्तद्धिते ॥ औपगव –औपगवी । इति स्त्रीपुंसाधिकारः ॥ ५ ॥

(चक्र०) नपुंसकं चेति । चात्स्त्रीपुंसाधिकारः ॥ ४ ॥

---

* पुंनपुंसकाधिकारः * ५ ।

पुंनपुंसकयोः ॥ अधिकारोऽयम् ॥ १ ॥

घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः ॥ अयं घृत —इदं घृतम् ॥ २ ॥

शृङ्गार्धनिदाघोद्यमशल्यदृढा ॥ अयं शृङ्ग –इदं शृङ्गम् ॥ ३ ॥

व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः ॥ अयं व्रज –इदं व्रजम्

कबन्धौषधायुधान्ताः ॥ स्पष्टम् ॥ ४ ॥

दण्डमण्डखण्डशमसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः ॥ एते पुंनपुंसकयोः स्युः ।

'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः ।

शलाकावाची तु स्त्रियाम् । तथा च 'जानपदादिभ्य –' इत्यादिसूत्रेणायोविकारे ईप् कुशी । दारुणि तु आप् कुशा ॥ ५ ॥

गृहमेहदेहपट्टपटहाष्टपदाम्बुदककुदाश्च ॥ ६ ॥

इति पुंनपुंसकाधिकारः ॥ ६ ॥

(चक्र०) कुश इति । तथा च श्रुतिः –'कुशा वानस्पत्याः स्थ ता मा पात' इति ॥ शलाकावाचीति । सा च शलाकाकाष्ठादिनिर्मिता । तत्रमानमाह–तथा चेति ॥ ५ ॥

इति पुंनपुंसकाधिकारः ॥ ५ ॥

---

* अथाविशिष्टलिङ्गम् * ६ ।

अविशिष्टलिङ्गम् ॥ त्रिषु लिङ्गेषु साधारणमित्यर्थः ॥ १ ॥

अव्ययं कतियुष्मदस्मद् ॥ एतेषां लिङ्गं समानमेव ॥ २ ॥

ष्णान्ता सङ्ख्या शिष्टा परवत् ॥ एकः पुरुषः । एका स्त्री । एकं कुलम् ॥ ३ ॥

(चक्र०) शिष्टेति । पूर्वोक्तशब्दातिरिक्तत्वावच्छिन्नप्रतियोगिताकभेदवन्तः । परवदिति । विशेष्यवदित्यर्थः ॥ ३ ॥

गुणवचनं च ॥ परवत् । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् ॥ ४ ॥

(चक्र०) गुणवचनञ्च । परवदित्यनुवर्तते ॥ ४ ॥

कृत्याश्च ॥ परवदित्यनुवर्तनीयम् ॥ ५ ॥

(चक्र०) कृत्याश्च । कृत्यप्रत्ययान्ताः परवद्वा स्युः ॥ ५ ॥

करणाधिकरणयोर्युट् ॥ ६

सर्वादीनि नामानि ॥ स्वार्थेऽपि त्रिसूत्री ॥ ७ ॥

इति यास्क श्रीनिवासकिशोरेन्द्रप्रपूरिता सारस्वतस्य सूत्रवृत्त्यात्मिका

लिङ्गानुशासनप्रक्रिया समाप्ता ।

(चक्र०) सर्वादीनि नामानि । सर्वनामसंज्ञकानि सर्वादीनि परवद्वाच्यानि ॥ स्वप्रार्थेति । लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानसिद्धत्वात् । अत एव लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य इति भाष्यकाराणामुक्तम् । तेन यौगिकानां तु लोकव्युत्पत्तिमात्रं लिङ्गाभिधानप्रमाणमिति दिक् ॥ इति लिङ्गानुशासनप्रक्रिया ॥ ७ ॥

इति यास्क-श्री निवासकिशोरकरप्रपूरितसारस्वतलिङ्गानुशासन

प्रक्रियायास्तदृत्तचक्रधराख्यव्याख्या समाप्ता ।

समाप्तोऽयं ग्रन्थः ।

शुभमस्तु

सारस्वतोत्तरार्द्धसूत्रपाठा-
नुक्रमणिका ।

गाणपाठगोणराठगुत्रपागानुक्रमणिका।

धातुवृत्त्युक्तपाठानुक्रमणिका ।

इति।

सर्वविधपुस्तक प्राप्तिस्थानम्—
जयकृष्णदास हरिदास गुप्तः
चौखम्बा संस्कृत सीरिज आफिस बनारस सिटी।